360 ॥ अथ गौतम सूत्र वृत्ती. ॥

(मितार्क्षरा नाम्नी वृत्ति:)

३१/३ ✓

+

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥ ॥नमोरुद्राययद्धर्मशास्त्रंगौतमनिर्मितं।क्रियतेहरदत्तेनतस्यवृत्ति
र्मिताक्षरा॥१॥ ॥ओंवेदोधर्ममूलं॥ ॥कर्मजन्योभ्युदयनिश्रेयसहेतुरपूर्वाख्यआत्मविशेषगुणोधर्मः॥तस्यमूलंप्रमाणं
वेदोमंत्रब्राह्मणात्मकः॥जातावेकवचनं॥ ॥चत्वारोवेदाऋग्यजुःसामाथर्वात्मकाः।तएवधर्मेप्रमाणंनयोगिप्रत्यक्षं।नानुमा
नंनार्थापत्तिर्नवाक्याद्यागमः।तेनतन्मूलाएवोपनयनाद्योधर्माविक्ष्यंते।नचैत्यवंदनकेशोल्लुंचनादयइति।धर्मग्रहणमुप
लक्षणमधर्मस्यापिप्रतिषेधात्मकोवेदएवमूलंनिषेधविषयोहिब्रह्महत्यादौविषयेप्रवृत्तंनिवर्तयंति।नचरागद्वेषादिनावि
षयेप्रवृत्तस्ततोनिवर्तयितुंशक्या।यद्यसौविषयोनुष्ठितःप्रत्यवायहेतुर्नस्यादितिनिषेधहेतुरेवप्रत्यवायहेतुतांगमयति।
अथयत्रप्रत्यक्षोवेदोमूलभूतोनोपलभ्यतेतत्रकथं॥ ॥तद्विदांचस्मृतिशीले॥ ॥तद्विदांवेदविदांमन्वादीनांयास्मृतिस्त
त्प्रणीतधर्मशास्त्रंयच्चतेषांशीलंअनुष्ठानंतेस्मृतिशीलेअस्मदादीनांप्रमाणं।नतेषांअनुष्ठानंनिर्मूलंसंभवति॥संभवतिच
वैदिकानामुत्सन्नपाठवेदत्वंअनुभवइति।तेषांतुतदानीविद्यमानत्वेसंप्रदायाविच्छेदाच्चवैदिकानुष्ठानंवेदमूलमेव॥यथाहापस्तंबः॥

तेषांउत्सन्नाःपाठाःप्रयोगादनुमीयंतइति।यदिशीलंप्रमाणंअतिप्रसंगस्यात्।कथं।कतभरद्वाजौव्यत्यस्यभार्येजग्मतुः।वसिष्ठ
श्चांडालीमक्षमालांप्रजापतिःस्वांदुहितरं।रामेणपितृवचनादविचारेणमातुःशिरःछिन्नमित्यादिसाहसमपिप्रमाणंस्यात्॥नेत्याह॥
दृष्टोधर्मव्यतिक्रमःसाहसंचमहतां॥ ॥महतामेतादृशंसाहसमपिधर्मव्यतिक्रमएवदृष्टोनतुधर्मःरागद्वेषनिबंधनत्वात्।नच
तेषामेवविधंदृष्टमित्येतावतास्मदादीनामपिप्रसंगः।कुतः।ननुदृष्टार्थ।अवरदौर्बल्यात्॥ ॥अवरेषामस्मदादीनांदुर्बलत्वात्।
तथाचश्रूयते।तेषांतेजोविशेषेणप्रत्यवायोनविद्यते।नतदन्वीक्ष्यप्रयुंजानःसीदत्यवरकोजनइति॥ ॥तुल्यबलविरोधेविकल्पः॥
अथयत्रद्वेविरुद्धेतुल्यबलेप्रमाणेउपनिपततःयथा।अतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातीतितथाउदितेजु
होत्यनुदितेजुहोतीतिश्रुतिः।नित्यमभोज्यंकेशकीटावपन्नमितिगौतमः।पक्षिजग्धंगवाघ्रातमवधूतमवक्षुतं॥केशकी
टावपन्नंचमृत्प्रक्षेपेणशुध्यतीतिमनुः।तत्रकिंकर्तव्यंतुल्यबलविरोधेविकल्पः।तुल्यप्रमाणप्रापितयोरेवजातीययोरर्थ
योर्विकल्पः।तद्वदेवेत्यन्यतरस्वीकारः।नसमुच्चयःअसंभवात्।अथेदानींधर्मान्वक्ष्यन्उपनयनपूर्वकत्वात्तेषामुपनयनंताव
दाह॥ ॥उपनयनंब्राह्मणस्याष्टमेवर्षे॥ ॥उपनयनानंतरभाविनिब्राह्मणत्वेअत्रब्राह्मणग्रहणंब्राह्मणस्यसतएवोपनयनं॥

॥३॥ नतूपनयनादिसंस्कारजन्यं ब्राह्मण्यमिति ज्ञापनार्थं ॥ किंच ॥ ब्राह्मणो न हंतव्यो ब्राह्मणो न सुरां पिबेदिति निषेधश्रुतिरनुपनीतविष
येन स्यात् ॥ ब्राह्मणस्याष्टमं वर्षं मुख्यमुपनयनकालः प्रथमभाविनो गर्भाधानादीन्संस्कारानुल्लंघ्योपनयनव्याख्यानं तस्य प्राधा
न्यं द्योतयति ॥ तेन दैवानुपपत्त्या गर्भाधानादेरकरणेप्युपनयनं भवति ॥ तदकरणे तु विवाहादिष्वनधिकार इति सिद्धं भवति ॥ ॥नव
मं पंचमं वा काम्यं ॥ ॥कामनिमित्तं काम्यं ॥ तन्नवमं पंचमं वा भवति ॥ नवमे तेजस्कामः इत्यापस्तंबः ब्रह्मवर्चसकामस्य कार्यो विप्रस्य
पंचमे इति मनुः ॥ ॥गर्भादिः संख्या वर्षाणां ॥ ॥वर्षाणां संख्या गर्भादिरेव भवति ॥ न जन्मादिः ॥ ॥तद्द्वितीयं जन्म ॥ ॥तदुपनय
नं द्वितीयं जन्म ॥ अत्रास्य माता सावित्री पिता त्वाचार्यः ॥ तेन द्विजत्वसिद्धिः ॥ ॥तद्यस्मात्स आचार्यः ॥ ॥तदुपनयनं पितुरलाभे य
स्मात्पुरुषात्करोति स आचार्यः ॥ न च केवलमुपनयनात्कस्मात्तर्हि ॥ ॥वेदानुवचनाच्च ॥ ॥अनुवचनमध्यापनं ॥ आह मनुः उपनीय
तु यः शिष्यं वेदमध्यापयेद्द्विजः ॥ सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इति ॥ ॥एकादशद्वादशयोः क्षत्रियवैश्ययोः ॥ ॥नित्यायम ॥३॥
नयोः कल्पः ॥ काम्यस्तु मनुना दर्शितः ॥ राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोष्टमे इति ॥ अथापत्कालमाह ॥ ॥आ षोडशाद्ब्राह्म
णस्यापतिता सावित्री ॥ ॥अभिविधावाकारः ॥ आषोडशाद्वर्षाद्ब्राह्मणस्य सावित्र्यपतिता अप्रच्युता ॥ सावित्रीशब्देन तदुपदे

360

॥ अथ गौतम सूत्र वृत्ती ॥

(मिताक्षरा नाम्नी वृत्तिः)

37/3

गौ० वृ०

॥३॥ नतूपनयनादिसंस्कारजन्यं ब्राह्मण्यमिति ज्ञापनार्थं ॥ किंच ॥ ब्राह्मणो न हंतव्यो ब्राह्मणो न सुरां पिबेदित्यादिनिषेधश्रुतिरनुपनीतविष
ये न स्यात् ॥ ब्राह्मणस्याष्टमं वर्षं मुख्यमुपनयनकालः प्रथमभाविनो गर्भाधानादीन् संस्कारानुल्लंघ्योपनयनव्याख्यानं तस्य प्राधा
न्यं दर्शयति ॥ तेन दैवानुपपत्त्या गर्भाधानादेरकरणेप्युपनयनं भवति ॥ तदकरणे तु विवाहादिष्वनधिकार इति सिद्धं भवति ॥ ॥ नव
मे पंचमे वा काम्यं ॥ ॥ कामनिमित्तं काम्यं ॥ तन्नवमे पंचमे वा भवति ॥ नवमे तेजस्काम इत्यापस्तंबः ॥ ब्रह्मवर्चसकामस्य कार्यो विप्रस्य
पंचमे इति मनुः ॥ ॥ गर्भादिः संख्या वर्षाणां ॥ ॥ वर्षाणां संख्या गर्भादिरेव भवति ॥ न जन्मादिः ॥ ॥ तद्द्वितीयं जन्म ॥ ॥ तदुपनय
नं द्वितीयं जन्म ॥ अत्रास्य माता सावित्री पिता त्वाचार्यः ॥ तेन द्विजत्वसिद्धिः ॥ ॥ तद्यस्मात्स आचार्यः ॥ ॥ तदुपनयनं पितुरभावे य
स्मात्पुरुषादुपैति स आचार्यः ॥ न च केवलादुपनयनात् कस्मात्तर्हि ॥ ॥ वेदानुवचनाच्च ॥ ॥ अनुवचनमध्यापनं ॥ अत्र मनुः ॥ उपनीय
तु यः शिष्यं वेदमध्यापयेद्द्विजः ॥ सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इति ॥ ॥ एकादशद्वादशयोः क्षत्रियवैश्ययोः ॥ ॥ नित्यायम ॥३॥
नयोः कल्पः ॥ काम्यस्तु मनुना दर्शितः ॥ राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोष्टमे इति ॥ अथाकालमाह ॥ ॥ आषोडशाद्ब्राह्म
णस्यापतिता सावित्री ॥ ॥ अभिविधावाकारः ॥ आषोडशाद्वर्षाद्ब्राह्मणस्य सावित्र्यपतिता अप्रच्युता ॥ सावित्रीशब्देन तदुपदे

360

॥ अथ गौतम सूत्र वृत्ती ॥

31/3

(मिताक्षरा नाम्नी वृत्तिः)

गौत० वृत्ति

३

बैल्वपालाशौ ब्राह्मणदंडौ ॥ ॥बैल्वः पालाशो वा ब्राह्मणस्य दंडः न पुनः समुच्चितौ ॥ ॥आश्वत्थपैलवौ शेषे ॥ ॥पीलुर्वृक्षविशेषः
उत्तरउन्नायीतिप्रसिद्धः । शेषक्षत्रियवैश्यविषये ॥ ॥यज्ञियो वा सर्वेषां ॥ ॥सर्वेषामुक्तालाभे यज्ञियो वा वृक्षो दंडः स्यात् ॥
अपीडिता यूपवक्राः सशल्काः ॥ ॥अपीडिताः कीटादिभिरदूषिताः यूपवक्राः यूपवदग्रवक्राः सशल्काः सत्वचः एवंविधा द
डाः सर्वेषां ॥ ॥मूर्द्धललाटनासाग्रप्रमाणाः ॥ ॥यथासंख्यमत्रेष्यते । मूर्धप्रमाणो ब्राह्मणस्य दंडः । ललाटावधिः क्षत्रिय
स्य । नासावधिर्वैश्यस्येति ॥ ॥मुण्डजटिलशिखाजटाश्च ॥ ॥अत्र न यथासंख्यं मुण्डाः उप्तसर्वकेशाः । जटिलाः केशधारि
णः । जटा केशसंहतिः । शिखामात्रे वा जटा येषां ते शिखाजटाः । सर्वेषामयं सामान्यधर्मः । छंदोगा[illegible]पेक्षया मुण्डत्वाद्यग्रहणं ॥
द्रव्यहस्त उच्छिष्टोऽनिधायाचामेत् ॥ ॥मूत्रपुरीषयोः कर्म भोजनादि वोच्छिष्टत्वनिमित्तं । द्रव्यहस्तस्य स उच्छिष्टश्चेत्तद्द्रव्यम
निधायाचामेत् । उच्छिष्टः सन् द्रव्यहस्तश्चेत्तद्द्रव्यं निधायाचामेत् । तथा च मनुः । उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन ॥
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियादिति । किंच । भक्ष्यभोज्यादिद्रव्यविषये तद्द्रव्यं निधायैव मूत्रपुरीषयोः कर्म कृत्वा
पुनरुपात्तं निधायाचामेत् । वस्त्रादिविषये त्वनिधायैवाचामेत् । अथ द्रव्यशुद्धिरुच्यते ॥ ॥द्रव्यशुद्धिः परिमार्जन ३

प्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदारवतान्तवानां ॥ ॥तैजसादीनां द्रव्याणां यथाक्रमं परिमार्जनादिशुद्धयः । तैजसं
कांस्यादि । मार्त्तिकं मृन्मयादि । दारवं दारुमयादि । तान्तवं तंतुमयादि । तेषां क्रमेण परिमार्जनं भस्मना कांस्यस्य त्रात्कृताम्रे
वणीराजतयोः अम्लेन ताम्रस्य । इदं तुच्छिष्टलिप्तानाम तैजसानामेवंभूतानामुत्सर्ग इति कल्पकः । रजस्वलाचण्डालादिस्पृष्टाना
म कार्दनं पंचगव्यं प्रक्षिप्य कार्यं इति कल्पलोमार्जनाच्छुद्धिः । मार्त्तिकानां प्रदाहः । प्रकृष्टो दाहः वर्णान्तरापत्तिर्यथा स्यात् । तथाविधो
दाहः शोधनं । इदं स्पर्शेऽपि हतानां । अत्र च वसिष्ठः । मद्यमूत्रपुरीषश्लेष्मपूयाश्रुशोणितैः । संस्पृष्टं नैव शुध्येत पुनःपा
केन मृन्मयमिति । दारवाणां तक्षणं शुद्धिः । उदकमेध्यावासितानां । अन्यत्र प्रोक्षणप्रक्षालनादि । तान्तवानां निर्णेजनं
शुद्धिः । इदं स्पर्शदूषितानां । मलादिदूषितानां धावनं तन्मात्रच्छेदनं वा । स्पर्शदूषितानां बहूनां प्रोक्षणाच्छुद्धिरिति मनुः ॥
तैजसवदुपलमणिशंखशुक्तीनां ॥ ॥उपलादीनां तैजसवच्छुद्धिः परिमार्जनमिति ॥ ॥दारुवदस्थिभूम्योः ॥ ॥अस्थि ह
स्तिदंतादि । भूमिर्गृहादि । तयोः दारुवच्छुद्धिस्तक्षणमिति । दारववदेव वक्तव्ये दारुवदिति निर्देशाद्धिकारस्याप्यार्थाधिवि
कारिणापि सेव शुद्धिरित्युक्तं ॥ ॥आवपनं च भूमेः ॥ ॥आवपनमन्यत आनीय पूरणमधिका शुद्धिर्भूमेः । अत्र वसिष्ठः ॥

खननाद्दहनाद्वर्षाद्गोभिराक्रमणेन च। चतुर्भिः शुध्यते भूमिः पंचमाच्चोपलेपनादिति॥ ॥चैलवद्रज्जुविदलचर्मणां॥ विदलं
वेत्रवेणुविदलादिनिर्मितं पिटकं निर्मितमथान्ये। रज्ज्वादीनां त्रयाणां चैलवद्बहुत्वे तु बुद्धिर्निर्णेजनमिति। पैठीनसिस्तु रज्जुवेणु
विदलचर्मणां अस्पृश्यस्पृष्टानां प्रोक्षणं शुद्धिरिति॥ ॥उत्सर्गो वात्यन्तोपहतानां॥ ॥उदंवासिष्ठेन समानविषयं मद्यमूत्रपु
रीषैरित्यादिना॥ वाशब्दः पक्षव्यावृत्तौ॥ ॥प्राङ्मुख उदङ्मुखो वा शौचमाचारभेत॥ ॥इच्छाने विकल्पः। आरभेतेति वचना
त्पादप्रक्षालनप्रभृति दिङ्नियमः। आपस्तंबस्तु प्रत्यक्पादावनेजनमित्याह। शौचग्रहणमाचमन एव माभूत्मूत्रपुरीषा
दिशौचेपि दिङ्नियमज्ञापनार्थं॥ ॥शुचौ देशे आसीनो दक्षिणं बाहुं जान्वंतरा कृत्वा यज्ञोपवीत्यामणिबंधनात्पाणी प्रक्षा
ल्य वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वापोप आचामेत॥ ॥इदमेकं वाक्यं। आचमनकाले शुचौ देशे नुपहते आसीन इत्युपलक्षणं॥
आसीनस्तिष्ठन्प्रह्वो वेति॥ जान्वंतरा जानुनोर्मध्ये दक्षिणं बाहुं कृत्वा दक्षिणं बाहुमित्युक्त्वा द्वामहस्तस्य नावस्थाभावः।
यज्ञोपवीतीति पूर्ववस्थानस्थमपि यथास्थानं निवेशनार्थं। अयोत्तरीयविन्यासार्थं। तथा चापस्तंबः। उपासने गुरूणां वृद्धा
नामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यादपि वासस्त्रमेवोपवीतार्थ इति। आमणिबंधना

द्यानिमित्तमुपलक्षेनयनं कल्प्यते। तदुपनयनस्य काल इत्यर्थः। द्वाविंशते राजन्यस्य द्व्यधिकाया वैश्यस्य॥ ॥उभयत्राद्यादनुव
र्तते। शुणप्रत्ययस्यायं लोपोत्र द्रष्टव्यः। आद्वाविंशाद्वर्षाद्राजन्यस्य आचतुर्विंशाद्वैश्यस्यापतिता सावित्री॥ ॥मौंजीज्यामौर्वीसौ
त्रीमेखलाः क्रमेण॥ ॥मुंजो दर्भविशेषस्तद्विकारो मौंजी। मूर्वा रव्यो षधिविशेषः मरली ति द्रविडभाषायां। तद्विकारो मौर्वी
ज्या त्वासौ मौर्वीरिति कर्मधारयः। ज्याशब्देन धनुषो बराह्यते यावत्। सौत्री सूत्रविकारः। एता वर्णक्रमेण मेखला भवंति॥ ॥
कृष्णरुरुबस्ताजिनानि॥ ॥कृष्णः कृष्णसारः रुरुर्बिंदुमान्मृगः बस्तश्छागः। एतेषामजिनान्युत्तरीयाणि क्रमेण। अजिनं त्वे
वोत्तरीयं धारयेदित्यापस्तंबीये दर्शनात॥ ॥वासांसि शाणक्षौमचीरकुतपाः सर्वेषां॥ ॥शणविकारः शाणं क्षुमा अतसी
तद्विकारः क्षौमं। श्वेतपट इत्यन्ये। दर्भादिनिर्मितं चीरं। ऊर्णा कंबलः कुतपः। चत्वार्येतानि वासांसि सर्वेषां॥ ॥कार्पासं चा
विकृतं॥ ॥अविकृतं कार्पासं च वासः सर्वेषां। विकारः कुसुंभादिरागद्रव्यैर्वर्णांतरकल्पनं। विकृते त्वनुमतान्याह॥ ॥काषा
यमप्येके॥ ॥एके आचार्याः काषायेण रक्तमपि धार्यं मन्यंते। तत्रापि नियमः॥ ॥वार्क्षं ब्राह्मणस्य मांजिष्ठहारिद्रे इतरयोः॥
वृक्षकषायेण रक्तं वार्क्षं ब्राह्मणस्य। मंजिष्ठया रक्तं मांजिष्ठं। हरिद्रया रक्तं हारिद्रं। तदुत्तरयोः क्षत्रियवैश्ययोरिति यावत्॥ ॥

शुक्रमसृङ्मज्जा मूत्रविट्कर्णविण्नखाः। श्लेष्माश्रु दूषिकास्वेदो द्वादशैते नृणां मला इति मनुः।। एतत्सर्वममेध्यशब्देन विवक्षितं।।
अस्य यावता गंधो लेपश्चापकृष्येते अपनीयेते तावता शौचमिति। यस्य मलस्य गंधमात्रं तस्य तदपकर्षणं। यस्य गंधो लेपश्च तस्य
तदुभयापकर्षणं।। ।।तदद्भिः पूर्वं मृदा च।। ।।तत्पूर्वं गंधवन्मलापकर्षणं अद्भिः। लेपगंधवन्मलापकर्षणं मृदा चाद्भिश्चेति।
इदं हस्तपादादेरमेध्यलिप्तस्य शौचं तैजसादिषु विशेषस्योक्तत्वात्।। ।।मूत्रपुरीषस्नेहविस्रंसनाभ्यवहारसंयोगेषु च।। ।।चका
रः पूर्वोक्तसमुच्चये। स्नेहो रेतः। मूत्रपुरीषस्नेहानां विस्रंसनं निरसनं। अभ्यवहारोऽभ्यवहार्यं द्रव्यं। तेन संयोगः। एषु निमित्तेषु पूर्व
वन्मृदा चाद्भिश्च शौचमिति।। ।।यत्र चाम्नायो विदध्यात्।। ।।यत्र च विषये यच्छौचमाम्नायो विदध्यात्तत्र तदेव भवति। यथा चमसा
नामुच्छिष्टलिप्तानां मार्जालीये अद्भिः प्रक्षालनमिति।। ।।अथ गुरूपसदनविधिः।। ।।पाणिना सव्यमुपसंगृह्यानंगुष्ठमधीहि भो इत्या
मंत्रयेत गुरुं तत्र चक्षुर्मनः प्राणोपस्पर्शनं दर्भैः।। ।।पाणिना सव्येन दक्षिणेन सव्यमिति विशेषग्रहणाद्दक्षिणेनेति गम्यते। गुरोः
सव्यपाणिमनंगुष्ठं अंगुष्ठवर्जं गृहीत्वा अधीहि भो इति गुरुमामंत्रयेत।। तत्र गुरौ चक्षुषी मनश्च निधायावहितः स्यादिति। प्राणाः
शीर्षण्यानींद्रियाणि तेषामालभ्यानामात्मनो क्रमेण दर्भैः रूपस्पर्शनं कर्तव्यं माणवकेन।। ।।प्राणायामाः त्रयः पंचदश

मात्राः।। ।।कार्या इति शेषः। जानु पार्श्वतः परिक्रम्य त्रुटिमेकां कुर्यात्सैका मात्रा। ताः पंचदश पूर्यंते यावता कालेन तावंतं प्राणवायुं
धारयेत्स एकः प्राणायामः। ते त्रयः कार्याः। मनुस्तु। सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः
स उच्यते इति।। ।।प्राक्कूलेष्वासनं च।। ।।प्रागग्रेषु दर्भेष्वासनं चकारात्कर्तव्यमिति शेषः।। ।।ॐ पूर्वा व्याहृतयः पंच सत्यांताः।। ।।
व्याहृतिसाम। भूर्भुवः स्वः सत्यं पुरुष इति पंच। अत्र तु पुरुषव्याहृतिश्चतुर्थी सत्यव्याहृतिः पंचमी वक्तव्या। तास्त्वप्रत्येकं प्रणव
पूर्वाः कर्तव्याः।। ।।गुरोः पादोपसंग्रहणं प्रातः।। ।।अहरहः प्रातर्गुरोः पादोपसंग्रहणं कार्यं। व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिण इति मनुः।। ।।ब्रह्मानुवचने चाद्यंतयोः।। ।।ब्रह्म वेदः अनुवचनमध्यापनं तत्राद्यंतयोश्च गु
रोः पादोपसंग्रहणं कार्यं।। ।।अनुज्ञात उपविशेत्प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वा।। ।।आचार्येणानुज्ञातस्तद्दक्षिणतः प्राङ्मु
ख उदङ्मुखो वोपविशेत् कार्यानुगुणो विकल्पः।। ।।सावित्री चानुवचनं।। ।।तत्सवितुर्वरेण्यमित्येषा नेत्यन्या सावित्रदेवत्या सा चानुव
चनीयेति।। ।।आदितो ब्रह्मण आदाने।। ।।पाणिना सव्यमुपसंगृह्येत्यादिना यदित्यनुवचनं तत्र यदुक्तं तदिदं ब्रह्मणो वेदस्य गुरोः सकाशा

शौचं तत आचमनकाले कर्तव्यं। उपनयनादनंतरं सावित्र्युपदेशकाले च। प्रत्यहं तु तत्र च क्षुर्मनस्त्वं प्रातरध्ययनार्थं तयोः गुरोः पादोपसं
ग्रहणमनुज्ञातोपवेशनं च कर्तव्यं॥ ॥ॐकारोन्यत्रापि॥ ॥सावित्र्यनुवचनादन्यत्राप्योंकारो वक्तव्यः अन्यत्राध्ययनकाल इत्यर्थः॥ ॥
अंतरागमने पुनरुपसदनं॥ ॥गुरोः शिष्यस्य च मध्ये गमनमंतरागमनं। अस्यकृत्याप्यंतरागमने पुनरुपसदनं कर्तव्यं। पाणिनासव्य
मित्यादौ। कालान्यत्रापीत्येवमंतमुपसदनं॥ ॥श्वनकुलसर्पमंडूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्च॥ ॥श्वादीनामंतरागमने
त्र्यहमुपवासो विप्रवासश्च कर्तव्यः। विप्रवासश्चाचार्यकुलादन्यत्र वासः। मनुस्तु। पशुमंडूकमार्जारश्वसर्पनकुलेषु च। अंतरागम
ने विद्यादध्यायनामहर्निशमिति। तद्धारणाध्ययनविषयं। गौतमीयं तु ग्रहणाध्ययनविषयं॥ ॥प्राणायामा घृतप्राशनं चेतरेषां॥ ॥
इतरेषां श्वादिव्यतिरिक्तानां पश्वादीनां अंतरागमने प्राणायामास्त्रयः कार्याः घृतप्राशनं च कार्यं। एतत्सर्वं शिष्यस्य प्रायश्चित्तं न गुरो॥ ॥
रुभयोरित्यपरे॥ ॥श्मशानेऽप्यध्ययने चैवं श्मशानाध्ययने चैवं॥ ॥अभिरुपरिभावे श्मशानस्यापर्यध्ययने चैवं प्रायश्चित्तं। प्राणा
यामा घृतप्राशनं चेति। द्विरुक्तिरध्यायपरिसमाप्त्यर्था॥ ॥१॥ ॥इति श्रीहरदत्तकृतायां गौतमीयवृत्तौ मिताक्षरायां प्रथमोऽध्या
यः॥१॥ ॥उपनीतप्रसंगेनानुपनीतधर्मा उच्यंते॥ ॥प्रागुपनयनात्कामचारवादभक्षः॥ ॥आषोडशाद्ब्राह्मणस्येत्यापस्तंबस्य।

यस्मिन्देशेऽग्निरपि निर्बध्यते। आतस्मात्पाणी प्रक्षाल्य वाग्यतः शब्दमकुर्वन् हृदयस्पृशः परिमाणार्थमिदं यावत्यः पीता हृदयं स्पृशंति
यासु माषा मज्जंति तावतीरपः आचामेत्त्रिश्चतुर्वा। यत्र मंत्रवदाचमनं विहितं तत्र तेन सह चतुरन्यत्र त्रिरिति विकल्पः॥ ॥द्विः परिमृ
ज्यात्॥ ॥प्रतियोगं सोदकेन पाणिना ओष्ठयोः परिमार्जनं॥ ॥पादौ चाभ्युक्षेत्॥ ॥चकाराच्छिरश्च॥ ॥खानि चोपस्पृशेच्छीर्षण्या
नि॥ ॥शीर्षभवानि शीर्षण्यानि शिरोभवानीति यावत्। खानि इंद्रियाणि तान्युपस्पृशेत्। अत्र चकारः प्रतींद्रियमपस्पर्शनार्थः।
॥ ॥मूर्धनि च दद्यात्॥ ॥चकारादपो मूर्धनि च सर्वाभिरंगुलिभिः स्पृशेदित्यर्थः॥ ॥सुप्त्वा भुक्त्वा क्षुत्वा च पुनः॥ ॥स्वापादिनिमि
त्तेषु पुनर्द्विराचामेदिति॥ ॥दंतश्लिष्टेषु दंतवदन्यत्र जिह्वाभिमर्शनात्॥ ॥दंतश्लिष्टेषूच्छिष्टलेपेषु जिह्वाभिमर्शनादन्यत्र दंत
वन्नाशुचित्वं। तत्रापि॥ ॥प्राक्च्युतेरित्येके॥ ॥सत्यपि जिह्वाभिमर्शने यावल्लेपाः स्वस्थानान्न च्यवंते तावन्नाशुचित्वमिति॥ ॥
च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिः॥ ॥आस्रावः आस्यजलं। निगिरणमंतःप्रवेशनं। च्युतेषु निगिरन्नेव तच्छुचिरिति वक्तव्ये
आस्राववद्विद्यादिति वचनमास्रावस्य निगिरणादर्वाक् शुचिरिति ज्ञापनार्थं॥ ॥न मुख्या विप्रुष उच्छिष्टं कुर्वंति ता न चेदंगे निपतंति॥ ॥
मुखभवा मुख्या विप्रुषः आस्रावबिंदवः भूम्यादिषु पतिता नाप्रायत्यं जनयंति॥ ॥लेपगंधापकर्षणे शौचममेध्यस्य॥ ॥वसा

॥६॥

क्रमेणप्रायश्चित्तमस्ति ।तत्रस्मृत्यंतरं ।अशीतिर्यस्यवर्षाणिबालोवाप्यूनषोडशः ॥प्रायश्चित्तार्धमर्हंतिस्त्रियोव्याधितास्तथा ॥ऊ
॥७॥ नैकादशवर्षस्यपंचवर्षात्परस्यच ॥चरेद्गुरुःसुहृद्वापिप्रायश्चित्तंविशुद्धये ॥अतोबालतरस्यास्यनापराधोनपातकं ।राजदं ॥७॥
डश्चनतस्यातःप्रायश्चित्तंचनेष्यतइति ॥ ॥नतदुपस्पर्शनादशौचं ॥ ॥तदुपस्पर्शनात्तस्याकृतोपनयनस्योदक्यादिस्पृष्ट
स्यापिउपस्पर्शनादशौचंनस्यात् ॥स्पृष्टास्पृष्टिरूपस्पर्शनंतेनस्नानंनकर्तव्यं ॥भुक्तोच्छिष्टस्यकृतमूत्रपुरीषस्यस्पर्शना
दपिनाचमनं ।इदमपिषष्ठवर्षात्प्राग्ज्ञेयं ॥किमर्थंतर्हितस्याशौचंविहितं ॥नतावदनुष्ठानार्थंनापिस्पर्शयोग्यतार्थं ।अकृत
शौचस्यापिस्पर्शयोग्यत्वात् ।रक्षणार्थमितिक्रमः ।तथाचस्मृत्यंतरं ।बालस्यपंचमादूर्ध्वंरक्षार्थंशौचमाचरेदिति ॥ ॥
नत्वेवैनमग्निहवनबलिहरणयोर्नियुंज्यात् ॥ ॥एनमनुपनीतमग्निहवनेऔपासनहोमादौ ।बलिहरणेवैश्वदेवादौन
नियुंज्यात् ननियुंज्यादितियावत् ।कुशाद्युक्तादन्यत्रापिसमंत्रकेकर्मणिननियुंजीतेति ।एवकारोवधारणे ।अत्राश्वला
यनः ।पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यापिवापुत्रःकुमार्यंतेवासीवेति ।छंदोगाश्चपत्नीजुहुयादितिपत्नीकु
मार्याद्यनुज्ञातेस्मिन्पक्षेनत्वेवैनमित्यर्थः ॥ ॥नब्रह्माभिव्याहारयेदन्यत्रस्वधानिनयनात् ॥ ॥अत्रमवेदः ।ए

नमनुपनीतंब्रह्मनाभिव्याहारयेन्नोच्चारयेत् ।किमविशेषेणेत्याह ।अन्यत्रस्वधानिनयनात् ।पित्र्यस्यसर्वस्यकर्मणउपल
क्षणं ।अन्यत्रोदककर्मस्वधापितृसंयुक्तेप्यस्तीतिवासिष्ठदर्शनात् ।अगृहीताक्षरःपुत्रःपित्रोःसंस्कारमर्हतीत्यादिच ।
अन्यस्यासंभवेसर्वंपित्र्यंकर्मतदानींमंत्रान्ग्राहयित्वासौकारयितव्यः ॥ ॥उपनयनादिर्नियमः ॥ ॥अग्नीधनादिर्योनियमो
वक्ष्यतेसउपनयनादिरेव ।अनुपनीताधिकारेणविच्छिन्नत्वादुपनीताधिकारार्थमिदं ॥ ॥उक्तंब्रह्मचर्यं ॥ ॥अनुपनीतस्य
यदुक्तंब्रह्मचर्यंतदुपनीतस्यापिसमानं ।ननुचस्त्रीप्रेक्षणालंभननिषेधोवक्ष्यते ।तथापिस्मृत्यपस्मारपकीर्तनादिनिषेधा
र्थमिदं ॥ ॥अग्नीधनभैक्षचरणे ॥ ॥अग्नीधनंसमिद्धोमः ।भिक्षाणांसमूहोभैक्षंतदर्थंप्रतिग्रहचरणंभैक्षचरणं ।तेप्रत्यह
कर्तव्ये ।तत्रमनुः ॥दूरादाहृत्यसमिधःसन्निदध्याद्विहायसि ॥सायंप्रातश्चजुहुयात्ताभिरग्निमतंद्रितः ।अकृत्वाभैक्षच
रणमसमिध्यचपावकं ।अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेदिति ।आपस्तंबस्तु ।सायमेवाग्निपूजेत्येके ॥ ॥सत्यवचनं ॥ ॥
उपनीतेनसत्यमेववक्तव्यं ॥ ॥अपामुपस्पर्शनं ॥ ॥उपस्पर्शनंस्नानंतदहरहःकर्तव्यं ॥ ॥एकेगोदानादि ॥ ॥गोदानंनाम
षोडशेवर्षेकर्तव्यंव्रतं ।तच्चतेषुद्वितीयंछंदोगानां ।एकेआचार्याः[illegible]दानादिस्नानमिच्छंतिनततःप्राक्दीक्षितवदस्यापि

गौ०सू० ब्रह्मचर्यदीक्षानियुक्तत्वात्। नित्यस्नानस्यायं प्रतिषेधः। नैमित्तिकं तु कर्तव्यं तत्र दण्डवदाप्लवनं। नाप्सु श्लाघमानः स्नायादिति आ
पस्तंबदर्शनात्। बहिःसंध्यत्वं च॥ ॥सायंप्रातर्हि संध्ये यस्य ग्रामाद्बहिर्भवतः स बहिःसंध्यस्तस्य भावः। ग्रामाद्बहिरेव संध्यो
पासनं कर्तव्यमिति। तत्कदा कथं चेत्याह॥ ॥तिष्ठेत्पूर्वामासीतोत्तरां सज्योतिष्याज्योतिषो दर्शनाद्वाग्यतः॥ ॥प्रातःसंध्यां ति
॥८॥ ष्ठेत्सायं संध्यामासीत। अत्यंतसंयोगे द्वितीया। स्थानासनयोरुपक्रमोपसंहारौ कथयति। सज्योतिषि काले समारभ्य ज्योतिरं
तरदर्शनात्। प्रातर्नक्षत्रज्योतिरारभ्या सूर्यज्योतिर्दर्शनात्। सायमादित्यज्योतिरारभ्यानक्षत्रज्योतिर्दर्शनादिति। ॥तावंतं
कालं वाग्यतः स्यात्। तथा च मनुः। पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्। पश्चिमां तु समासीनः सम्यगृक्षविभावना
दिति॥ ॥नादित्यमीक्षेत॥ ॥ब्रह्मचारिणोयं सर्वदादित्यदर्शनप्रतिषेधः। स्नातकस्य तु मानवं। नेक्षेतोद्यंतमादित्यं नास्तं यां
तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतमिति॥ ॥वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनयानोपानच्छत्र ॥८॥
कामक्रोधलोभमोहवादवादनस्नानदंतधावनहर्षनृत्तगीतपरिवादभयानि॥ ॥मध्वादीनि वर्जयेत्। मधु माक्षिकं। मांसं प्रसि
द्धः। गंधश्चंदनादिः। माल्यानि पुष्पाणि। दिवास्वप्नो दिवानिद्रा। अंजनमक्ष्णोः। अभ्यंजनं तैलाभ्यंगः। यानं शकटादिः। उपानच्छत्रे

पनयनविषयमिदं। कामचारइत्याचरणं। अपण्यान्यपि विक्रीणीयात् स्वकृत्यापि जीवेदिति। कामवादः अश्लीलानृतादिवदनं। का
मभक्षः न पुनः पर्युषितादिभक्षणं। चतुःपंचकुलेषाभोजनमित्येतावद्यत्स्यसतथोक्तः। ननु ब्रह्महत्यया सुरापानाद्यपि प्रसक्तं॥ ॥
अहुतात्॥ ॥हुतशिष्टं पुरोडाशादि नसत्तीति हुतात्तद्धि परीतोऽहुतात्। अनुपनीतो हुतं नाद्यादिति॥ ॥ब्रह्मचारी॥ ॥काम
चारादेरयमपवादः। आषोडशादित्युक्तत्वात्स्त्रीपुंसप्रसंगयोग्यताप्तिः। अतो ब्रह्मचारी जितेंद्रियः स्यादिति। तथा च स्मृत्यंतरे प्रायश्चि
त्तं। विप्लुतमवकीर्णिव्रतेन शुद्ध उपनयने पुनः सत्त्वद्रामतऊर्ध्वं व्रात्यावकीर्णिव्रताभ्यामिति॥ ॥यथोपपादमूत्रपुरीषो भवति॥ ॥
मूत्रपुरीषे यथोपपद्येते स तथोक्तः। प्राङ्मुखादिरपि कुर्यात्। न भूमावनंतर्धायेत्यादिनियमोऽपि नास्ति॥ ॥नास्याचमनकल्पो
विद्यते॥ ॥कल्पनिषेधादाचमनमनुज्ञातं स्त्रीशूद्रवत्॥ ॥अन्यत्रापमार्जनप्रधावनावोक्षणेभ्यः॥ ॥अपमार्जनादीनि वर्जयि
त्वाचमनकल्पो नास्ति। अपमार्जनादिकमस्तीति यावत्। येषु पमार्जनादीन्याचमनकल्पेनांतर्भवंति तथापि पर्युदासमुखेन ता
नि विधीयंते। त्रसोदकेन पाणिना परिमार्जनमुच्छिष्टादिलिप्तस्य प्रधावनममेध्यादिलिप्तस्याद्भिर्मृदा च प्रक्षालनमवोक्षणं
रजस्वलादिस्पृष्टस्य। इदमत्यंतबालविषयं। षष्ठवर्षादूर्ध्वं स्नानमिच्छंति। अस्यानुपनीतस्य एतावदुक्तमात्रका[illegible]दित्यति

१ जलाहरणं। अदत्तादानं। केनाप्यदत्तस्योदकस्याप्यस्वामिकस्यादानं। हिंसा प्राणिपीडा॥ ॥आचार्यतत्पुत्रस्त्रीदीक्षितनामानि॥ ॥
आचार्यस्य तत्पुत्रस्य तत्स्त्रियाः दीक्षितस्य च संज्ञां वर्जयेत्। परोक्षे औपचारिकनामग्रहणं कर्तव्यमिति। मधुमांसादीनां तत्पुत्रपर्यंतं वर्ज
येदितिक्रियान्वयः। अत्यपिस्त्रस्य॥ ॥शुक्ता वाचा मद्यं नित्यं ब्राह्मणः॥ ॥शुक्ता अश्लीलाः परोद्वेगकारिण्यः। मद्यं मदकरद्रव्यं। ताश्च
तच्च नित्यं वर्जयेत्। नित्यं ब्राह्मणवचनात् क्षत्रियवैश्ययोरगृहस्थयोः पैष्टीव्यतिरिक्तमद्योपयोगे न प्रत्यवाय इति॥ ॥अधःशय्या
सनी पूर्वोत्थायी जघन्यसंवेशी॥ ॥अस्यार्थो मानये स्पष्टः। नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसंनिधौ। उत्तिष्ठेत्प्रथमं चास्य चर
मं चैव संविशेदिति॥ ॥वाग्बाहूदरसंयतः॥ ॥वाक्संयमो वृथाप्रलापविहारः। बाहुसंयमो लोष्टमर्दनाद्यभावः। उदरसंयमो मित
भोजनं॥ ॥नाम गोत्रे गुरोः समानतो निर्दिशेत्॥ ॥आत्मनो नाम गोत्रे गुरोः समानतो निर्दिशेत्। समानतः यथावदपलापरहित
मित्यर्थः। अपरस्त्वाह गुरोर्नाम गोत्रे समानतः सम्यगानतः प्रह्वो भूत्वा निर्दिशेदिति॥ ॥अर्चिते श्रेयसि चैवं॥ ॥अर्चितो लोके पू
जितः श्रेयान् विद्यादिभिरधिकः तयोरप्येवं सम्यगानत इति। अत्र स्मृत्यंतरं। आचार्यं चैव तत्पुत्रं तद्भार्यां दीक्षितं गुरुं। पितरं च
पितृव्यं च मातरं मातुलं तथा। हितैषिणं च विद्वांसं श्वशुरं पतिमेव च। न ब्रूयान्नामतो विद्वान् मातुश्च भगिनीं तथा। अर्चिते श्रेयसि चैत्येवं १

शाठ्यं यच्च यावच्च गुरुणोक्तं तत्सर्वमिति विज्ञाति। तेन शय्यासनादिकमपि तयोः संनिधौ नीचं भवतीति॥ शय्यासनस्थानानि विहाय प्रति
श्रवणं॥ गुरावाज्ञापयति सति प्रतिश्रवणं प्रतिवचनं कुर्वीत स शय्यासनस्थानानि विहायैवाभिगच्छन् कुर्यात्॥ अभिक्रमणं वचनाद
दृष्टेन॥ यदि बहिःस्थितो गुरुरपश्यन्नेव शिष्यं ब्रवीति तदा शिष्येणाभिक्रमणमुपसर्पणं कर्तव्यं न पुनरदृष्टोऽस्मीत्यनादरः कर्तव्यः॥
अधःस्थानासनस्तिर्यग्वातसेवायां गुरुदर्शने चोत्तिष्ठेत्॥ यदा गुरुर्नीचैःस्थानमासनं वाधितिष्ठति तदा स्वयं नोच्चैःस्थानमासीत। तदा गु
रुं दृष्ट्वा चेष्टेत्। तिर्यग्वातसेवायां मूत्रपुरीषोत्सर्गादौ च गुरुं दृष्ट्वोत्तिष्ठेत्। चकारः पूर्वापेक्षया समुच्चयार्थः॥ गच्छन्तमनुव्रजेत्॥ गच्छ
न्तं गुरुमनुगच्छेत्॥ कर्म विज्ञाप्याख्याय॥ यत्किंचिदस्य शिष्यस्य कर्तव्यं तस्य कतिरिदं करिष्यामीत्याचार्यं विज्ञाप्य यत्त्वाचार्योप
यिकमुदकुंभहरणादि तत्स्वयमेव ज्ञात्वा कृत्वा तस्मै कृतमित्याख्याय वर्तितव्यमित्यर्थः॥ आहूताध्यायी॥ गुरुणाहूतः संनिधी
यीत न तु स्वयं चोदयेदिति॥ युक्तः प्रियहितयोः॥ आचार्यस्य तत्प्रियं हितं च तत्र युक्तः तत्परः स्यात्। प्रियं तत्कालप्रीतिकरं हितं कालांतरे
तत्फलं॥ तद्भार्यापुत्रेषु चैवं॥ तस्याचार्यस्य भार्यापुत्राश्च तेषु चैवमाचार्यवद्वर्तितव्यं॥ अस्यापवादः॥ नोच्छिष्टाशनस्नापनप्रसाध
नपादप्रक्षालनोन्मर्दनोपसंग्रहणानि॥ उच्छिष्टाशनं भुक्तशेषाशनं। स्नापनं स्नानीयादिभिः। शिरोंगमर्दनपूर्वकमभिषेकः। प्रसाधन

मलंकरणं पादप्रक्षालनं प्रसिद्धं उन्मर्दनमभ्यंगः शरीरसंवाहनादि उपसंग्रहणं व्यत्यस्तपाणिनेत्यादि पूर्वोक्तं एतानि गुरुभार्या
यां पुत्रेषु न कर्त्तव्यानि अतएवाचार्यैकर्तव्यमिति सिद्धं अथोपसंग्रहणस्य प्रतिप्रसवः विप्रोष्योपसंग्रहणं गुरुभार्या
 यां तत्पुत्रस्य च विप्रोष्य प्रवासं कृत्वा प्रत्यागते न गुरुभार्याणां उपसंग्रहणं कार्यं तत्रापि नेके युवतीनां व्यवहारशब्देन
एके आचार्या युवतीनां गुरुभार्याणां व्यवहारप्राप्तेन षोडशवर्षप्राये पादैरिष्येण विप्रोष्यापि उपसंग्रहणं न कर्तव्यमिति म
न्यंते अशीधन भैक्षचरणं उत्युक्तं तत्राशीधनस्य प्रतिग्रहं व्यवस्थितत्वात् धारणे भैक्षचरणे विधिमाह सार्ववर्णिकं
भैक्षचरणमभिशस्तपतितवर्ज्जं सर्वेषु वर्णेषु भवं सार्ववर्णिकं अभिशस्तान् पतितान् वर्जयित्वा सर्वेषु वर्णेषु भैक्षं चरेत
ध्यं अभिशस्ताः उपपातकिनः आदिमध्यांतेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्वेण भिक्षां देहीति पदद्वयस्यादिमध्यां
तेषु भवच्छब्दः संबुध्यंतः प्रयोक्तव्यः स्त्रीपुंस्त्रीलिंगः ब्राह्मणस्य भवान् भिक्षां देहीति भवति भिक्षां देहीति क्षत्रियस्य भि
क्षां भवन् देहीति भिक्षां भवति देहीति वैश्यस्य भिक्षां देहि भवान् भिक्षां देहि भवतीति आचार्यं ज्ञातिगुरुस्वेष्वलाभे
न्यत्र उक्तः आचार्यः ज्ञातिः पितृव्यादिः गुरुः मातुलादिः स्वमालीयग्रह अन्यत्र भिक्षाया अलाभे आचार्यादिगृहेषु भै

प्रसिद्धं । कामः स्त्रीसंगः । क्रोधः कोपः । लोभो द्रव्याभिलाषः । मोहो हितविवेकशून्यता । वादो वहुलं जल्पः । वादनं वीणादीनां । स्नानं सुखा
र्थमुष्णतोयादिना । अंगधावः प्रक्षालनं । दंतधावनं दंतमलापकर्षणं । हर्षो विमतत्वाभाविचित्तोद्रेकः । गीतनृत्ये प्रसिद्धे । परिवादः पर
दोषकथनं । जयभयहेतुः कांतारप्रवेशादि । इदं हर्षपदादृष्टं ॥ ॥गुरुदर्शने कंठप्रावृत्तावसक्थिकापाश्रयणपादप्रसारणा
नि॥ ॥उरवः पित्राचार्यादयः । तेषां दर्शनयोग्ये देशे कंठप्रावृत्तादीनि वर्जयेत् । कंठप्रावृत्तं कंठप्रावरणं वस्त्रादिना । अवसक्थि
का उरोपादसमारोप्यावस्थानं । अपाश्रयणं कुड्यस्तंभाद्याश्रित्यासनं । पादप्रसारणं प्रसिद्धं । गुरुजनसकाशे विनयसंकोच
नं निषिद्धमित्यर्थः ॥ ॥निष्ठीवितहसितविजृंभितावस्फोटनानि॥ ॥वर्जयेदिति । निष्ठीवितं कंठाच्छ्लेष्मणः सशब्दं बहिर्निःसर
णं । हसितं हासः । विजृंभितं जृंभिका । अवस्फोटं अंगुलीनां सशब्दमुपमर्दनं ॥ ॥स्त्रीप्रेक्षणालंभने मैथुनशंकायां ॥ ॥स्त्री
णां प्रेक्षणं अवयवशोभानिरूपणं । नयादृ । [illegible]छिकदर्शनं । आलंभनं स्पर्शनं । ते अपि वर्जयेत् । मैथुनशंकायामिति वचनाद्वृ
द्धातुरासु स्वयं च तथाविधस्य न दोषः ॥ ॥द्यूतं हीनसेवामदत्तादानं हिंसां ॥ ॥वर्जयेदिति । द्यूतं द्विविधं प्राण्यप्राणिभे
दात् । प्राणिद्यूतं मेषयुद्धादि । अप्राणिद्यूतमक्षक्रीडादि । हीनसेवा हीनस्य सेवा अधोजातिप्रकृतेः हीनाचा[illegible]चादि

ध्ययनानुष्ठानाभ्यां परिगृहीता यावतीत्याख्यातावेत्यत्र वेदशब्दो न विवक्षितः। य एकं वेदमधीते स द्वादश वर्षाणि गुरुकुले ब्रह्मच
र्यं चरेत् प्रतिद्वादशवासर्वेषु यस्तु चतुरो वेदानध्येतुं समर्थः स प्रतिद्वादशप्रतिवेदं द्वादश वर्षाणीत्यर्थः। यथाहापस्तंबः उप
तस्याचार्यकुले ब्रह्मचारिवासोऽष्टाचत्वारिंशद्वर्षाणीति ग्रहणांतं वा यावता कालेनैको वेदो द्वौ त्रयश्चत्वारो वा गृहीतुं शक्या
स्तावंतं कालमिति विद्यांते गुरुरर्थेन निमंत्र्यः विद्यासमाप्तौ गुरुरर्थेन प्रयत्नेन निमंत्र्यः प्रष्टव्यः गुरोरिदं धनमाहराणीति कृ
त्वानुज्ञातस्य वा स्नानं ततउदमाहृत्याचार्याय कं कृत्वा स्नानं कर्तव्यं त्वत्सख कुणे रेवाहमस्मि तोषितो धनेनाऽभिमतेनानुज्ञातस्य वा
स्नानं समावर्तनं कर्तव्यमिति आचार्यः श्रेष्ठो गुरूणां मातेत्येके गुरूणां पित्रादीनां मध्ये उक्तलक्षण आचार्यः श्रेष्ठः स हि
विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म तेनानेकगुरुसमवाये सह प्रथमं पूज्यः एके त्वाचार्यान्माता श्रेष्ठेति मन्यंते तथा च वसिष्ठः उपाध्याया
द्दशाचार्य आचार्याणां शतं पिता पितुर्दशगुणं माता गौरवेणातिरिच्यते आपस्तंबोऽपि माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्या
शुश्रूषा नित्या पतितायामपीति द्विरुक्तिः पूर्ववत् २ इति श्रीहरदत्तकृतायां गौतमीयसूत्रवृत्तौ मिताक्षरायां द्वितीयोध्या
यः २ तस्याश्रमविकल्पमेके ब्रुवते तस्यैवमधीतवेदस्य ब्रह्मचारिणो वक्ष्यमाणाश्चत्वार आश्रमा विकल्पेन त इत्येके आचा

र्या ब्रुवते अन्ये तु समुच्चीयंत इति तत्रापस्तंबः तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीति बुधायत्कर्माणि कामयेत तदारभेतेति य
था ब्रह्मचर्याश्रमममुक्त्वा अत एव ब्रह्मचर्यवान् प्रव्रजतीति बोधायनः मनुना तु समुच्चयो दर्शितः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति सर्वेपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः यथोक्तकारिणं विप्रं नयंति परमां गतिमिति च वेषु
न त्वाश्रमाः ब्रह्मचारी गृहस्थो भिक्षुर्वैखानसः यद्यप्येतो पूर्वमपि ब्रह्मचार्याश्रमी तथापि [illegible] ब्रह्मचारीत्युभयत्र विव
क्षितं भिक्षुः संन्यासी वैखानसो वानप्रस्थः वैखानसप्रोक्तेन मार्गेण वर्तत इति तेनाहि स आश्रमः प्राधान्येन दर्शितः शास्त्रान्तरेषु वैखा
नसस्तृतीयो भिक्षुश्चतुर्थाश्रमः इदं तु क्रमभेदः प्रागुक्ताश्रमेष्वस्य आश्रमिण इत्यत्र वैखानसवर्जनार्थः तेषां गृहस्थो योनिरप्रजननं
त्वादितरेषां तेषां तु चतुर्ष्वाश्रमेषु वर्तमानानां गृहस्थो योनिरुत्पत्तिस्थलं गृहस्थेनैवोत्पादिताश्चतुर्भिराश्रमैरेत्थिक्रियंते गृहस्थव्य
तिरिक्ताश्रमस्थानां प्रजननस्य पुत्रोत्पादनस्य निषिद्धत्वाच्च तत्र शातातपः चंडालाः प्रत्यवसिताः परिव्राजकतापसाः तेषां जातान्यपत्यानि
चंडालैः सह वासयेदिति इदानीमाश्रमधर्मान् वक्ष्यन् प्रथमनिर्दिष्टस्य ब्रह्मचारिण आह तत्रोक्तं ब्रह्मचारिणः तत्र तेषां मध्ये ब्रह्म
चारिणो नैष्ठिकस्य यदुपकुर्वाणकस्योपनयनादि नियम इत्येवं रक्ष्योक्तं तदेवास्याप्युक्तं भवति तत्र विशेषः आचार्याधीनत्वमांतं

गौ० ध० आतमादेहपतनमाचार्यकुलएवतच्छुश्रूषया वर्तेत गुरोः कर्मशेषेण जपेत् आचार्ये प्रकृते गुरुशब्दः पित्रोरपि ग्रहणार्थः तन
आचार्यपितरौ शुश्रूषमाणस्तच्छुश्रूषातिरिक्तकाले जपेत् वेदमधीयीत नतु स्वाधीनो भवेत् ॥ ॥गुर्वभावे तदपत्यवृत्तिस्तदभावे वृद्धे
॥१२॥ सब्रह्मचारिण्यग्नौ वा आचार्ये यावज्जीवमभिहितस्तस्मिन्नसति तदभावे तत्पुत्रे तदभावे वृद्धे विद्यया वयसा चाधिके तस्याभावे तथाभूते सब्र
ह्मचारिणि सब्रह्मचार्यभावे ग्नौ वा कर्तव्या समिदाधानादिभिरग्नौ वृत्तिः एवंवृत्तो ब्रह्मलोकमवाप्नोति जितेन्द्रियः स्पष्टार्थः जितें
द्रियत्वमनुनादयति श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रिय इति उत्तरेषां चैतद
विरोधि उत्तरेषामप्याश्रमाणां अस्मिन्नुक्ते यदविरुद्धं तत्समानं यथा सूनृतादि वर्जनं विरुद्धं यथा भिक्षाचर्यं वर्जितस्य गुरुकु
लवासो वेदस्वाध्यायः सत्यं ब्रह्मचर्यं गृहस्थस्येति अपरा व्याख्या उत्तरेषां चाश्रमाणां धर्मजातमेतस्य द्रष्टव्यं किमविशेषेण न एत
दविरोधि एतदाश्रमधर्माविरोधि न म्लेच्छाशुच्यधार्मिकैः सह संभाषेतेत्येवमाद्यस्यापि भवति बहुवक्तव्यत्वात्क्रमप्राप्तमपि गृ ॥१२॥
हस्थमुल्लंघ्य भिक्षोराह अनिचयो भिक्षुः निचयो द्रव्यसंग्रहस्तद्रहितः स्यात् ऊर्ध्वरेताः उत्तरेषां चैतदविरोधीति जि ६
तेन्द्रियत्वसिद्धेरपि पुनरूर्ध्वरेता इति रेतसः स्खलनं यथा न भवेत्तथा प्रयतेत तेन न तदर्थं ध्रुवशीलो वर्षासु [illegible]नित्यं

ठाभे संचरितव्यं तत्रापि तेषां पूर्वं पूर्वं प्रतिहरेत् तेषामाचार्यादीनां यो यः प्रथमनिर्दिष्टः तं [illegible] तं परिहरेत् अन्यत्रालाभे स्वे गृहे
तत्रालाभे गुरुषु तदज्ञातिषु तत्रालाभे आचार्यगृह इति निवेद्य गुरवे नुज्ञातो भुञ्जीत दूदमानीतं भैक्षं गुरवे निवेद्य तदनुज्ञातो
भुञ्जीत यदि गुरुः स्वयं गृह्णीयात्ततो न्यदाहरेत् असन्निधौ तद्भार्यापुत्रसब्रह्मचारिसद्भ्यः आचार्यसन्निधाने तद्भार्यादिभ्यो
यथासंभवं निवेद्य तैरनुज्ञातो भुञ्जीत वाग्यतस्तृप्यन्नलोलुप्यमानः संनिधायोदकं यावद्भुक्ति वाक्संयमः तृप्यन्नन्नदर्शनेन हृष्य
न् अलोलुप्यमानः अतिस्पृहामकुर्वन् संनिधाय अन्तर्भावितण्यर्थः संनिधाप्येति उदकमुदकभाजनमिति शिष्यशासनप्रका
रमाह शिष्यशिष्टिरवधेन वधस्ताडनं अताडयता गुरुणा मृत्स्नादिभिः शिष्यः शास्यः अशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यां
यदि भर्त्सनादिभिः शासितुमशक्यस्तदानीं रज्ज्वा तन्व्या तनुना वेणुविदलेन वेति इदं द्वन्द्वनिर्देशो ऽपि विकल्पः रज्ज्वा वेणुदलेन वा तनुमा
नवदर्शनात् ताभ्यां दुर्बलाभ्यां ताडयित्वापि शासनीयः अन्येन घ्नन् राज्ञा शास्यः हस्तादिना काष्ठादिना ताडयन् राज्ञा शास्य आचा
र्यः एवं शिष्यस्य गुरुकुलवास उक्तः कियन्तं कालमित्यत आह द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् यद्यप्येकैकस्य वेदस्य बहवः
शाखाः एकविंशतिधा बह्वृचः एकशतं यजुःशाखाः सहस्रवर्त्मा सामवेदः नवधा अथर्ववेद इति तथापि तत्र तत्र वेदे प्रवर

सहशिखया वापयेत् शिखावर्जं वापयेद्वा मुंडः शिखी वेति विकल्पो नैकदंडत्रिदंडग्रहणविकल्पो युक्तः अत्र स्मृत्यंतरं अथ शिख
शिखा नान्यायस्य ज्ञानमयी शिखा स शिखीत्युच्यते विद्वानेतरे केशधारिणः सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः एकदंडं गृही
त्वा तु भिक्षुर्धर्मं समाचरेत् शिखायज्ञोपवीतेन स्यद्वा ज्ञानप्रबोधितः त्रिदंडग्रहणं कृत्वा भिक्षुर्धर्मं समाचरेत् वर्जयेद्बीजवधं
बीजानि व्रीह्यादीनि तेषां वधो मुसलादिनावघातः तं न कुर्यात् तेन तंडुलस्योदनीकरणमप्युपलक्षितं पक्वान्नस्यैव स्यामित्या
दस्य समो भूतेषु हिंसानुग्रहयोः हिंसायामनुग्रहे च भूतेषु समः यो हिनस्ति यो वानुगृह्णाति तत्र तत्र निर्विकार इति अना
रंभी ऐहिकं पारत्रिकं च न कंचिदारंभं कुर्यात् यथापस्तंबः अनीहानमुत्रचरेदिति अथ वैखानसस्याह वैखानसो वने मू
लफलाशी तपःशीलः वैखानसो वानप्रस्थो वने वसन् मूलानि फलानि च पक्वान्यपक्वानि वाश्नीयात्पुनःपदं तपः कायपरि
शोषणं तत्र मूलफलान्यपि स्वल्पमेवाश्नीयादिति श्रामणकेनाग्निमाधाय श्रामणकं नाम वैखानसशास्त्रं तदुक्तेन प्र
कारेणाग्निमाधाय सायंप्रातर्जुहुयादिति शेषः अग्राम्यभोजी मूलफलान्यपि ग्राम्याण्यपि न भुंजीत देवपितृमनुष्यभूत
ऋषिपूजकः वन्यैरेव मूलफलैरहरहः पंचमहायज्ञान्कुर्वीत तत्र मनुः आरण्यविविधैर्मेध्यैः शाकमूलफलेन वा एतानेव

महायज्ञान्निर्वपेद्विधिपूर्वकमिति सर्वातिथिः प्रतिषिद्धवर्जं य एवमुपागच्छंति ते सर्वे स्यातिथयो न पुनर्ब्राह्मणस्यानतिथि
रब्राह्मण इत्ययं नियमोऽस्ति तत्रापि स्तेनपतितादीन्वर्जयेत् प्रतिषिद्धवर्जं वैक्ष्यमप्युपभुंजीत भिक्षा उक्तमार्गस्य ब्राह्मणादयः ते
हृतं मांसं वैक्ष्यं न रथ्युपभुंजीत अपिशब्दो गौणार्थः फलमूलाद्यभावेन रपि वैक्ष्यमिति तत्रापि पंचपंचनखाभ्या इत्यनघातिरिक्तं व
र्जयित्वा प्रतिषिद्धवर्जमिति पदं काकाक्षिन्यायेनोभयत्र संबध्यते न फालकृष्टमधितिष्ठेत् अरण्येऽपि वसन् हलेन कृष्टप्र
देशं नाधिवसेत् ग्रामं च न प्रविशेत् वने वसतोऽपि यादृच्छिकोऽपि ग्रामप्रवेशो निषिद्धः जटिलश्चीराजिनवासाः जटिलः
केशश्मश्रुनखधारी चीरं दर्भादिनिर्मितं वासः अजिनमुत्तरीयं तथा स्मृत्यंतरे व्यवस्थादर्शनात् नातिसांवत्सरं भुंजीत
संवत्सरमतिक्रांतमिति सांवत्सरं तद्यावदेवमपि नाश्नीयात् अत्र मनुः त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितं जीर्णानि चैव वा
सांसि शाकमूलफलानि चेति उक्ताश्रमाणां तेषां विकल्पसमुच्चयावपि दर्शितौ तेषां प्राधान्यं दर्शयति एकाश्रम्यं त्वाचार्याः
प्रत्यक्षविधानाद्गार्हस्थ्यस्य गार्हस्थ्यस्य ३ तुशब्दो विशेष्यवाचीस्तथैव वेदस्मृतीतिहासपुराणेषु गृहस्थधर्मा एवा
ग्निहोत्रादयः प्राचुर्येण विधीयंते ततः सर्व एवाचार्याः गार्हस्थ्यस्यैकस्याश्रम्यं प्राधान्यं मन्यंते तत्राशक्तानां इतराश्रमधर्मावि

गौ० वृ० धीयंते प्रत्यक्षविधानादितराश्रमाणां प्रजनक्षेत्वेपतोपजीव्यत्वात् द्विति किं पारिव्याता ॥ ३ ॥ इति हरदत्तकृतायां गौतमीयसूत्रवृत्तौ
तृतीयोध्यायः ३ गृहस्थधर्मा उच्यंते ॥ गृहस्थः सदृशीं भार्यां विंदेतानन्यपूर्वां यवीयसीं गृहस्थ इति भाविसंज्ञाव्यपदेशः अ
॥१५॥ यावाग्रहस्थस्य ये धर्मास्ते विवाहात्प्रागपि ज्ञातकस्यापि समाना इति प्रदर्शनार्थं जात्या कुलेन च सदृशीं अन्यस्मै वा नाप्रद
त्तां अवरवयसं एवंभूतां भार्यां विंदेतोद्वहेत् असमानप्रवरैर्विवाहः समानएकः प्रवरो येषां तैः सह न विवाहः तद्यथा ह
रितकुत्सपिंगशंखदर्भिमगवानामाङ्गिरसांबरीषयौवनाश्वेति हारितः कौत्सीमोद्वहेत्यादि प्रवरपंच आपस्तंबीये द्रष्टव्यः
ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमात् पितरमारभ्य तद्बंधुवर्गे गण्यमाने सप्तमाच्छिरस ऊर्ध्वंजा
तां कन्यामुद्वहेत् मातरमारभ्य तद्बंधुवर्गे गण्यमाने पंचमाच्छिरस ऊर्ध्वं जातामुद्वहेत् बीजिनश्च सप्तमादूर्ध्वं इति चकारात्तस्मि
धाति यथाक्षेत्रबीजं ध्यो गुरुर्ण्यावादवरं प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति यद्वा समानक्षेत्रविधवां गुरुरवोनिपुंसं ते दृष्टहि बी ॥१५॥
जवीर्यक्षेत्रे सत्यवतीवाक्याद्व्यासो धृतराष्ट्रादीनुत्पादितवानिति यथा हयाज्ञवल्क्यः अपुत्रे पापरः क्षेत्रे नियोगोत्पादितः
सुतः उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः इति तादृक्प्रयमेव तद्बीजिनश्चेति अथ विवाहभेदाः ब्राह्मो विद्याचारित्रबंधुशी

बकृ वचनात् वर्षास्वास्थानमिति ध्रुवशीलः स्यादेकत्रैव तिष्ठेदिति भिक्षार्थी ग्राममियात् भिक्षाकाल एव ग्रामं प्रविशेन्न शेषकालं
देवालयादौ वृक्षमूले वा वसेत् जघन्यमनिवृत्तं चरेत् भिक्षाकाले यद्गृहमनुपपन्याविलंबितं न द्रष्टव्यः स्तदहः प्रविशेत् अ
नुस्मृतः विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेदिति निवृत्ताशीः अधिकभिक्षालाभा
र्थं इहेषामशीर्वादपरो न स्यात् वाक्चक्षुःकर्मसंयतः वाक्संयमो मौनं चक्षुःसंयमः पादविक्षेपप्रदेशादन्यत्र चक्षुषः प्रवर्तनं
कर्मसंयमो भिक्षोश्चोदितकर्मानतिक्रमः अत्र वाक्संयमविरोधेनु स्मृत्यन्तरं धर्मयोगं पथि प्रश्ने स्वाध्यायं च तथैव च भिक्षार्थं दी
ह्विवचनं न निंदतीयतेरवीति कौपीनाच्छादनार्थं वासो बिभृयात् कौपीनमिति गुह्यप्रदेशस्य नाम तदाच्छाद्यते यावता तावदेव
वासो बिभृयात् अधिकं तु प्रावरणादि न बिभृयादिति प्रहीणमेके निर्णिज्य एके मन्यंते तदपि कौपीनाच्छादनं जीर्णं तथान्यैस्त्य
क्तं प्रक्षाल्य बिभृयात् नविप्रमुक्तमोषधिवनस्पतीनामंगमुपाददीत वृक्षलतादीनामंगं फलपत्रादि अविप्रमुक्तं ततोप्रच्युतं
नोपाददीत न गृह्णीयात् स्वयं पतितं तु गृह्णीयादिति न द्वितीयामपर्तु रात्रिं ग्रामे वसेत् यत्र वर्षर्तौ ध्रुवशीलता कात प्र
तु वर्जमित्यान्ययंतरेषु यत्रैकां रात्रिमुषितः तत्र ग्रामे न द्वितीयां वसेत् ग्रामैकरात्रिः स्यादिति मुंडः शिखी वा सर्वाण्येव केशा
कौपीनयुगलं वासः कंथां शीतनिवारिणीं॥ पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहं॥ ४

ऽंयाद्यासुरोधर्मउच्यते स्त्रीमतामितिकत्त्रात्रकन्यायैधनप्रदानमासुरस्यनिबंधनं तथाचस्मृत्यंतरं यासांनाददते शुल्कंज्ञातयोन
सविक्रयः अर्हणंतत्कुमारीणामानृशंस्यात्रकेवलमिति प्रसह्यादानाद्राक्षसः बलात्कारेणकन्यावरणोनिर्जित्ययत्प्रदानंसरा
क्षसोविवाहः असंविज्ञातोपगमनात्पैशाचः सुप्तामत्तांप्रमत्तांवायत्रविश्रंभमानामुपसंगम्यतेसपैशाचोविवाहः एवमष्टौविवा
हाउक्तास्तेषु चत्वारोधर्म्याः प्रथमाः आदितश्चत्वारोविवाहाः सर्ववर्णानांधर्म्याः धर्मादनपेताःप्रशस्ताभवंति षडित्येके ए
केस्मृतीतःषट्धर्म्याइत्याहुः गांधर्वासुरयोरथमार्दनपेतत्वमिच्छंति क्रमविवाहेक्षत्रियादिषुस्त्रीषुब्राह्मणादिभ्योजातानांपुत्राणांशा
स्त्रेषुसंकेतितान्संज्ञाभेदानाह अनुलोमानंतरैकांतरद्व्यंतरासुजाताःसवर्णांबष्ठोग्रनिषाददौष्यंतपारसवाः ब्राह्मणस्यानंतरा
क्षत्रियातस्यांजातःसवर्णः। क्षत्रियस्यवैश्यातस्यांतस्मादंबष्ठः वैश्यस्यशूद्रातस्यांतस्मादुग्रः ब्राह्मणस्यैकांतरावैश्यातस्यांतस्मान्नि
षादः क्षत्रियस्यशूद्रातस्यांतस्माद्दौष्यंतः ब्राह्मणस्यद्व्यंतराशूद्रातस्यांतस्मात्पारसवः प्रपंचोजातिनिर्णयस्यस्मृत्यंतरेद्रष्टव्यः प्रा
तिलोम्येनजातानाह प्रतिलोमाःसूतमागधायोगवक्षत्तवैदेहकचंडालाः अनंतरैकांतरद्व्यंतरासुजातानांक्रमेणानुवर्तंते क्षत्रियस्या
नंतराब्राह्मणीतस्यांतस्मात्सूतः वैश्यस्यक्षत्रियातस्यांतस्मान्मागधः शूद्रस्यवैश्यातस्यांतस्मादायोगवः वैश्यस्यैकांतराब्राह्मणीतस्यांत

स्मात्क्षत्ता शूद्रस्यक्षत्रियातस्यांतस्माद्वैदेहः शूद्रस्यद्व्यंतराब्राह्मणीतस्यांतस्माच्चंडालइति अन्येषांमतेनतेषामेववृत्तिवर्णसंग्रस
संज्ञाभेदानाह ब्राह्मण्यजीजनत्पुत्रान्वर्णेभ्यआनुपूर्व्याद्ब्राह्मणसूतमागधचंडालान् स्पष्टोर्थः अत्रानुपूर्व्यग्रहणंवर्ण
क्रमविवक्षापरं नत्वनुलोमपरं तेभ्यएवक्षत्रियामूर्धावसिक्तक्षत्रियधीवरपुल्कसान् तेभ्यएववैश्याभृज्जकंठमाहिष्यवैश्य
वैदेहान् पारसवयवकरणशूद्रान्शूद्रेत्येके एकेस्मिन्नेतरुत्पत्तिक्रमेण ब्राह्मण्यजीजनदित्यारभ्य ब्राह्मणीक्षत्रियावैश्याशूद्रा
सुब्राह्मणादिवर्णेभ्यःक्रमेणजातानांसंज्ञाभेदान्मन्यंते वर्णांतरगमनमुत्कर्षापकर्षाभ्यांसप्तमेपंचमेवाचार्याः मन्यंतइ
तिवाक्यशेषः तेषामेवासवर्णादीनामनुलोमजातानामुत्कर्षेणपित्रद्वारासप्तमपुरुषादुत्कृष्टवर्णांतरप्राप्तिर्भवतिअपकर्षेणमा
तृद्वारापंचमपुरुषादपकृष्टवर्णांतरप्राप्तिर्भवति तद्यथा ब्राह्मणेनोढायांक्षत्रियायामुत्पादितासवर्णा सापिब्राह्मणेनोढातस्यामु
त्पादितान्यैवमासप्तम्याः सप्तमीतुब्राह्मणेनोढायदपत्यंसूतेतत्ब्राह्मणजातीयमेवभवति एवंब्राह्मणेनक्षत्रियायामुत्पादितःसवर्णः
पुत्रःसोपिक्षत्रियायामित्येवमापंचमात् पंचमस्तुक्षत्रियायांयदपत्यमुत्पादयतितत्क्षत्रियजातिमेवप्रभवतिविकल्पश्चैववार्यः
तत्रापिवर्णांतरगमनेवृत्तस्याध्यायबाहुल्यस्यसतिपंचमत्कृष्टंभवति हीनवृत्यापंचमेनापकृष्टंप्रयतीति एवंक्षत्रियस्यवैश्यायां वै

गो०६०

१६ यस्य शूद्रायामपि दृष्टं स्पष्टं तत्र जातानां च चातुर्वर्ण्यमनंतरेण अनुलोमजातानां सवर्णत्वमंबष्ठादीनामपि उत्कर्षापकर्षाभ्यां
मन्योन्यं वर्णान्तरगमनं भवति तद्यथा सवर्णेनोढायामंबष्ठ्यामुत्पादिता दुहिता पुनः सवर्णेनोढा येन तस्यामप्युत्पादिता सवर्णेनेत्या
सप्तमात् सप्तमी तु सवर्णेनोढा यदपत्यमुत्पादयति स सवर्ण एव भवति एवं सैवांबष्ठेनोढायां दुहितरमुत्पादयेदंबष्ठेनेति सप्तमी त्वंब
ष्ठेनोढा यदपत्यमुत्पादयति सोंबष्ठ एव भवति एवमंबष्ठयोरपि द्रष्टव्यं प्रतिलोमास्तु धर्महीनाः प्रतिलोमजाः सूतादयो धर्म
हीना उपनयनादिहीनाः तत्र क्षत्तस्यैकस्योपनयनमानंतर्यशास्त्रांतरे अंगीकृतं शूद्रायां च अनुलोम्येनापि शूद्रायामुत्पन्नः पा
रशवादिः धर्महीनः एवं च सवर्णादीनामनुलोमानां सिद्धो धर्मांगीकारः तथा च मनुः स्वजातिजानंतरजाः षट् सुता द्विजधर्मिणः
शूद्राणां तु सधर्माणः सर्वेपध्वंसजाः स्मृताः असमानायां तु शूद्रात् पतितवृत्तिः पतितवद्दर्शनस्पर्शनप्रतिग्रहादौ वर्जनीयः ए
वं च वैश्यात् क्षत्रियायां क्षत्रियाद् ब्राह्मण्यां जातो न पतितवृत्तिः अंत्यः पापिष्ठः शूद्रात् समानासु जनितेषु योंत्यः ब्राह्मण्यां जा १६
तश्चंडालः स पापिष्ठोंत्यंतवर्जनीयः तथा च स्मृत्यंतरं चंडालमार्गो वा लव्यजनात्परिहरेदिति अथ प्रकृतानुविवाहानुक्तानि
पुनंति साधवः पुत्राः ऊढासु जाताः साधुवृत्तयः पुत्रा जनयितुः कुलं पुनंति तत्र विशेषः त्रिपुरुषमार्षात् आर्षविवा

हसंपन्नाय दद्यादाच्छाद्यालंकृतां विद्यावेदविद्या चारित्रं चोदितकर्मानुष्ठानं बंधवो ज्ञातयो मातुलादयश्च शीलं विहितेषु श्रद्धा ए
तैर्गुणैः संपन्नाय वराय युगलेनाच्छाद्य यथाविभवमलंकृतां कन्यां दद्यात् एवंविधस्य विवाहस्य ब्राह्मसंज्ञा संयोगमंत्रः प्राजापत्ये
सहधर्मश्चर्यतामिति प्राजापत्यसंज्ञके विवाहे सहधर्मश्चर्यतामिति प्रदानमंत्रः यद्यपि ब्रह्मादिष्वपि सहधर्मचर्या भवति तथा
पि तादनया सह धर्मश्चरितव्यः नाश्रमांतरं प्रवेष्टव्यं नापि स्त्र्यंतरमुपयंतव्यमिति मंत्रेण समयः क्रियते एष ब्राह्मादेः प्राजापत्य
स्य विशेषः आच्छाद्यालंकृतामिति समानं आर्षं गोमिथुनं कन्यावते दद्यात् आर्षसंज्ञके विवाहे गोमिथुनं स्त्रीपुंसरूपं कन्या
वते दद्यात् वस्तुतः धर्मकञ्चित् आच्छाद्यालंकृतामिति समानं अंतर्वेद्यृत्विजे दानं दैवोलंकृत्य अंतर्वेदि दैवे यज्ञे दक्षिणाकाले च
ऋत्विजे कर्म कुर्वते यदलंकृत्य कन्यायाः दानं स दैवो विवाहः आच्छाद्यालंकृतामिति प्रकृते पुनरलंकृत्येति वचनं वरस्यापि कुंडली
यकादिभिरलंकारार्थं इच्छंत्याः स्वयं संयोगो गांधर्वः इच्छंत्या वध्वा वरस्येच्छतः संयोगो गांधर्वो विवाहः स्वयमिति वचनाद्गुरे
व च्छागम्यते वित्तेनानतिः स्त्रीमतामासुरः यत्र स्त्रीमती कन्या [illegible] तां पित्रादीनां वित्तेन धनप्रदानेनानतिरावर्जनं क्रियते स आ
सुरो विवाहः अत्र याज्ञवल्क्यः आसुरो द्रविणादानादिति मनुश्च ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः कन्याप्रदानं स्वा

कः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छति भ्रूणहत्यामवाप्नोति गर्भं प्राप्तं विनाशयन्निति स्मृत्यंतरं च ऋतुस्नातां तु यो भार्यां सन्निधौ नोप
गच्छति तस्यां रजसि तं मासं पितरस्तस्य शेरत इति अयं तु रागतः प्राप्तत्वे सत्यपि गमने प्रत्यवायस्मरणाद्विधिरेव भवति ऋतावेवोपयादुपया
देवेति कस्यचिन्मते न नियमश्च भवति आचार्यस्तु परिसंख्यानं च प्रतिपादयति सर्वत्र वा प्रतिषिद्धवर्जं सर्वेषु वा कालेषूपयाद्दारान्
ऋतौ त्वप्रतिषिद्धदिवसान् वर्जयित्वा यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति वसिष्ठकाममाविजनितोः संभवामेति यद्यप्यात्मनो
जितेंद्रियत्वे सत्यपि धर्मदाराः सर्वदा रक्षणीया इति स्मर्यते अप्रमत्ता रक्षत तंतुमेनमाव क्षेत्रे परबीजानि वाप्सुरिति अथ पंचमहायज्ञाः
देवपितृमनुष्यभूतर्षिपूजकः अत्र पूजकशब्दो देवादिषु संबध्यते द्वंद्वात्परः श्रूयमाणः प्रत्येकमभिसंबध्यत इति गृहस्थो नित्यं
देवादिपूजकः स्यात् तत्र देवपूजा वैश्वदेवाख्यो होमः अग्निकार्यं वा पितृपूजा मनुराह एकमप्याशयेद्विप्रं पित्रर्थं पांचयज्ञिके न चैवा
त्राशयेत्कंचिद्वैश्वदेवं प्रति द्विजमिति दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाहरन्निति च मनुष्यपूजा
जातिथिपूजा भूतपूजा बलिहरणं ऋषिपूजा ब्रह्मयज्ञः ऋषियज्ञो ब्रह्मयज्ञ इति पर्यायः न च प्रतिपाद्यते अत्र कर्मानि विवक्षितः ब्रह्मयज्ञस्व
नित्यस्वाध्यायः बहुव्रीहिरयं तत्प्रकारश्च ब्रह्मयज्ञेन यक्ष्यमाण इत्यारभ्य तैत्तिरीयके अभिहितः अत्र नित्यशब्दाद्ब्रह्मयज्ञव्यति

रिक्तकालेऽपि यथावसरमधीयीतेति दर्शितं पितृयज्ञस्तु पितृभ्यश्चोदकदानं यथाह मनुः पितृभ्यो नित्यमुदकं दद्यात् अन्यद्वा
न्नफलमूलादि यथोत्साहं यथाशक्ति दद्यात् अन्नं च काशाचिन्न्यं देवर्षिगणां पितॄणां ... कर्तव्यमिति दर्शितं अत्र मनुर्ब्रह्मचारिणं प्रकृत्या
ह नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणमिति कात्यायनः देवतानां पितॄणां च जले दद्याज्जलांजलीन् असंस्कृतप्रमीतानां स्थले द
द्याज्जलांजलीमिति भृगुः नोदके नु न पात्रे वा न क्रुद्धो नैकपाणिना नोपतिष्ठति तत्तोयं यद्भूम्यां न प्रदीयते उशनाः आपो देवगणाः स
र्वे आपः पितृगणाः स्मृताः तस्मादप्सु जलं देयं पितॄणां हितमिच्छतामिति भृगुः प्रकारांतरमाह नाभिमात्रे जले स्थित्वा चिंतयन्नूर्ध्वमान
सः आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिं त्रिस्त्रींजलिमाकाशे क्षिपेत्ततः उत्क्षिप्योत्क्षिप्य क्षिपेद्वारि ... दक्षिणामुखः इति
देवयज्ञस्याग्निकार्यरूपत्वादग्निपरिग्रहणकालं तावदाह ॥भार्यादिरग्निर्दायादिर्वा॥ भार्याशब्देन विवाहो लक्ष्यते यस्मिन्नग्नौ भा
र्योद्वाहः क्रियते तमग्निमारभ्य वा यस्मिन्नहनि पितृभ्रात्रादिभिर्दायविभागः क्रियते तदहरारभ्य वा सायमुपक्रममग्निं परिचरेत् दायविभागात्पूर्व
मपि तु ज्येष्ठभ्रातुर्जीवतो ... जीवतो न प्रत्यवायः तस्मिन् गृह्याणि कर्माणि ॥ तस्मिन्नेव परिगृहीतेऽग्नौ गृह्यमनुष्यभूतानि पुंसव
नादीनि कर्माणि कर्तव्यानि देवपितृमनुष्यभूतयज्ञा स्वाध्याया यश्च बलिकर्म ॥ तस्मिन्नित्यनुवर्तते तत्र देवयज्ञस्याग्निसंबंधः प्र
सिद्धः पितृमनुष्यभूतयज्ञानां तु तदर्थमग्न्यस्मिन् गृह्याग्नावुपयुज्यत इति ब्रह्मयज्ञस्य संबंधः उशनसा पक्षे दर्शितः अग्निसमीपे इत्येके

गौ० सू०

१८ यमिति अपरिगृहीताग्नेरपि पंचमहायज्ञविधानाद्देवे लौकिकेग्नौ कर्तव्याः अथ वैश्वदेवप्रयोगमाह अग्नावग्निर्धन्वंत
रिर्विश्वे देवाः प्रजापतिः स्विष्टकृदिति होमः अग्रतो जुहोतीति चोदनाः स्वाहाकारप्रदाना इत्यापस्तंबस्मरणाद्धोमशब्देन स्वाहाकार
कृतः आग्न्यादिभिः स्वाहाकारांतैर्मंत्रैर्जुहुयात् स्विष्टकृच्चाग्न्युपपदः स्विष्टकृत् होममंत्रादेवाग्निसिद्धावपावितिबचनं बलिहरण
मनुमौनं कर्तव्यमिति विनियमार्थं तस्मात् अग्नये नमः स्वाहाकारो बलिहरणेपि सिद्धो भवति तथा चाश्वलायनः स्वाहेत्यथ बलि
हरणमिति आपस्तंबीयानां स्वाहाकारांता एव मंत्राः परिपठिताः अथ भूतयज्ञे बलिहरणमाह दिग्देवताभ्यश्च यथास्वं यस्या
देवताया या दिक् तस्यां दिशि तस्यै देवतायै बलिर्हर्तव्यः इंद्राय स्वाहेति प्राचीप्रभृति पर्यंतं प्रागादिषु प्रदक्षिणं कर्तव्यं द्वार्षु मरुद्भ्यः ॥
गृहस्य द्वारस्य द्वारस्तंभयोः मरुद्भ्यः स्वाहेति बलिहरणं गृहदेवताभ्यः प्रविश्य अंतः प्रविश्य गृहदेवताभ्यः स्वाहेति ब
लिहरणं प्रविश्येति वचनात् बाह्यस्थितेन न कर्तव्यं ब्रह्मणे मध्ये अद्भ्य उदकुंभे गृहस्य मध्ये ब्रह्मणे स्वाहेति ब १८
लिर्हर्तव्यः दिग्देवताभ्यश्चेति चकारात् पृथिवी वायुः प्रजापतिः विश्वे देवा इति समुच्चयो देवताभ्यो ब्रह्मणानंतरं बलिर्हर्तव्यः
आकाशाय स्वाहेत्यंतरिक्षे बलिरुत्क्षेप्तव्यः विश्वेभ्यश्च देवेभ्यो बलिमाकाश उत्क्षिपेत् दिवाचारिभ्यो भूतेभ्यो नक्तंचारिभ्य

होढायां जातः पुत्रस्त्रीन् पुरुषान् पुनाति नरकादुद्धरंति दशादैवाद्दशैव प्राजापत्यात् तत्र पक्षद्वयगतमपि उपसमस्तमपि पुरुषत्र
यमत्र दशशब्देन संबध्यते एवकारो निर्धारणपरः दश पूर्वान् दशापरानात्मानं च ब्राह्मीपुत्रो ब्राह्मीपुत्रः ४ ब्रह्मविवाहेनो
ढा ब्राह्मी तस्यां जातः पित्रादीन् दश पूर्वान् परान् भविष्यः पुत्रादींश्च दश आत्मानं चैकविंशं पुनातीति तस्माद्ब्राह्मो विवाहः प्रशस्त
तमः इति श्रीहरदत्तकृतायां गौतमीयधर्मसूत्रवृत्तौ मिताक्षरायां चतुर्थोध्यायः ॥ ४ ॥ अथ गर्भाधानकालं प्रस्तौति ऋ
तावुपेयात् रजोदर्शनादारभ्य षोडशाहोरात्राः ऋतुः स्त्रीणां गर्भग्रहणकालः तत्रोपगच्छेद्भार्यां तत्रापस्तंबीये विशेषः च
तुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां प्रजानिःश्रेयसमृतुगमन इत्युपदिशंति मानवे तु ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षो
डश स्मृताः चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः तासामाद्याश्चतस्रस्तु निंद्यैकादशी च या त्रयोदशी च शेषाः स्युः प्रशस्ता द
श रात्रयः अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विज इति याज्ञवल्क्ये तु एवं गच्छन् स्त्रि
यं क्षामां मघां मूलं च वर्जयेदिति युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु इति च तदिह पुत्रकामस्य युग्मास्वित्यादि तासु सर्वथापि गच्छेत्
इतरासु युग्मासु इति मनुस्मृतिवचनादिति तानियमात् परिहृत्य गच्छन् सुतं पुत्रं जनयति ऋतुकालादन्यत्रापि तावदुपेयात् प्रत्यवेयादिति तथा चरकः

गौ०८९०

विषयेवश्यंकर्तव्यं अधीतवेदस्यदक्षिणार्थंगुर्वर्थं निवेशौषधार्थी निवेशो विवाहः सचप्रथमस्तदर्थं औषधार्थं रुग्णः तस्यभेषजार्थं
वृत्त्यातदहर्जीवनेनहीनोवृत्तिक्षीणः यक्ष्यमाणोयज्ञंकरिष्यन् अध्ययनाध्वसंयोगः अध्ययनेनसंयोगोयस्यसोध्ययनसंयोगः अ
ध्वनासंयोगोयस्यसोध्वसंयोगः बहुव्रीहिः वैश्वजितः कृतविश्वजिद्यागः सर्वस्वदानेननिर्द्रव्यः एतैर्याचितोवश्यंहिरण्यादियथाशक्तिदद्या
त् अददत्प्रत्यवेयादिति बहिर्वेदिग्रहणान्नदीक्षितविषयमिदं अन्तर्वेदि अन्येभ्योपिदेयं भिक्षमाणेषुकृतान्नमितरेषु इत
रेषुकृतव्यतिरिक्तेषुभिक्षमाणेषुकृतान्नंपक्वान्नमवश्यंदेयं द्रव्यान्तरदानेनदोषः कृतान्नविषयेपिवसिष्ठः अव्रतास्त्वनधीया
नायत्रभैक्षचराद्विजाः तंग्रामंदण्डयेद्राजाचोरदण्डभ्रान्तोहिसइति अथदानापवादः प्रतिश्रुत्याप्यधर्मसंयुक्तेनदद्यात् दास्या
मीतिप्रतिश्रुत्याप्यधर्मसंयुक्तविषयेनदद्यात् यदितेनद्रव्येणाधर्मसंयुक्तंवेश्यागमनादयंकरिष्यतीतिजानीयात् अधर्मसंयु
क्तइतिवचनादन्यत्रप्रतिश्रुतमदददत्प्रत्यवेयादितिदर्शयति प्रतिश्रवणविषयेविशेषमाह क्रुद्धहृष्टभीतार्तलुब्धबालस्थवि
रमूढमत्तोन्मत्तवाक्यान्यनृतान्यपातकानि क्रुद्धादीनांवाक्यान्यनृतानिअयथार्थानिअप्यपातकानिनपापंजनयंति क्रुद्धः
क्रोधाविष्टः हृष्टोहर्षाविष्टः भीतोभयाविष्टः एतेषांगुणांतरैराविष्टत्वात्तद्वाक्यमप्रमाणंतस्मात्प्रतिश्रुत्यादानेपितेषामदोषः

अथगृहस्थस्यपूर्वभोज्यानाह भोजयेत्पूर्वमतिथिकुमारव्याधितगर्भिणीस्ववासिनीस्थविरान्जघन्यांश्च अतिथिर्वक्ष्यमाणः कु
माराःबालाः व्याधिताः संजातव्याधिः गर्भिण्यःप्रसिद्धाः स्ववासिन्योदुहितरोभगिन्यश्च स्थविरावृद्धाः जघन्याःपरिचारकादयः
एतानात्मनःपूर्वंभोजयेत्पश्चात्स्वयंभुंजीत जघन्यानांपृथक्पदत्वंतेषामानंतर्यसूचनार्थं आचार्यपितृसखीनांतुनिवेद्यपच
नक्रिया यदिभोजनकालेआचार्यादयआगच्छेयुस्तदासिद्धमन्नंतेभ्योनिवेद्यतदन्नक्रियातदिच्छातःकर्तव्या नतेषुसन्निहिते
षुस्वतंत्रोभवेदित्यर्थः ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थानेमधुपर्कः ऋत्विगादिषुगृहमागतेषुमधुपर्कोदेयः सं
वत्सरेपुनःपूजिताः पूजितास्त्वयदिसंवत्सरात्तुनरागच्छेयुःपुनरपिमधुपर्कोदेयः नार्वागिति यज्ञविवाहयोरर्वाक् संवत्सरा
दर्वागपियज्ञविवाहयोरागतेभ्यस्तेभ्योमधुपर्कोदेयः मधुपर्कविधिर्गृह्योक्तोद्रष्टव्यः राज्ञश्चश्रोत्रियस्य श्रोत्रियस्यैवतोराज्ञश्चै स
वंमधुपर्कोदेयः अश्रोत्रियस्यासनोदके अश्रोत्रियस्यराज्ञःआसनोदकमात्रेणपूजनंनमधुपर्कः श्रोत्रियस्यतुपाद्यमर्घ्यमन्नवि
शेषांश्चप्रकारयेत् तुशब्दोनब्राह्मणंव्यावर्तयति श्रोत्रियस्यब्राह्मणस्यातिथेःपाद्यंपादोदकंअर्घ्यंफलोपहारताम्बूलाद्यन्नविशे
षाःपायसापूपादयः तांश्चप्रकर्षेणकारयेत्समर्थःअसमर्थस्तु नित्यंवासत्कारविशिष्टं यदस्यगृहेनित्यंविद्यमानंतदेवमारभ

गो० वृ० जलादिसंस्कारविशिष्टं साधयेत् मध्यतोन्नदानमेवं देयं साधुवृत्ते यस्त्वतिथिर्विद्याहीनोपि साधुवृत्तो भवति तस्मिन्नुपस्थिते मध्य
मेन संस्कारेणान्नं देयं विपरीते तु तृणोदकभूमिस्वागतमंततः पूज्यानत्याज्यश्च विपरीतो विद्यावृत्तोपि न साधुवृत्तः तस्मिन्निहास्य
नास्तीति भूमिं तृणमासनमुदकं च दद्यात् स्वागतमंततः अनंतरं स्वागतं च प्रयुंजीत संभाषणेन पूजा कर्तव्या अनत्याज्यश्च अत्यंताः
२० पायमापूर्वादिशिष्टक्रमः तदन्यो मध्यमवृत्तिः कर्तव्यः आशाः अशनमित्यावत् शय्यासनावसथानुव्रज्योपासनानि सदृक्श्रेय
सः समानि योतिथिर्विद्यावित्तादिनात्मसदृशो यश्च श्रेयांस्तयोर्द्वयोरप्यात्मना तुल्यानि शयनानि देयानि आवसथो गृहे गृहे
स्थानविशेषः अनुव्रज्योपासनयोरात्मन्यसंभवात्तुल्यत्वं न सिध्यति तेत्रापि कार्यमित्यर्थः अल्पशोपि हीने आत्मनः किंचिद्धीने
यतिथावागते समान्येव शय्यादीनि देयानीत्येके वयं तु ब्रूमः हीनेतिथावागते अल्पशोपि शय्यादीनि देयानि न तु हीन इति कृत्वा
त्यंतलोपः कर्तव्यः अतिथिलक्षणमाह असमानग्रामिकोऽतिथिरैकरात्रिकोधिवृक्षसूर्योपस्थायी असमानग्रामिकोऽन्य २०
ग्रामवासी ऐकरात्रिकः एकां रात्रिं वसतीत्यैकरात्रिकः वृक्षाणामुपरि यदा सूर्यः सोधिवृक्षकालो मध्याह्नः अथवा वृक्षाणामुप
रि सूर्यरश्मयो यदा न भवंति स कालः सायं तस्मिन्काल उपस्थितोतिथिः सर्वथा मान्यः कुशलानामयारोग्याणामनुप्रश्नः ॥

एवं चेति मनुः नक्तंचरेभ्यश्च सायं सायं बलिहरणे यं विशेषः नक्तंचरेभ्यः स्वाहेति बलिर्हर्तव्यः चकारात्पूर्वोक्ताभ्यश्च भवति स्वस्ति
वाच्य भिक्षादानमप्पूर्वं बलिहरणानंतरं भिक्षादानं कर्तव्यं स्वस्ति भैक्षमिति वचनमुक्त्वा भिक्षोर्हस्ते पूर्वमपो दत्वा चेति परिव्राजके विशेषः
भृगुराह यतिहस्ते जलं दत्वा भैक्षं दत्वा पुनर्जलं तद्भैक्षं पर्वतमात्रं स्यात् तज्जलं सागरोपममिति एतद्भिक्षादानमतिथिपूजनाभावे मनुष्ययज्ञः
स्यात् एते पंचमहायज्ञा ब्रह्मयज्ञवर्ज्जं द्विः कर्तव्याः सायं प्रातश्च कस्मात् अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मर
णात् सायं प्रातर्भूतमित्युक्तमित्यादि द्राह्यायणसूत्रवचनाच्च ददातिषु चैवं धर्म्येषु ददातयो दानानि यानि दानानि धर्माणि नस्त्या
दनिमित्तानि तेषु चैवमप्यपूर्वं दातव्यमिति दानप्रसंगात्फलविशेषमाह समद्विगुणसाहस्रानंत्यान्यब्राह्मणब्राह्मणश्रोत्रियवेदपारगे
भ्यः अब्राह्मणक्षत्रियादिः ब्राह्मणो जातिमात्रः श्रोत्रियोधीतवेदः सांगं सकल्पं सरहस्यं चाधीतवेदो वेदपारगः येभ्यो दत्तं यथाक्रमं
समद्विगुणसहस्रानंत्यं च फलं ददाति तथा च मनुः सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे सहस्रं श्रोत्रिये विद्यादनंतं वेदपारग इति दा
नप्रसंगाद्यत्राकम्प्यं देयमदाने च प्रत्यवायस्तद्विषयमाह गुर्वर्थनिर्वेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु
द्रव्यसंविभागो बहिर्वेदि यज्ञे दक्षिणाकाले सदस्येभ्यो यद्दानं न तदंतर्वेदि ततोन्यत्र बहिर्वेदि द्रव्यसंविभागो हिरण्यादेर्दानं तद्गुर्वर्थादि

श्वशुरादयः पूर्वजान्येष्ठभ्रातरः विद्यागुरवश्चाचार्योपाध्यायादयः न गुरवः आचार्यादयः तद्विषयं पूर्वसूत्रद्वयमिति सन्निपाते परस्य मात्रादीनां गु
रूपसन्निपाते समागमे परस्योत्कृष्टस्य प्रथममुपसंग्रहणं कार्यं आचार्यः श्रेष्ठो गुरूणां मातेत्येके इत्यनुकर्षः आपस्तंबेन तु आचार्यप्राचार्यसन्नि
पाते प्राचार्यमुपसंगृह्योपसंजिघृक्षेदाचार्यमित्यादिनोक्तः उपसंग्रहणमुक्तमभिवादनविधिमाह स्वनामप्रोच्यायमहमित्यभिवादो ज्ञस
मवाये यः प्रत्यभिवादनानभिज्ञः तेन समवाये स्वनामप्रोच्य व्यावहारिकं प्रसिद्धं नाम प्रोच्याहमयमिति प्रकर्षेणोच्चैरुच्चैरभिवादः कार्यः अ
भिवादेभिवादनं ण्युलादेरवू एवं चार्थात् ज्ञानां ज्ञातृवराणां समवाये अभिवादनक्रमेणायमहमिति स्वनामपुरःसंप्रोच्याभिवादनं कार्यं
हीनवर्णव्यतिरिक्ताभिवाद्यविषयं न यथा अभिवादये हरदत्तशर्माहमस्मि भो इति तत्र प्रत्यभिवादनविधिर्मनुना दर्शितः आयुष्मान्
भव सौम्येति वाच्यो विप्रोभिवादने अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरप्लुत इति अस्यार्थः विप्रश्चाद्ये न ब्राह्मणविषयमिदं अभिवा
दयिता विप्रः आयुष्मान् भव सौम्येति वाच्यः तस्य नाम्नोन्ते पूर्वाक्षरप्लुतो अकारश्च वाच्यः पूर्वाक्षरप्लुत इत्यकारस्य विशेषणं यस्मात्पूर्व
मक्षरं प्लुतरूपं स तथोक्तः अक्षरमित्यचोभिधानं अकारात्पूर्वो योच् स प्लुतो वाच्यः तेन व्यंजनव्यवधानेपि भवति आयुष्मान् भव सौम्य ह
रदत्ता३अ व्यंजनव्यवधाने न यथा आयुष्मान् भव सौम्य अग्निवी३र् दृश्यते प्रयोगः वसिष्ठस्तु संध्यक्षरे विशेषमाह आमंत्रिते योन्त्यः

स्वरः स्तूयते संध्यक्षरमप्रगृह्यमाइआवं वा पद्यते इति एचोप्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ इति वैय्याकरणाः तत्रांते अका
रप्रयुक्ते तयोर्यवौ विसंहितायामिति यकारवकारो आयुष्मान् भव सौम्येपिनाकपाणा३इ इति विष्णा३उवति प्रयोगः अज्ञसमवाय इति प
क्षेनायमभिवादनप्रकारः तत्स्मृत्यंतरं अविद्वांसः प्रत्यभिवादे नाम्नायेन प्लुतिं विदुः कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेदिति यथा
स्त्रीशूद्रप्रकारं विना नादात्विकेन देशभाषादिना येन केनापि शब्देनाभिवादनं तद्गतेष्वपि भवति अभिवादनमिति सामान्योपलक्षणं प्र
कारवर्जितस्य स्त्र्यादिप्रयुक्तस्याप्यभिधानात् अभिवादनप्रकारोत्यापस्तंबः दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोभिवादयीत उरः
समं राजन्यो मध्यसमं वैश्यो नीचैः शूद्र इति स्त्रीपुंयोगेभिवादतो नियममेके स्त्रीपुंयोगे जायापतिसमवाये अभिवादः सार्वविभ
क्तिकः तथा च अभिवादने प्राप्ते अनियममेके मन्यंते यद्यपि भर्तुः प्रत्यभिवादनं नास्ति तथापि तं अभिवादये भार्यायां नियमं नेच्छंति अभिवाद
ये अहमयमित्यादिकं मा नियमस्तं नेच्छंति सामान्याभिवादनमात्रमेव एवं च भार्यया भर्तुरहरहर्नमस्कारः कार्यः एकदेशनिवचनात् एत
स्य पक्षे नियममेव नाविप्रोष्य स्त्रीणां ममातृपितृव्यभार्याभगिनीनां समवायेन्वहमित्यस्यापवादोयं मातृपितृव्यभार्याभ
गिनीव्यतिरिक्तानां स्त्रीणामविप्रोष्य संग्रहणमभिवादनं च न कार्यं किं तु विप्रोष्य प्रत्यागमनमेव कार्यं मात्रादीनां त्वविप्रोष्यापि प्रत्यहं ।

गौ०ध०

॥२२॥ तथा च स्मृत्यंतरं उपसंग्रहणं कुर्याद्भगिन्यामातुरेव च तथा पितृव्यभार्याणां समवायेन्व हंति नरति नोपसंग्रहणं भ्रातृभार्याणां श्व-
श्रूश्च विप्रोष्य प्रत्यागते नाप्यासामुपसंग्रहणं न कार्यं अभिवादनं तु भवत्येव तत्रापि न गुरुस्थानीयानां मातुलान्यादीनां उपसंग्र-
हणमन्यासामभिवादनमिति ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानमनभिवाद्याः तथान्यः पूर्वः पौरोऽशीति-
कावरः शूद्रोऽप्यपत्यसमेन यथा ऋत्विगादयः प्रत्युत्थेया नाभिवाद्याः तथायमपि अन्यस्तेभ्यो न्यः पूर्वो वयसाधिकः पौरः पुरवासी
वयसाधिकेति पुरवासादपकर्ष उक्तः अशीतिरवाशीतिकान्तयावरो अशीतिकावरः अन्यूनाशीतिक इत्यर्थः एवंभूतः शूद्रोऽप्यपत्यसमेन
प्रत्युत्थेयो नाभिवाद्यः अपत्यसमेनेत्यं तयवीपत्नादिशिना शूद्रग्रहणमवरवर्णोपलक्षणं तेन शूद्रस्थितिभिरपि वैश्याद्याभ्यां क्षत्रियो
ब्राह्मणेनैवेति सिध्यति अवरोऽप्यार्यः शूद्रेण न्यूनाशीतिकेन शूद्रेणावरोऽप्यार्यः यवीयानप्यार्यः त्रैवर्णिकः प्रत्युत्थेयो नाभिवाद्यः
अत्रापि शूद्रग्रहणमवरवर्णोपलक्षणं तेन शूद्रेण त्रयो वर्णा वैश्येन द्वौ क्षत्रियेण ब्राह्मण इत्यवरवयसः प्रत्युत्थेया नाभिवाद्या इति ॥२२॥
सिध्यति नाम तस्य वर्जयेत् अस्येत्यत्र वीप्सालोपो द्रष्टव्यः अस्यास्योत्कृष्टस्यापकृष्टेन नाम न वक्षीयात् किंत्वौपचारिकं नाम गृह्णीत
राज्ञश्चापः प्रेष्यः अनपोऽश्रोत्रियः प्रेष्यः प्रेष्यकरः स उत्कृष्टवर्णो ब्राह्मणोऽपि राज्ञोऽभिषिक्तस्य नाम वर्जयेत् भोभवन्निति वयसः समा

ब्राह्मणस्य श्रुतिवर्णेषु पथ्यादिसंगतेषु कुशलादीनामानुपूर्व्येण प्रश्नः कर्तव्यः अपि कुशलमायुष्मन्निति ब्राह्मणः प्रष्टव्यः अप्यनामयं तत्र भवत इति क्षत्रि-
यः अप्यरोगा भवन्तीति वैश्यः अत्यं शूद्रस्य कुशलादिपदत्रयं तत्र शूद्रस्य प्रयोक्तव्यमप्यरोगोऽसीति ब्राह्मणस्यानतिथिरब्राह्मणः अब्राह्मण-
क्षत्रियादिर्ब्राह्मणस्यातिथिर्न भवति पूर्वोक्ता अतिथिधर्मा न प्रयोज्याः केवलमुदकान्नदानादि नांगीकर्तव्यः यज्ञे संवृत्तश्चेत् यज्ञकाले आहूत-
श्चेदतिथिवत्पूज्यः तत्रापि भोजनं तु क्षत्रियस्योर्ध्वं ब्राह्मणेभ्यः तस्यातिथिपक्षेऽपि ब्राह्मणेषु भुक्तवत्सु पश्चाद्भोजनं देयं अन्यान्भृत्यैः
सहानृशंस्यार्थमानृशंस्यार्थं अन्यान् शूद्रादीनतिथिकाले आगतान् भृत्यैर्दासकर्मकरादिभिः सह सति विभवे भोजयेत् यद्यपि तेषामतिथि-
त्वं न भवति तथाप्यानृशंस्यार्थं नृशंसमाप्रत्यक्षकोऽर्थं तत्राहित्याय आनृशंस्यं परो धर्म इत्यानृशंस्यमपि धर्म एवेति ॥ इति श्रीहरदत्तविरचितायां
गौतमीयधर्मसूत्रवृत्तौ मिताक्षरायां पञ्चमोऽध्यायः ॥ ५ ॥ उक्तातिथिपूजा अन्येषामपि पूजाप्रकारमाह पादोपसंग्रहणं समवाये न्वहं
वक्ष्यमाणानां मात्रादीनां समवाये संगमे प्रतिदिनं पादोपसंग्रहणं कार्यं व्यस्तपाणिना कार्यमिति पूर्वोक्तप्रकारेण अभिगम्य तु विप्रोष्य
गुरुशब्दः प्रकृतत्वात्तत्रो विप्रोष्य स्वयं विप्रवासं कृत्वा तेषां वा विप्रवासे वा तन्मातृपित्रादयाय यत्र स्थिताः तत्राभिगम्य पादोपसंग्रहणं कार्यमिति
तान्मातृपित्रादीनाह मातृपितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां च मातापितरौ प्रसिद्धौ तद्बन्धवो मातुलमातृष्वसृपितृव्यपितृ-

गौ०वृ०

ब्राह्मणाविभागेन वेदार्थपरिज्ञानं तत्सर्वेभ्यो विज्ञातृभ्यो गरीयो गुरुतरं पूर्वसूत्रे परबलीयासीति अश्रुतं अपरमुपन्यस्तं तद्व्यावृत्यर्थं पृ
थक्सूत्रत्वं कुतः पुनः श्रुतं सर्वेभ्यो गरीय इत्युच्यते आह एतन्मूलत्वाद्धर्मस्य श्रुतेश्च श्रुतमूलमनुष्ठानमनुष्ठानमूलो धर्म इति
॥२३॥ श्रुतेश्चाविच्छिन्नसंप्रदायो मूलं तदधीनं श्रुतस्य गरीयस्त्वं छांदोग्ये प्रतिपादितं ब्राह्मणं चैवं भवति शिशुर्वा आंगिरसो मंत्रकृतां मं
त्रकृदासीदिति मनुरपि अध्यापयामास पितॄन्शिशुरांगिरसः कविः पुत्रका इति होवाच ज्ञानेन परिगृह्य तानिति चक्रि
दशमीस्थानुग्राह्यवधूस्नातकराजभ्यः पथो दानं चक्रि चक्रवत्शकटादि तत्स्थः चक्रिस्थः दशम्यां दशायां स्थितो दशमीस्थ
स्थः अनुग्राह्यो रोगार्तः वधूर्गर्भिणीत्यादिश्च स्नातको विद्याव्रतस्नातकः राजाभिषिक्तः पथि समागमे एतेभ्योऽन्यैः पंथा देयः
इति श्रीहरदत्तकृतायां गौतमीयवृत्तौ मिताक्षरायां षष्ठोऽध्यायः ॥ ६ ॥ श्रुतं तु सर्वेभ्यो गरीय इत्युक्तं विद्याप्राधान्यमुक्तं
सा विद्या ब्राह्मणादधिगंतव्येति प्रथमः कल्पस्तदभावे विद्यायाः अब्राह्मणाधिगंतव्यत्वादापत्कल्पं समाह आपत्कल्पो ब्राह्मणस्या
ब्राह्मणाद्विद्योपयोगः अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश उपयोगो नियमपूर्व
कं ग्रहणं अब्राह्मणः क्षत्रियो वैश्यश्च तस्माद्ब्राह्मणो न विद्योपयोगः कार्यः सत्यापत्कल्प आपद्विधिः ब्राह्मणस्य तु उपलक्षणं तेन क्ष

त्रियस्यापि वैश्याद्विद्योपयोगः कार्य इति सिध्यति आपत्कल्प इत्याध्यायसमाप्तेरधिक्रियते अनुगमनं शुश्रूषा तत्र यावदध्ययनकाल
मनुगमनमेव शुश्रूषा नान्यत्पादसंवाहनादि समाप्ते ब्राह्मणो गुरुः समाप्ते अध्ययने ब्राह्मणो गुरुः याजनाध्यापनप्रतिग्रहाः सर्वेषां याज
नादयो ब्राह्मणस्य वृत्तयस्ता आपदि सर्वेषामनुज्ञायंते न तु ब्राह्मणस्यैवेति अपर आह आपदि सर्वे याजयितव्याः सर्वे अध्याप्याः सर्वतश्च
प्रतिग्राह्यं न तु गर्हादोषोऽस्तीति तथा च मनुः नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् दोषो भवति विप्राणां ज्वलनांबुसमा हि त इति पूर्वः
पूर्वो गुरुः एतेषां याजनादीनां यो यः पूर्वनिर्दिष्टः स स ततस्तस्माद्गुरुर्ज्ञेयः आपदि प्रतिग्रहेण जीवेत्तदसंभवे अध्यापनेन तदसंभवे याज
नेनेति तदलाभे क्षत्रवृत्तिः इदं ब्राह्मणविषयं गर्हितयाजनादेरप्यलाभे क्षत्रवृत्तिराश्रयणीया ब्राह्मणः सेवादिना जीवेदिति आपदि नि
वृत्तायां तु नारदः आपदं ब्राह्मणस्तीर्त्वा क्षत्रवृत्त्या मृतेऽर्जने उत्सृजेत्क्षत्रवृत्तिं तां कृत्वा पावनमात्मनः तदलाभे वैश्यवृत्तिः क्षत्रवृ
त्तेरप्यलाभे वैश्यवृत्त्यापि जीवेद्ब्राह्मणः अत उभयग्रहणं वृत्तिसंकरमा भूदिति क्षत्रियस्य वैश्यवृत्त्युपजीवनं दृष्टपूर्वेण तथा विशिष्टं
तस्यापण्यं तस्य वैश्यवृत्तेर्ब्राह्मणस्यापण्यमविक्रेयं वक्ष्यते तस्येति वचनात्क्षत्रियस्य वैश्यवृत्त्यापि जीवतो वक्ष्यमाणमपण्यं
न भवति गंधरसकृतान्नतिलशाणक्षौमाजिनानि गंधश्चंदनादिः रसः तैलघृतगुडलवणादिः कृतान्नमोदनापूपादि तिलाः प्रसिद्धाः

गौ०वृ० शाणं शाणविकारो गोण्यादयः क्षौमं क्षुमोद्भवः पट्टवस्त्रविशेषः अजिनं चर्मकटादि एतान्यविक्रेयाणि शाणक्षौमयोर्विकारनिषेधात्
प्रकृतेरनिषेधः रक्तं निर्णिक्तं वासः रक्तं लाक्षादिनाकृतं निर्णिक्तं रजकादिनाधौतं एवंभूतं वासः अपण्यं क्षीरं सविकारं दध्या-
दिभिर्विकारैः सह क्षीरमपण्यं मूलफलपुष्पौषधमधुमांसतृणोदकापथ्यानि मूलमार्द्रकहरिद्रादि फलं पूगादि पुष्पं चंपकादि औष-
॥२४॥ धं पिप्पल्यादि मधु माक्षिकं मांसं तृणोदकानि प्रसिद्धानि अपथ्यं विषादि एतान्यपण्यानि रसशब्देन पूर्वमेव निषिध्योपि पुनर्मधुनो
ग्रहणं सर्वथानुवृत्तिरशक्तावपीत्यत्रापि पक्षे निषेधार्थं पशवश्च हिंसासंयोगे पशवो हिंसासंयोगे सौनिकादिभ्यो हिंसार्थेन विक्रेयाः
पुरुषवशाकुमारीवेहतश्च नित्यं पुरुषाः दासादयः वशा वन्ध्या गौः कुमारी वत्सतरी वेहद्गर्भोपघातिनी एते नित्यमपण्याः नित्यमिति
हिंसासंयोगाद्यन्यत्रापि अपर आह नित्यग्रहणात्पूर्वं भूतिलादिष्वनित्यः प्रतिषेध इति तत्र वसिष्ठः कामं वा स्वयमुत्पाद्य तिलान्विक्री-
णीरन्निति भूमिव्रीहियवाजाव्यश्वऋषभधेन्वनडुहश्चैके भूमिरिदं व्रीहियवाजाव्यश्वाः प्रसिद्धाः ऋषभः सेचनसमर्थः पुंगवः अनड्वा- ॥२४॥
न्वोवहनयोग्यो बलिवर्दः एते चापण्या इत्येके मन्यन्ते एकग्रहणाद्वयं त्वनुजानीमः अत्राप्यनाविग्रहणाद्धिंसासंयोगविषयमपरं नियम-
स्तु नि[illegible]भाविनियमः परिवर्तनं तु शब्देन नियमोनुज्ञाप्यत इति तत्र विशेषमाह रसानां रसैः तैलघृतगुडादीनां रसैरेव नियमः कार्यः

समानेहनि जातः वयसा तुल्यो वयस्यः समानेहनि जातः अहःशब्दः संवत्सरवाचकः एकस्मिन्संवत्सरे जातः सो भोभवन्नित्यनयोरन्यत-
रेण शब्देन संभाष्यः दशावर्षवृद्धः पौरः पंचभिः कलाधरः श्रोत्रियश्चावरस्त्रिभिः पुरे वसन्नगुणहीनो दशवर्षवृद्धश्च तत्रापि कलाधरश्च-
तुःषष्टिकलास्वन्यतमया जीवन्पंचभिर्वर्षैर्वृद्धः श्रोत्रियोधीतवेदस्त्र्यब्दकारी महाध्यायी एते सर्वे भो भवन्निति संभाष्याः आपस्तंब-
स्तु सर्वत्राभिवादनमिच्छति दशवर्षं पौरसख्यं पंचवर्षं तु चारणं त्रिवर्षपूर्वं श्रोत्रियोभिवादनमर्हतीति राजन्यवैश्यकर्मविद्याही-
नाः कर्मशब्दः प्रत्येकमभिसंबध्यते राजन्यकर्मविद्वैश्यकर्मा ब्राह्मणोपि राजन्यकर्मणा वैश्यकर्मणा वा जीवन्नित्यं तद्वृद्धोपि भो भवन्निति भा-
ष्यः विद्याहीनश्च वृद्धोपि विद्याधिकेन तथा भाष्यः दीक्षितस्य प्राक्क्रयात् वयस्यविषयमिदं दीक्षितश्च वयस्यः क्रयात्सोमक्र-
यात्प्राक् तथा भाष्यः ततः परं तु भवन्मान्यः उत्तमाश्रमविषये पुनरुक्तनाः येत्रिवर्णात्रिज्ञानः सर्वेषां गुरुर्भवतीति वित्तबंधुकर्मजाति-
विद्यावयांसि मान्यानि परबलीयांसि वित्तादीनां साक्षान्मान्यत्वासंभवात्तद्वन्तो मान्या इत्युपलक्ष्यन्ते वित्तवानाढ्यः बंधुमान्विशि-
दि ष्टैः सोदर्यैर्युक्तः कर्मवान्यथोक्तकारी जातिमानभिजनयुक्तः विद्यावानधीतवेदशास्त्रः वयस्वान्वयसाधिकः एतासद्भावे
नादेतो मान्यः परस्परसमवाये तु परः परो बलीयान् प्रथममान्यः मानोभिवादनादिभिः समानः श्रुतं तु सर्वेभ्यो गरीयान् श्रुतं मने

गौ० वृ० वापि रक्षार्थं शस्त्रमाददीत तदलाभे क्षत्रवृत्तिरिति शस्त्रग्रहणे सिद्धेऽपि पुनरुपादानं प्राप्तवृत्तेः सततनिषेधार्थं अपि शब्दात् पुनर्वैश्यशूद्रौ
राजन्यो वैश्यकर्म २ प्राणसंशये राजन्योऽपि वैश्यकर्माददीत तेनात्मानं रक्षेदिति इति श्रीहरदत्तविरचितायां गौतमीयधर्मसूत्रवृत्तौ मिताक्षरा
॥२५॥ यां सप्तमोऽध्यायः ७ आपद्वृत्तिमाश्रितो यदि तत्रैव रमेत केनासौ निवार्य इत्यत आह द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतः
लोकोऽयं पृथिवी तस्याः लोपश्चात्र द्रष्टव्यः लोके लोके धृतव्रतौ व्रतानां कर्मणां धारयितारौ द्वौ राजा बहुश्रुतश्च ब्राह्मणः तौ सर्वस्य दण्डोपदेशाभ्यां
निवारयितारौ इति तयोश्चतुर्विधस्य मनुष्यजातस्य अन्तःसंज्ञानां चलनपतनसर्पणानामायत्तं जीवनं चतुर्विधस्य मनुष्यजातस्य चातु
र्वर्ण्यस्य अन्तरप्रभवा अनुलोमादयस्तन्मूलत्वात्पृथङ्नोक्ताः अन्तःसंज्ञा वृक्षादयस्तथा चरा विक्षुपर्वताः येषामन्तःसंज्ञानं बहिस्तथा का
तथा च मनुः तमसा बहुरूपेण वेष्टिताः कर्महेतुना अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः इति चलनाः पश्वादयः पतनाः पक्षिणः सर्पणाः
सरीसृपा भुजंगादयः एषां मनुष्यादीनां जीवनं तयो राजब्राह्मणयोरायत्तं तदधीनं राज्ञा तु परिपन्थिभ्यो हादिनाशे तेषां जीवनहेतुरस्त्वेवं कथं ब नि
हुश्रुत इत्यत आह अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यनेन न्यायेन जीवनहेतुः न केवलं जी ॥२५॥
वनमात्रमेव तदधीनं किं तर्हि प्रसूतिरक्षणमसंकरो धर्मः प्रसूतिरभिवृद्धिः दण्डोपदेशाभ्यां यथोक्त कारितायां वृष्ट्यादिकारण

रोगाद्युपद्रवशान्त्या चाभिवृद्धिर्भवति चोरनिग्रहणाद्रक्षणमपि दण्डप्रायश्चित्तोपदेशाभ्यां वर्णानामसंकरोऽसंमेलनमपि हितोपदेशाद्धर्मनिषिद्धसे
वायां दण्डधारणाद्धर्मोऽपि एतत्सर्वं तयोरायत्तं बहुश्रुतस्तु स्वरूपं प्रतिपादयति स एव बहुश्रुतो भवति स एव इति वक्ष्यमाणैर्निर्देशः लोकवे
दवेदांगवित् लोकशब्देन लोकव्यवहारसिद्धाननपदधर्मा उच्यन्ते तेषां वेदाश्चत्वारो ऋग्यजुःसामाथर्वाणः अंगानि षड् व्याकरणं शिक्षाछन्दोवि
चितिर्ज्योतिषं कल्पसूत्राणि निरुक्तमिति तेषां वेदितापाठतोऽर्थतश्च वाकोवाक्येतिहासपुराणकुशलः वेदस्थापस्य प्रयोगिनिकोक्तिप्रत्युक्ति
रूपाणि वाक्यानि यथा कस्विदेकाकी चरति सूर्य एकाकी चरतीत्यादीनि तानि वाकोवाक्यं भारतरामायणादिरितिहासः पुराणं विष्णुपुराणं
शिवपुराणमष्टादशविधं तेषु कुशलः समर्थः तदपेक्षस्तद्वृत्तिः यान्येतानि लोकादीन्युक्तानि तान्युपेक्षत इति तद्वृत्तिस्तदभिरतानां कर्म
णामनुष्ठाता चत्वारिंशता संस्कारैः संस्कृतः चत्वारिंशत्संस्काराणामभिधानादयो वक्ष्यन्ते तैः संस्कृतः त्रिषु कर्मस्वभिरतः इज्याध्ययन
दानानि त्रीणि कर्माणि तेष्वभिरतस्तेषां सातत्येनानुष्ठाता तद्वृत्तिरित्यनेनैव सिद्धे पुनर्वचनमतिशयार्थं षट्सु वा याजनाध्यापनप्रतिग्रहैः
सह षट्कर्माणि तेष्वभिरतः वा शब्देन पूर्वोक्तेष्वनियमः सामयाचारिकेष्वभिविनीतः पित्रादिभिः सम्यक् शिक्षितः स एवंरूपो ब्राह्मणः
षड्भिः परिहार्यो राज्ञा षड्भिर्वक्ष्यमाणैर्वधादिभिः परिहार्यो राज्ञा भवति × पौरुषेयी व्यवस्था समयः तन्मूला आचाराः समयाचारास्तेषु भवाः सामयाचारिकाः २

२ स्मार्तधर्मास्तेष्वभिविनीताः × २

गौ० ८० परिहारो वर्जनं तान्बधादीनाह अवध्यश्चाबंध्यश्चादंड्यश्चावहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्चेति वधस्ताडनं बंधो निगडनं दंडो
ऽर्थापहारः बहिष्कारो ग्रामादिभ्यो निर्वासनं परिवादो दोषसंकीर्तनं परिहारस्त्यागः षडेते बधादय एवंभूते बहुश्रुते ब्राह्मणे सत्यबुद्धिपूर्वापरा
२६ धे राज्ञा वर्ज्या बुद्धिपूर्वस्य तु प्रसंगाभावात् इतिशब्दः प्रकारवाची यच्चान्यदेवंरूपं संभावनादि तदपि वर्ज्यमिति चत्वारिंशता संस्कारैरित्यु
क्तं तानाह गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं समाहारद्वंद्वः गर्भाधानमृतावुपेयादित्यादि
कालनियमेन स्वसूत्रकारोक्तविधानविशेषः गर्भाधानादयः संस्कारास्तत्र गृह्योक्ताः इह तु संस्कारगणनार्थं स्वरूपनिर्देशमात्रं कृतं
चत्वारि वेदव्रतानि एतानि प्रतिवेदं प्रतिशाखं च गृह्योक्तानि स्नानं सहधर्मचारिणीसंयोगः स्नानं समावर्तनं सहधर्मचारि
णीसंयोगो विवाहः पंचानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणां पंचानां देवानां यज्ञास्तेषामनुष्ठानं एतत्पंचमहायज्ञानुष्ठा
नमहरहः कर्तव्यं न तु सकृत् तेन संस्कार इति पंचग्रहणात् चैते पृथक्संस्कारान् पुनः समुदिता एकः संस्कारः एवं चाग्रे वक्ष्यमाणानामष्टा २६
ष्टकादीनां च पाकयज्ञानामनुष्ठानं संस्कार इति तानाह अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः
ऊर्ध्वमाग्रहायण्यास्त्रयो ऽपरपक्षास्तेष्वेकैकस्मिन्नेकाष्टका भवतीति छंदोगाः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्ट

तद्यथा तैलं दत्वा घृतं तथा ह्यमिति रसः समतो हीनतो वेति वसिष्ठः पशूनां च पशूनां चतुष्पदां पशुभिर्नियमः कार्यः न लवणकृतान्न
योः लवणस्य पक्वान्नस्य नियमेऽपि प्रतिषेधः तिलानां च तिलानां च नियमो न कर्तव्यः लवणकृतान्नतिलानां द्रव्यान्तरैर्विनिमयेन प्रदा
नं निषिद्धं समानद्रव्यविषये प्रवृत्त्यसंभवात् समेनाम्नेनानुपक्वस्य संप्रत्ययार्थं समेन समपरिमाणेनामेन तंडुलादिना संप्रत्ययार्थं तादृ
कोपयोगार्थं पक्वान्नस्य नियमः कार्यः मनुस्तु तिलधान्येन तत्समा इति समेन धान्येन तिलानां विनिमयमभ्यनुजानाति अपण्यानि विक्रय
निषेधात्सर्वत्र यावदुपयोगं क्रयनिषेधः स्यात् रसादीनामपि नियमशब्देन प्रदानमेव विवक्षितमन्यथा त्वविद्यमानेन रसान्तरादिद्रव्यस्य
वृत्त्यसंभवात् सर्वथा तु वृत्तिरशक्तावशाद्गुणा उक्तेन प्रकारेण कुटुंबधारणस्यासंभवो ऽशक्तिः तस्यामशक्त्यां सर्वथा वृत्तिः प्रकारवचनेन
पालकेन सर्वत्र प्रकारेण निषिद्धेनाप्यर्जयेत् तत्रापि शौद्रेण कर्मणा न जीवेदिति तदप्येके प्राणसंशये एके त्वाहुः प्राणसंशये स
मिदं तेपि शौद्रं कर्माभ्यनुमन्यन्ते यथाह व्यासः धर्मकामार्थमोक्षाणां प्राणाः संस्थितिहेतवः तान्निघ्नता किं न हतं रक्षता किं न रक्षितमिति तद
र्थं संकराभक्ष्यनियमस्तु नियमो वर्जनं शूद्रवृत्तिस्थितेनापि ब्राह्मणेन तेन शूद्रवर्णेन सहासनगमनसंगमभोजनादि संकरः अभक्ष्यं लशु
नादि तदुभयवर्जनं कर्तव्यं न तु शूद्रवृत्तिरस्मीति यथाकाम्यमिति प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत प्राणसंशयमतिब्राह्म

गौ० ध०

२६

परिहारो वर्जनं तानवधादीनाह अवध्यश्चाबध्यश्चादंड्यश्चावहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्चेति वधस्ताडनं बंधो निगडनं दंडो ध
अर्थापहारः बहिष्कारो ग्रामादिभ्यो निर्वासनं परिवादो दोषसंकीर्तनं परिहारस्त्यागः षड्भिरेतैर्वधादिभिरेवंभूतो बहुश्रुतो ब्राह्मणोऽसत्यबुद्धिपूर्वेऽपरा
धे राज्ञा वर्ज्यो बुद्धिपूर्वस्य तु प्रसंगाभावात् इतिशब्दः प्रकारवाची यच्चान्यदेवंरूपं संभावनादि तदपि वर्ज्यमिति चत्वारिंशत्संस्कारा इत्यु
क्तं तानाह गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं समाहारद्वंद्वः गर्भाधानमृतावुपयादित्यादि
कालनियमेन सूत्रकारोक्तविधाननिषेकः गर्भाधानादयः संस्कारास्तन्नामधेयाः इह तु संस्कारगणनार्थं स्वरूपनिर्देशमात्रं कृतं
चत्वारि वेदव्रतानि एतानि प्रतिवेदं प्रतिशाखं च गृह्योक्तानि स्नानं सहधर्मचारिणीसंयोगः स्नानं समावर्तनं सहधर्मचारि
णीसंयोगो विवाहः पंचानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणां पंचानां देवानां यज्ञास्तेषामनुष्ठानं एतत्पंचमहायज्ञानुष्ठा
नमहरहः कर्तव्यं न तु सकृत्कृतेन संस्कारसिद्धिः पंचग्रहणात्त्वैतेषां पृथक्संस्कारान् पुनः समुदिता एकः संस्कारः एवमेव वक्ष्यमाणानामष्ट

२६

काढीनां च पाकयज्ञानामनुष्ठानं संस्कारा इति तानाह अष्टका पार्वणश्श्राद्धश्श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः
ऊर्ध्वमाग्रहायण्यास्तिस्रोऽपरपक्षास्तेष्वेकैकस्मिन्नष्टका भवतीति छंदोगाः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्ट

तथा अथाते संस्कारास्तथा ग्रामिति रसः समुनोहीननो वेति वसिष्ठः पशूनां च पशूनां चतुष्पदां पशुभिर्नियमः कार्यः नलवणाकृतान्न
योः लवणस्य पक्वान्नस्य नियमेऽपि प्रतिषेधः तिलानां च तिलानां च नियमोऽवकर्तव्यः लवणकृतान्नतिलानां द्रव्यान्तरस्विक्रयेण प्रदा
ने निषिद्धं समानद्रव्यविषये प्रवृत्त्यसंभवात् समेनाम्नेनानुपक्कस्य संप्रत्ययार्थं समेन समपरिमाणेनामेन तंडुलादिना संप्रत्ययार्थे तादादि
कोपयोगार्थे पक्वान्नस्य नियमः कार्यः मनुरुक्त तिलाधान्येन तत्समा इति समेन धान्येन तिलानामपि नियमम्नुजानाति अपण्यानि विक्रय
निषेधात्सर्वत्र यावदुपयोगान् कथं निषेधः स्यात् रसादीनामपि नियमशब्देन प्रदानमेव विवक्षितमन्यथा त्वविद्यमानेन रसान्तरादिद्रव्यस्य
वृत्त्यसंभवात् सर्वथा तु वृत्तिरशक्तौ वशीरूपेण उक्तेन प्रकारेण कुटुंबधारस्यासंभवोऽशक्तिः तस्यां सत्यां सर्वथा वृत्तिः प्रकारवचनेन
वाणुक्तेन सर्वत्र प्रकारेण निषिद्धेनापि संवितु तत्रापि शौद्रेण भवतोनजीवेदिति तदप्य केप्राणसंशये एके सर्वथा प्राणसंशयेम
हेतो पिशुनकर्म मन्यते यथा हव्यासः धर्मार्थकाममोक्षाणां प्राणाः संस्थिते हेतवः तान्निघ्नता किं न हतं रक्षता किं न रक्षितं इति तद
र्णसंकराभक्ष्यानियमस्त्क नियमो वर्जनं शूद्रद्वितीयश्चेन्नापि ब्राह्मणेन तेन शूद्रवर्णेन सहासनगमनसंगमनभोजनादि संकरः अभक्ष्यं लशु
नादि तदुभयवर्जनं कर्तव्यं न तु शूद्रवृत्तिरस्मीति अथयाथाकाम्यमिति प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत प्राणसंशयमिति ब्राह्म

हृष्टादेनावंनएवसंस्काराणानान्यानिस्मार्तकर्माणिकाम्यादीनिचेति अथाष्टावात्मगुणाः वक्ष्यंतइतिशेषः दयासर्वभूतेषुक्षांतिरनसूयाशौचम
नायासोमंगलमकार्पण्यमस्पृहेति आत्मवत्सर्वभूतेषुयद्धितायशिवायच वर्ततेसततंहृष्टः कृत्स्नाह्येषादयास्मृता आक्रुष्टोभिहतोवापिनाक्रोशेन्न
ताडयेत् अदुष्टोवाङ्मनःकायैःसातितिक्षाक्षमास्मृता योधर्ममर्थंकामंवालभतेमोक्षमेववा नद्विष्यात्तंसदाप्राज्ञःसानसूयास्मृताबुधैः द्रव्यशौचंमनः
शौचंवाचिकंकायिकंतथा शौचंचतुर्विधंप्रोक्तंऋषिभिस्तत्वदर्शिभिः यदारंभेभवेत्पीडानित्यमंतेतथात्मनः तद्वर्जयेद्धर्ममपि सोनायासःप्रकीर्तितः
प्रशस्ताचरणंनित्यमप्रशस्तविवर्जनं एतद्धिमंगलंप्रोक्तंमुनिभिस्तत्वदर्शिभिः आपद्यपिचकष्टायांभवेद्दीनोनकस्यचित् संविभागरुचिश्च
स्यात्तदकार्पण्यमुच्यते विवर्जयेदसंतोषंविषयेषुसदानरः परद्रव्याभिलाषंचसास्पृहाकथ्यतेबुधैः इत्युक्तप्रकारेणाष्टावात्मगुणाः अथश
ब्दःसंभावनायां। एवमुत्कर्षमाह यस्यैतेचत्वारिंशत्संस्कारानचाष्टावात्मगुणानसब्रह्मणःसायुज्यंसालोक्यंचगच्छति सालोक्यंसमान
लोकवासित्वंएकदेशायोगात्सालोक्यंसमस्तयोगात्सायुज्यमिति यस्यतुखलुसंस्काराणामेकदेशोप्यष्टावात्मगुणाअथसब्रह्मणःसायु
ज्यंसालोक्यंगच्छति तुशब्दोविशेषवाची खलुशब्दःप्रसिद्धौ यस्यचत्वारिंशत्संस्कारेषुद्वित्रमूलककतिपयसंस्कारसंबंधेप्यष्टावात्मगुणाः
संति अथशब्दोनिर्धारणे सब्रह्मणःसायुज्यंसालोक्यंगच्छत्येव इतिश्रीहरदत्तकृतायांगौतमीयधर्मसूत्रवृत्तौमिताक्षरायांअष्टमोध्यायः ८ ९ २७

मविधिपूर्वंस्नात्वाभार्यामधिगम्ययथोक्तान्गृहस्थधर्मान्प्रयुंजानइमानिव्रतान्यनुकर्षेत् तच्छब्देनपूर्वाध्यायेब्रह्मसंस्कारजाब्राह्मणश्चपरा
मृश्यते वैश्यस्यतुस्नातकविषयोविशेषंवक्ष्यति विधिपूर्वंविधिंपुरस्कृत्यस्नात्वावेदव्रतानिपारं।नीत्वाभार्यामधिगम्यविवाहंकृत्वातदनंतरं
यथोक्तानतिथिपूजादिगृहस्थधर्माननुतिष्ठेत् इमान्यपिवक्ष्यमाणानिव्रतान्यनुकर्षेत् आत्मानंप्रवेशयेत् अनुतिष्ठेदिति स्नातकः
चलोपोत्रद्रष्टव्यः स्नातकश्चैतानिगृहस्थव्रतान्यनुतिष्ठेत् ब्रह्मचर्याद्विरतत्वाद्गार्हस्थ्यव्यतिरिक्ताश्रमांतराभावाच्च भार्याधिगममाहधर्मि
तिपूर्वसूत्रमारब्धं स्नातकस्यतुभार्याधिगमासंभवेयावज्जीवंगृहस्थधर्माएवानुष्ठेयाइतिसूत्रांतरमारब्धं एतच्चराजब्राह्मणयोरेवस्ना
तकव्रतानुष्ठानेतदतिक्रमप्रायश्चित्तंच तथाचस्मृत्यंतरं स्नात[illegible]कव्रतलोपेतुप्रायश्चित्तंविधीयते राजब्राह्मणयोरेवनेतरेषांकथंचनेति
कानिपुनस्तानिव्रतानि नित्यशुचिःसुगंधःस्नानशीलः आचमनादिनानित्यंशुचिःस्यात् शक्तिविषयेनमुहूर्तमप्यशुचिःस्यात् सु
गंधश्चंदनाद्यनुलेपनसुरभितांगः यद्वागंधःशीलंसुशीलःस्यादिति स्नानशीलःनित्यस्नायीस्यात् अत्रस्नातकविषयेवसिष्ठः स्नातका
नांतुनित्यंस्यादंतर्वासस्तथोत्तरं यज्ञोपवीतेद्वेयष्टिःसोदकश्चकमंडलुरिति मनुः वैणवींधारयेद्यष्टिंसोदकंचकमंडलुं यज्ञोपवीतंवेदंच
शुभेरौक्मेचकुंडलेइति वेदोधर्ममुष्टिः सतिविभवेनजीर्णमलवद्वासाःस्यात् विभवेत्वन्यस्यसंभवेसतिजीर्णमलवच्चवासोनधारयेत्

रक्तमुल्बणमन्यधृतं वा वासो बिभृयात् कुसुंभादिरागयुक्तं उल्बणं बहुमूल्यं अन्यधृतं गुरुव्यतिरिक्तैरन्यैः पूर्वं धृतं एवंविधानि वासांसि
स न धारयेत् इति विभक्त्यनुवर्तते न स्रगुपानहौ स्रगुपानहावप्यन्यधृते न धारयेत् निर्णिक्तमशक्तौ अन्यस्यालाभे ...क्तिः
२८ तस्यामन्यधृतं वासः स्रगुपानहौ च निर्णिज्य धारयेत् न त्वेवासो निर्णेजनं मृद्वारिके पक्षं कार्यं न रूढश्मश्रुरकस्मात् श्मश्रुग्रहणं
नखादीनामप्युपलक्षणं अकारणात् रूढश्मश्रुः स्यात् कारणे सति रूढश्मश्रुः स्यात् कारणं तु स्मृत्यन्तरे पठितं षष्ठाद्वा षोडशाद्वा विवा
हादूर्ध्वं तथैव च अंतर्वत्न्यां च जायायां क्षौरकर्म विवर्जयेदिति वपनस्यापि गंगायां भास्करक्षेत्रे ... रिनाशौचे दिनकालश्चोक्तं तदीयं स्यात् तत्र
मनुः क्लृप्तकेशनखश्मश्रुरिति कल्पनाकर्तनेन समीकरणं याज्ञवल्क्यश्च शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिरिति नाग्निमप
श्च युगपद्धारयेत् एकेन हस्तेनाग्निमपरेणापश्च युगपन्न धारयेत् अत्र व्याघ्रो विशेषमाह न धारयेदपश्चाग्निं च पश्चान्नैवैव च युग
पत्स्नातकानित्यं न स्नायात् पितृवर्नरति नाञ्जलिना पिबेत् यत्किंचित् क्षीरोदकादि पेयमञ्जलिना न पिबेत् संयुक्तहस्तावंजलिः न ति २८
ष्ठन्नुद्धृतोदकेनाचामेत् उद्धृतोदकेन तिष्ठन्नाचामेत् आसीन एवाचामेत् उद्धृतोदके नेति वचनात् तडागादिषु तीर्थप्रदेशे स्थित्वा शुचिर्वि
जानुदघ्ने जलेऽतिष्ठतोऽप्याचमनं प्रतिषिद्धं आचारोऽप्येवमेव शिष्टानां न शूद्राशुच्येकपाण्यावर्जितेन शूद्रेणाशुचिनाशक्तस्य

कार एकस्यां वेत्याश्वलायनः याऽसौ माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षत इत्यापस्तंबः एवंभू
ताष्टका पर्वणि भवः स्थालीपाकः पार्वणः श्राद्धं मासि श्राद्धं श्रावणी सर्पबलिः श्रावण्यां पौर्णमास्यां गृह्यमग्निमतिप्रणीयेत्यादि ... विहितः
श्रावण्यां पौर्णमास्यामस्तमिते स्थालीपाक इत्यापस्तंबः आग्रयणी मार्गशीर्ष्यां पौर्णमास्यां क्रियमाणः सर्पबलेरुत्सर्गहोमः प्रत्यवरोहाख्यं वा कर्म
आग्रहायणीशब्देनोच्यते चैत्री शूलगवः ईशानबलिरित्यापस्तंबीयानां प्रसिद्धः स चैत्र्यां पौर्णमास्यां भवति अथ शूलगवः शरदि वसन्ते वेत्याश्वलायनः
आश्वयुजि रुद्राय संज्ञ इति केचित् आश्वयुज्यां पौर्णमास्यां तत्कर्मनिवेशनमलंकृत्य स्नाताः शुचिवाससः पशुपतये स्थालीपाकं जुहुयुरित्याश्वलायनः
अनाहिताग्नेराग्रयणमपि तत्रैव भवति तदिदं द्वयमाश्वयुजीशब्देन विवक्षितं पाकयज्ञा इति गार्ह्याणां कर्मणामाख्या यथाहापस्तंबः लौकिका
नां पाकयज्ञशब्द इति सप्तविधाः पाकयज्ञविधाः सप्तेत्याह अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्राम
णीति सप्त हविर्यज्ञसंस्थाः आग्न्याधेयादयः श्रौताग्निसाध्याः संस्कारेषु गण्यन्ते सप्त यज्ञाः दर्शपूर्णमासौ समुदायेनैकः संस्कारः सोमसमं धामा
वाप्रविर्धन्ता इति अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः अग्निष्टोमेन राजन्यस्य वाजपेयेन तद
र्थयेन यत्र सोऽस्तीत्यग्निष्टोमः ब्राह्मणस्य कथमयं संस्कार इति चिन्त्यं अन्ये प्रसिद्धाः इत्येते चत्वारिंशत्संस्काराः इत्युक्तोपसंहारः चत्वारिंशद्

वंदनादीनि येन कुर्वंति ते तथोक्ताः अधार्मिकाः पतितादयस्तैः सह न संभाषेत संज्ञाव्यवहारप्रयोगादेवासिद्धे सहग्रहणं तैः सहैककार्ये भूत्वा न संभा-
षेतेत्येवमर्थं तेन मार्गप्रश्नादौ न दोषः संभाष्य पुण्यकृतो मनसा ध्यायेत् यदि कारणवशात्तैः सह संभाषेत ततः पुण्यकृतो वसिष्ठादी-
न् मनसा ध्यायेत् मनसेति ध्यानस्वभावानुवादः ब्राह्मणेन वा सह संभाषेत प्रकरणाद्ब्राह्मणेनापि पुण्यकृदेव अधेनुं धेनुभव्येति ब्रू-
यात् धेनुः पयस्विनी गौः अधेनुस्तद्विपरीता तामपि धेनुभव्येति ब्रूयान्न पुनरधेनुमिति अभद्रं भद्रमिति अभद्रमपि वस्तु भद्र-
मित्येव ब्रूयात् कपालं भगालमिति कपालं ब्रुवन् भगालमिति ब्रूयात् मणिधनुरितींद्रधनुः इंद्रस्य धनुर्ब्रुवन् मणिधनुरिति
ब्रूयात् गां धयंतीं परस्मै नाचक्षीत धेट् पाने व्यत्ययेनायकर्मणि कर्तृप्रयोगः वत्सेन धीयमानां गां परस्मै स्वामिने न ब्रूयात् यस्य
हविषे वत्सा अपाकृता धयेयुरित्यादिके निमित्ते लाख्यात यथैव संस्पृष्ट इत्यत्र वत्सेनेत्यापस्तंबीयविशेषणात् नचैनां वारयेत न
स्वयमप्येनां वारयेदिति न मिथुनीभूत्वा शौचं प्रति विलंबेत मिथुनीभूत्वेत्यकोक्तं मिथुनीभूय स्त्रियमुपगम्य शौचप्रति नावि-
लंबेत तत्क्षणएव कुर्यात् शौचं चापस्तंबेनाभिहितं उदकोपस्पर्शनं मि[illegible]पि लेपापकर्षणमाचम्य प्रोक्षणमंगानामिति न च
तस्मिन्नशयने स्वाध्यायमधीयीत यस्मिन्मैथुनमाचरितं न चापररात्रमधीत्य पुनः प्रतिसंविशेत् कालदैर्घ्ये सति पुनः न

स्वप्यात् शेषां रात्रिं जागृयादेवेति पुनर्ग्रहणात् पूर्वरात्रे सुप्तस्य स्वापेन दोषः नाकल्यां नारीमभिरमयेत् अकल्यां रोगादिनाऽस्वस्थां तां ना-
भिरमयेन्न तया मिथुनीभवेत् न रजस्वलां रजस्वलामपि नाभिरमयेत् उदक्यागमने त्रिरात्रं प्रायश्चित्तं वक्ष्यति तेनैव सिद्धे वचन-
मिदं त्रिरात्रादूर्ध्वमप्यनिवृत्ते रजसि गमनप्रतिषेधार्थं नचैनां श्लिष्येन्न कन्यां एनां रजस्वलां कन्यामनूढामपि न श्लिष्येन्नालिंगेत् अ-
ग्निमुखोपधमनविगृह्यवादबहिर्गंधमाल्यधारणपापीयसावलेखनभार्यासहभोजनांजंत्यवेक्षणकुद्वारप्रवेशनपादपादधावनासंदीस्थ-
भोजननदीबाहुतरणवृक्षविषमारोहणावरोहणप्राणव्यायच्छनानि वर्जयेत् उपधमनमुपध्मानं नाग्निं मुखेनोपधमेत् ज्वलयेत् विगृ-
ह्यवादो वाक्कलहः गंधमाल्ययोर्बहिर्धारणं प्रकाशधारणमिति अनाविःस्रगनुलेपनः स्यादित्यापस्तंबः पापीयसावलेखनमधुना का-
ष्ठेनाशिरःप्रभृतेः कंडूयनं तृतीयाया अकर्तृकर्त्तादसः भार्यया सहभोजनं भार्यया सहैकस्मिन् भाजने भोजनं केषुचिद्देशाचारात्प्राप्त-
स्त्याप्रतिषेधः अन्ये त्वेकस्मिन् काले भोजनं सहभोजनमिच्छंति अंजनेत्यवेक्षणं अंजंती तैलाभ्यंगं कुर्वंती अंजनादिभिरलंक्रियमाणा वा तस्या
अवेक्षणं तच्च भार्याविषयमेके स्त्रीमात्रविषयमित्यन्ये कुद्वारप्रवेशनं द्वारव्यतिरिक्तेन देशेन देवालयग्रहारैः प्रवेशनं अप्रसिद्धमार्गेण नगरग्रा-
मादिप्रवेशनमिति तथा चापस्तंबः न कुसृत्या ग्रामं प्रविशेद्यदि प्रविशेन्नमो रुद्राय वास्तोष्पतय इत्येतामृचं जपेदन्यां वा रौद्रीमिति पादपादधावनं

गौ०सू०वृ०

३० पादेन पादस्य प्रक्षालनं आसंदीस्थभोजनं आसंदी पीठिका तत्रस्थस्यान्नस्य भोजनमासंदीस्थभोजनं यत्रायत्रासीनो भुंक्ते तत्रासने भोजनमात्रं
निधाय यद्भोजनं तद्वा नदीबाहुतरणं बाहुभ्यां नद्यास्तरणं पारगमनं नदीबाहुतरणं बाहुग्रहणात्प्लवेन तु नावादिना न दोषः नदीग्रहणात्तटाकादीनामु
पलक्षणं वृक्षविषमारोहणावरोहणे वृक्षस्यारोहणं विषमस्य कूपादेरवरोहणं च वृक्षविषमग्रहणान्न्युन्नतनिम्नस्थलमुपलक्ष्यते प्राण
व्यायच्छेत्रे प्राणोपरोधिदुःखघनजलयंत्राद्यारोहणादि एतान्यभिमुखोपधमनादीनि वर्जयेत् न संदिग्धां नावमधिरोहेत् पारगमने संदि
ग्धां समर्थां नावं नाधितिष्ठेत् प्राप्तिपदपाठस्याशक्यत्वात्संक्षिप्याह सर्वत एवात्मानं गोपायेत् सर्वेभ्यः पापेभ्य आत्मानं रक्षयेत् एको
न गच्छेदध्वानमित्यादिस्त्यः न प्रावृत्य शिरोऽहनि पर्यटेत् प्रावृत्तशिरसो दिवा संक्रमणप्रतिषेधः अशीनस्य यथा तवि मार्गे वर्षातपादिबा
धे प्रावृत्यापि संक्रमणे न दोषः सर्वत एवात्मानं गोपायेदित्युक्तत्वात् प्रावृत्य रात्रौ रात्रौ तु शिरः प्रावृत्यैव पर्यटेत् मूत्रोच्चारे च मू
त्रणं मूत्रः उच्चारः पुरीषकर्म तयोः समाहारद्वंद्वः तत्र च शिरः प्रावृत्य तयोः कर्म कुर्यादिति शेषः न भूमावनंतर्धाय मूत्रपुरीषकर्मणी ३०
भूमौ तृणादिभिरंतर्धायैव कुर्यात् अयाज्ञियैस्तृणैरिति स्मृत्यंतरं नाराच्चावसथात् आवसथो गृहं तत्समीपे न कुर्यात् न भस्मक
रीषकृष्टच्छायापथिकाम्येषु करीषं गोमयं छाया उपजीव्या यत्र पथिकादयो विश्राम्यंति काम्यं कमनीयप्रदेशः भस्मादिष्वेतेषु मूत्रपु

शौचादि दूषितेन दक्षिणेनापि एकेन च पाणिना यदावर्जितं तेनोदकेन नाचामेत् स्वयं तु वामहस्तावर्जितेनोदकेनाचामन्निषेधे एकपाण्यावर्जितत्वं स
मानमिति चेन्न हस्तद्वयस्याप्याचमनेन संबंधात् तथा च शिष्टाचारदर्शनात् न वाय्वग्निविप्रादित्यापो देवता गाश्च प्रतिपश्यन्वा मूत्रपु
रीषामेध्यान्युदस्येत् अपूज्यावादांते दृष्ट्वा कर्तव्यात्समाहितो नोत्सृजेत् अनित्याः समासांता इति केचित् श्लोकः देवताः प्रतिमाः वाय्वादिस्थाने
मूत्रादीनि निरस्येत् पश्यन्वा न कुर्यादिति प्रतिवापक्षस्येत्वेत्यर्थः प्रति न कुर्यादित्याभिमुख्यवर्जनं पश्यन्न कुर्यादिति नियमादाभिमुख्ये
सत्यप्यनवलोकनं मूत्रपुरीषयोः पृथगुपादानात् मेध्यशब्देन निष्ठीवनादिपि शोधिविवक्षितं न त्वमेध्यशब्देन चाडं मूत्रपुरीषनिग्रहणार्थं
तु तयोरातिशय्येन वर्जनार्थं नैता देवताः प्रति पादौ प्रसारयेत् एता वाय्वाद्या देवताः प्रति पादौ न प्रसारयेत् पादावित्युपलक्षणं
पादं च न प्रसार्यादिति गोष्ठविप्रेषु च देवतादि तापद्वयपागत्य तदुपचारार्थः न पर्णलोष्टाश्मभिर्मूत्रपुरीषापकर्षणं कुर्यात् पर्णा
दिभिर्मूत्रपुरीषयोरपकर्षणमपमार्जनं न तु कुर्यात् अन्यैस्तु कुर्यादिति न भस्मकेशतुषकपालामेध्यान्यधितिष्ठेत् भस्मादी
नि नाक्रामेत् तुषाग्नी धान्यादीनां त्वचः अन्ये प्रसिद्धाः तेषामुपरि न तिष्ठेत् अधितिष्ठेदित्यनेन यादृच्छिकस्पर्शमात्रे न दोषः न
म्लेच्छाशुच्यधार्मिकैः सह संभाषेत वर्णाश्रमरहिता देशाः सिंहलद्वीपादयो येषु वसंति ते म्लेच्छाः अशुचयः आर्या अपि विहितानि संध्या

विमर्दनावस्फोटनानि नाकस्मात्कुर्यात् छेदनं तृणादीनां भेदनं घटादेः विलेखनं कुड्यभूम्यादौ नखादिभिर्विलेखनं विमर्दनं लोष्टादीनां चूर्णीकरणं
अवस्फोटनं अंगुलीनां सशब्दं प्रसारणं एतदकस्मान्न कुर्यात् कारणे त्ववस्फोटनेयात् ततो न दोषः छेदनादिष्वपि यथासंभवं मृग्यं नोपरि वत्सतंतीं
गच्छेत् वत्सबंधनी रज्जुर्वत्सतंती तामुपरि न गच्छेत् वत्सग्रहणं गोमात्रोपलक्षणं न कुलंकुलः स्यात् कुलमेव कुलं यस्य स कुलंकुलः सदसोनु
गामी एवंविधो न स्यात् अन्यत्रगमने [illegible] नादिलाभसंभवे स्वकुल एव न तिष्ठेदिति अपर आह कुलात्कुलांतरगामी कुलंकुलो दूतादिरूपस्तथावि
धो न स्यात् स्वसूत्रपरित्यागेन परसूत्रं न भजेदिति तत्र स्मृत्यंतरं यः स्वसूत्रं परित्यज्य परसूत्रे निषेवते शाखारंडः स विज्ञेयः सर्वकर्मबहिष्कृत इ
ति न यज्ञमवृतो गच्छेत् अवृतोऽनुपामंत्रितो यज्ञं न गच्छेत् दर्शनाय तु कामं अवृतोपि कामं दर्शनाय यज्ञं गच्छेत् न त्वार्त्विज्याद्विलिप्सया
न भक्षानुत्संगे भक्षयेत् भक्षाः पृथुकादयः तानुत्संगे कृत्वा न भक्षयेत् न रात्रौ प्रेष्याहृतं रात्रावर्थे प्रेष्या किंकरेण यदाहृतं मानीतं यत्किं
चिदपि न भक्षयेत् न भक्षान्नेव एकवचननिर्देशात् उद्धृतस्नेहविलयनपिण्याकमथितप्रभृतीनि चात्तवीर्याणि नाश्नीयात् आत्तवीर्याण्यु
पात्तसाराणि तानि नाश्नीयात् कानि पुनस्तानि तेषामुदाहरणप्रपंचः उद्धृतस्नेहं उपात्तसारं दधिपयसि विलयनं नवनीतमलं यंत्रेनिष्पीडि
तानां तिलानां कल्कः पिण्याकं यस्य मथनमात्रं नांबुसंसर्गस्तत् दधि मथितं यथाहुर्नैघंटुकाः तक्रं ह्युदश्विन्मथितं पादांब्वर्धांबु निर्जलमिति

तत्र द्विविधं मात्तनवनीतमितरत्तु त्वाद्यस्य ग्रहणं तद्धात्तवीर्यस्योदाहरणं भवति प्रभृतिग्रहणेन यथान्यदेवं विधकं तस्य रूपं तेषां ग्रहणं उद्धृतन
वनीतं तक्रमाद्यमनाश्यमिति विद्यं आचारस्त्वशनमेव अर्थपक्षप्रकरणेऽपठवक्तव्यं इह वचनात् स्नातके उपेक्षायश्चित्तं तदेवेषामशने भवति ना
क्षत्रभक्षणनिमित्तं सायंप्रातस्त्वन्नमभिपूजितमनिंदन्भुंजीत तुशब्दोऽवधारणे सायंमात्रिः प्रातरह्नः तयोर्द्वयोरेव कालयोरशनं भुंजीत नांत
रतिप्राप्तस्य भोजनस्य परिसंख्येयं तत्र गुणविधिरभिपूजितमनिंदन्निति अभिपूजितं रोचतइति अनिंदन् कदन्नत्वादिदोषेणाकुत्सयन्
सायंप्रातरशनान्यभिपूजयेदिति वसिष्ठः न कदाचिद्रात्रौ नग्नः स्वपेत् सुप्याद्रात्रौ न तु नग्नः स्वपेत् तदेवं रात्रौ नग्नस्य स्वापप्रतिषेधः दिवा
तु स्वप्नं नेति कदाचिद्ग्रहणादिदं लभ्यते अन्यथा रात्रौ न नग्नः स्वपेदित्येव वाच्यं स्यात् स्नायाद्वा नग्नः इत्येव न स्नोजलेनावतरेदिति अ
त्यंतर आर्त्ते त्याद्वाराचाद्यो प्रतिपाद्या गोन[illegible]ह्यते इति मस्करियाह यचात्मवंतो वृद्धाः सम्यग्विनीता दंभलोभमोहविमुक्ता वेदविद आचक्ष
ते तत्समाचरेत् आत्मवंतो जितेंद्रियाः वृद्धाः परिणतवयसः यौवने विषयवश्यता संभवात् सम्यग्विनीता गुरुभिः सुशिक्षिताः दंभो ध
र्मध्वजनलोकवंचनं लोभो अन्यायेन परद्रव्यलिप्सा मोहो ज्ञाने लौकिकविरुद्धज्ञानं वा तेन युक्ताः वेदविदः पाठतश्चार्थतश्च वेदनाभिविदिताः
आचक्षते इति निरोधं एवंभूता वृद्धा यदाचक्षते तत्कर्त्तव्यमिति बहुवचननिर्देशात् बहुना [illegible] कमन्यतव्द्वति यागक्षेमार्थमीश्वरमधि

गौ०सू०वृ०

गच्छेत् अलब्धस्य लाभो योगः लब्धस्य पालनं क्षेमः तदर्थमीश्वरं राजानमधिगच्छेत् अधि[illegible]रयोगाद्धिरैश्वर्यइत्यस्मादकार्पण्येन स्वतंत्रो
गच्छेदिति नान्यमन्यत्र देवगुरुधार्मिकेभ्यः अन्यं राजव्यतिरिक्तं योगक्षेमसमर्थमपि नाधिगच्छेदित्यनुवादः देवा इंद्रादयः गुरवः पित्रादयः धार्मिका
३२ धर्माचरणशीलाः एतेभ्योन्यत्र एतानधिगच्छेदेवेति प्रभूतैधोदकयवससमित्कुशमाल्योपनिष्क्रमणमार्यजनभूयिष्ठमनलससमृद्धं धार्मिकाधि
ष्ठितं निकेतनमावसितुं यतेत एधांसि काष्ठानि उदकं स्नानपानयोग्यं यवसानि तृणानि गवार्थं कुशाः समिधः माल्यानि पुष्पाणि देवार्चनाद्यर्थ
उपनिष्क्रम्यते यत्र तदुपनिष्क्रमणं बहिरवकाशः संचारार्थं एवमादीनि प्रभूतानि यस्मिन् आर्याः त्रैवर्णिकास्तैर्जनैर्भूयिष्ठं व्याप्तं अलसाः
रून्येत्र निरुद्यमास्तद्विपरीताः अनलसाः तैः समृद्धं धार्मिका धर्मशीलास्तैरधिष्ठितमभिरधिष्ठितं एवंभूतं निकेतनमावसितुं यतेत एवंभूते स्था
नेष्वच्छ्रे नापि वसेदिति प्रशस्तमंगल्यदेवतायतनचतुष्पथं प्रदक्षिणमावर्तयेत् निर्गमप्रवेशादिषु यथा ते दक्षिणपार्श्वे भवंति तथा कु
र्यादिति मनसा वा तत्समाचारमनुपालयेदापत्कल्पः मनसा वैनं समग्रमाचारमनुपालयेदापत्कल्पः संभवे तु साक्षादनुष्ठानमेवेति
सत्यधर्मा सत्यवचनस्वभावः स्यादिति वक्ष्यमाणमपेक्षते आर्यवृत्तः पूर्वभाषी प्रियंवदस्तथा धार्याणां वृत्तमिव वृत्तं यस्य स तथोक्तः ३२
उष्ट्रमुखवत् मध्यमपदलोपः शिष्टाध्यापकः सतामध्यापयिता वा तद्योग्यानां शौचशिष्टः शिष्टं शास्त्रविहितं शौचं यस्यास्ति

रीषकर्म वीन कुर्यात् उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः मूत्रपुरीषे दिवसे उदङ्मुख एव कुर्यात् संध्ययोश्च उदङ्मुखः कुर्यादिति रात्रौ दक्षिणा द
मुखः स्पष्टं पालाशमासनं पादुके दंतधावनमिति वर्जयेत् इतिकारादाद्यर्था[illegible]न्यदेवंयुक्तं रथादि तदपि पालाशं वर्जयेत् अत्र पठंति आस
नं शयनं यानं गृहोपकरणं तथा वर्जयेत्पादुकाश्चैव पालाशं दंतधावनमिति सोपानत्कश्चाशनासनाभिवादननमस्कारान् वर्जयेत् अभिवादनं प्र
वोक्तं नमस्कारो देवताप्रणामः अभिवादनादीनि सोपानत्को न कुर्यात् उपानद्ग्रहणं पादुकादेरुपलक्षणं न पूर्वाह्णमध्यंदिनापराह्णानफलान् कुर्याद्य
थाशक्ति धर्मार्थकामेभ्यः तृतीयार्थे चतुर्थी पंचमी वा पूर्वाह्णादीनह्नः स्त्रीन्भागान्धर्मादिभिस्त्रिभिर्यथाशक्ति अफलान्न कुर्यात् किं तर्हि सफलानेव य
थासंख्यं तेषु तु धर्मोत्तरः स्यात् तुशब्दोऽनवस्थायां परिहरति तेषु तु धर्मार्थकामेषु धर्मोत्तरः स्यात् धर्मप्रधानः स्यात् धर्माविरोधेनार्थकामौ सेवेतेति तथा
च मनुः परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जिताविति न नग्नां परयोषितमीक्षेत पराचासौ योषिच्च परयोषित् अन्यथा विधवानूढावेश्यादयो न स्युः
तां नग्नां सतीं नेक्षेत न पदासनमाकर्षेत् पादेनासनमात्मसमीपं न प्रापयेत् न शिश्नोदरपाणिपादवाक्चक्षुश्चापलानि कुर्यात् चापलशब्दः
प्रत्येकं संबध्यते शिश्नचापलमकाले मैथुनेच्छा उदरचापलं सर्वदा विभाक्ष्यैषा पाणिचापलं शिल्पक[illegible]शिक्षाभिलाषः पादचापलं पर्यटनं वाक्
चापलं नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छत इत्येतदतिक्रमेण व्यवहारः चक्षुश्चापलं नृत्तादिदिदृक्षा एतानि न कुर्यात् छेदनभेदनविलेखन

नवेदं धारयेन्नोपरुध्यः अन्नन्याकुर्यादिति गौतमस्मरणात् ॥

गौ०सू०१० नमार्विन्यं प्रतिग्रहः प्रतिषेधः एते ब्राह्मणस्याधिकाः पूर्वेभ्योध्ययनाध्ययः तत्रामी च समुच्चिता इत्युक्तं भवति अन्यत्राप्यनुपनीतस्यापि प्रतिग्रहो भवति या
जनाध्यापने तु संभवान्नभवतः ब्राह्मणस्य प्रवचनयाजनप्रतिग्रहा इत्येव सिद्धे अधिकग्रहणं पूर्वत्रयं यथा संख्यं मा भूदिति पूर्वं तावद्व्यवस्थिताः पूर्वेषु निय
मस्तु नियमो वश्यकर्तव्यता पूर्वेण्वध्ययनादीन्यवश्यकर्तव्यानि अकुर्वन्प्रत्यवैति कुर्वंश्चाभ्युदेति प्रवचनादीनि तु वृत्त्यर्थानि चेत्कार्याणि अक
३३ रणे न प्रत्यवायः करणेपि नाभ्युदयः आचार्यज्ञातिप्रियगुरुधनविद्यानियमेषु ब्राह्मणः संप्रदानमन्यत्र यथोक्तात् ब्रह्मवेदः तस्य संप्रदानं सम्य
क्प्रदानं अनुज्ञात उपविशेदित्यारभ्य गुरुशुश्रूषवो ध्याप्या इत्यन्तेन यथोक्तो नियमस्तस्मादन्यत्र विनापि तेनाचार्यादिभ्यो ब्रह्म देयमित्यर्थः त्य
ते आचार्य उक्तः ज्ञातयो भ्रातृपितृव्यादयः प्रियः सखा गुरवो मातुलादयः एतेषु ब्रह्म सम्यक्प्रदेयं तथा धनविद्यानियमेषु धनेन विद्यायाः
परिवर्तनं धननियमः विद्यांतरेण परिवर्तनं विद्यानियमः तेष्वपि ब्रह्म संप्रदेयं धनविद्यानियमे प्ययोग्यविषय एव शिष्टाध्यापकेत्युक्तं वा
न न च तस्याप्ययमपवादः यथा वद्ग्रहणविधिनाध्ययनमुक्तं स्यैवायमपवाद इति कृषिवाणिज्ये चास्वयंकृते कृषिः कर्षणेन सस्यो ३३
त्पादनं वाणिज्या क्रयविक्रयव्यवहारः ते च ब्राह्मणस्याधिके यदास्वयंकृते अन्येन कारयितुं शक्यते कुसीदं च कुसीदमुपचर्यार्थो
धनप्रयोगः तदप्यस्वयंकृतं चेद्ब्राह्मणस्याधिकं राज्ञोधिकं रक्षणं सर्वभूतानां राज्ञोभिषिक्तस्य सर्वभूतानां रक्षणमधिकं सर्वत्र
हणात्स्थावराणामप्यश्वादीनामपि पक्षिदादिपरिहारार्थं न्यायादण्डत्वं न्यायादनपेतो न्याय्यः शास्त्राविरुद्धो दण्डो यस्य स तथोक्तो न्यायद

त्वं न्याय्यदण्डत्वमित्यपि पाठे एष एवार्थः स चाराज्ञोधर्मः रागद्वेषादिना न न्यूनाधिकदण्डः स्यादिति बिभृयाद्ब्राह्मणान् श्रोत्रियान् श्रोत्रियाः अधीतवेदाः तान्ब्राह्मणा
न्नादिदानेन बिभृयात् निरुत्साहांश्चाब्राह्मणान् जीवनार्थमुत्साहं कर्तुमसमर्था निरुत्साहाः तानब्राह्मणानपि बिभृयात् किं पुनर्ब्राह्मणान् पूर्वसूत्रं त्वसमस
मर्थानपि श्रोत्रियान्स्वयमाहूय बिभृयादिति अकरांश्च ये पूर्वैर्दत्ताः अकरा ब्राह्मणादिषु यद्वा श्रयथा पूर्वं बिभृयात् बाधकादिनिरासेन स्ववचनात् पूर्वं कर
मुक्तान्यदिति उपकुर्वाणांश्च अधीयाना ब्रह्मचारिण उपकुर्वाणाः तांश्च बिभृयादन्नादिदानेन याद्यर्थिनः स्वयं जीवनवतस्तत्करादिव्यावर्तनेन अपरआह
उपकुर्वाणा लोकोपकारिणो वैद्यादय इति योगश्च विजये योग उपायः विजयविषयश्च योगः कार्यः अयमपि राज्ञोधिकधर्म इति भये विशेषेण अन्यो
स्मिन्परचक्रादिनिमित्ते भये विशेषेण योगः कार्यः चर्या च रथधनुर्भ्यां चरणं चर्या बहिःप्रदेशे रथेन रथमारूढो धनुर्हस्तश्चरेत् रथग्रहणं हस्त्यश्वादेरुप
लक्षणं धनुर्ग्रहणं च खड्गादेः संग्रामे संस्थानमनिवृत्तिश्च संग्रामो युद्धं तत्र संस्थानं प्राणत्यागः निवृत्तिः पलायनं तदभावोऽनिवृत्तिः एतौ च राज्ञो
धिकौ धर्मौ न दोषो हिंसायामाहवे यत्र परस्परमाहूय तेन स आहवस्तादृशे युद्धे शत्रूणां हिंसायामपि न दोषः नित्यमहिंसेत्यस्यायमपवादः
अन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः विशब्दः त्रिभिः संबध्यते व्यश्वो विसार
थिर्व्यायुध इति यस्याश्वो हतः स व्यश्वः यस्य सारथिर्हतः स विसारथिः यस्यायुधं कृत्तं पतितं वा स व्यायुधः कृताञ्जलिर्भयेन पृष्ठीकृत्य पलायमानः उ
पविष्टः पलायितुमसामर्थ्यमप्यासीनः स्थलरक्षारूढः स्थलमुन्नतप्रदेशः वृक्षं वारूढः दूतः वार्ताहरः गोऽस्मि ब्राह्मणोस्मीति ये ब्रुवंति ते गोब्राह्मणवा

गौ०सू०वृ० दिनः॥ एतेभ्योऽन्यत्राहवे हिंसायां न दोषः एतेषु दोष इति॥ क्षत्रियश्चेदन्यस्तमुपजीवेत्तद्वृत्त्या॥ अन्यश्चेत् क्षत्रियस्तं राजानं दैवोपहतं वादिनोपजीवेत् तदा तद्वृत्त्या
तस्य राज्ञो या वृत्तिश्चर्यावरथधनुर्भ्यामित्यादिका तया युक्तः सन्नुपजीवेत् तेन राज्ञैवमसौ सम इति॥ जेता लभेत सांग्रामिकं वित्तं॥ राज्ञो नियुक्तो
राजभृत्यादिः संग्रामे शत्रून्निर्जित्य यद्वित्तं लभते तत्सर्वमेव जेता लभेत न राजा॥ वाहनं तु राज्ञः॥ वाहनं हस्त्यश्वादिकं निर्जित्य राज्ञो भवति न जेतुः
॥३४॥ ॥ उद्धारश्चापृथक्जये॥ यदि सर्वे सैनिकाः संभूय जयेयुर्जित्वा च किमपि उभारं तस्मिन्नपृथक्जये राज्ञ उद्धारो विशेषः शेषः स्वयं तेभ्यो देयः
॥ अन्यत्तु यथार्हं भाजयेद्राजा॥ बलस्थ यं वर्तमायि व्यादितनोऽन्यद्यथार्हं यस्य यावान् व्यापारो यावद्वा शौर्यं तदनुरूपेण भाजयेत यथैतेन तदनुरूपं
भजेरंस्तथा कारयेदिति॥ राज्ञो बलिदानं कर्षकैर्दशममष्टमं षष्ठं वा॥ कर्षकैः क्षेत्रे यल्लब्धं तस्य दशमोऽष्टमः षष्ठो वा भागो राज्ञो बलिदानं कररूपेण देयः
अस्यार्थः कर्षकैः क्षेत्रेषु यल्लब्धं तद्दक्षिणानिमित्तवृत्तिरेषा लब्धाया भूमेरतिभोगो मध्यमभोगोऽल्पभोग इति यथायं व्यवस्थितो विकल्पः अतिभोगद
शमांशः मध्यमभोगेऽष्टमांशः अल्पभोगे षष्ठांश इति॥ पशुहिरण्ययोरप्येके पंचाशद्भागः॥ ये पशुभिर्जीवंति ये वा हिरण्यप्रयोक्तारो वार्धुषिका
स्तैः पंचाशत्तमो भागो राज्ञो देय इत्येके॥ तद्यथा॥ यस्य पंचाशत्पशवः संति स प्रतिसंवत्सरं राज्ञे एकं पशुं दद्यात्॥ यस्य पंचाशन्निष्कैर्वृद्धिप्रयोगः स
प्रतिवत्सरमेकं निष्कं राज्ञे बलिरूपेण दद्यादिति॥ विंशतिभागः शुल्कः पण्ये॥ यद्द्रव्यं विक्रीयते तत्पण्यं तत्र विंशतितमो भागो राज्ञो देयः तत् ॥३४॥
स्य दीयमानस्य शुल्क इति संज्ञा शुल्कप्रदेशाः प्रातिभाव्यं वणिक्शुल्कमित्यादयः॥ मूलफलपुष्पौषधमधुमांसतृणेन्धनानां षाष्ठ्यं॥ मूलं

स्नातो विशिष्टः निष्ठांतस्य परनिपातः शास्त्रविहितेन शौचेन शौचवान् शौचस्य पुनः पुनर्वचनं तात्पर्यार्थं श्रुतिनिरतः स्यात् वेदाभ्यासरतः नित्यमहिं
स्रो मृदुर्दृढकारी दमदानशीलः॥ नित्यं निमित्तं सत्यधाहिंस्रः अहिंसाशीलः मृदुः कृतापराधेष्वपि सहकः दृढकारी आरब्धस्य समापयिता न सप्रक्रमिकः
दमदानशीलः दमः इंद्रियनिग्रहः दानं संविभागस्तच्छीलः स्यादिति सर्वत्रापेक्ष्यते एवमाचारो मातापितरौ पूर्वापरान् संबंधान् दुरितेभ्यो मोक्षयिष्यन्
स्नातकः शश्वद्ब्रह्मलोकान्न च्यवते न च्यवते एवमुक्तप्रकारस्त्वाचारो यस्य स एवमाचारः एवंभूतः स्नातकः मातापितरौ पूर्वसंबंधाः पितामहादयः अ
परसंबंधाः पुत्रादयः तांश्च पूर्वापरसंबंधान् दुरितेभ्यः पापेभ्यो मोक्षयिष्यन् ये पूर्वभूतास्तान् नरकादिभ्यो मोचयति ये तु भाविनस्तान् पुत्रादयस्ता
न्मोक्षयिष्यन्नस्य यस्यापार्यमाणः मोचयिष्यन् भवति स एवंभूतः स्नातकः शश्वद्बहुकालं ब्रह्मलोकान्न च्यवते द्विरुक्तिः पूर्ववत् पुनः स्ना
तकग्रहणं स्नातकधर्माणामेवेतरेषां न गृहस्थधर्मसहितानामित्येवमर्थं इति श्रीहरदत्तविरचितायां गौतमीयधर्मसूत्रवृत्तौ मिताक्षरायां नवमोऽध्यायः॥ ९
उक्ताश्रयाः आश्रमधर्मा अथ वर्णधर्मानाह॥ द्विजातीनामध्ययनमिज्यादानं॥ यथासंख्यमत्र न भवति उक्तस्याधिकस्य ग्रहणात् तत्रैव वक्त
व्यं भविष्यति अध्ययनं वेदाभ्यासरूपं इज्या यागो देवपितृपूजा दानं पात्रे द्रव्यत्यागः द्विजातीनामिति वचनाद्यदा द्विजातयः संपन्नाः कृतोप
नयनाः स्तत्प्रभृत्येते धर्माः न त्वनुपनीतानां दानेऽप्यधिकारो नास्तीति केचित् नेति वयं द्विजातीनामित्युपलक्षणं येषां द्विजातिजन्म तेषा
मिति तेनानुपनीतस्याप्यर्थवतो हितैर्विधिभिः प्रवर्तितस्य दानं भवत्येव॥ ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः॥ प्रवचनमध्यापनं याज

ग्निरर्थापचयेन देयं मासि मास्येकैकमनुवर्तते विंशतिभागः शुल्कः पण्यतुल्यकं ततः शुल्कादधिकमिदं मासि मास्येकैकपण्यमर्थी
पचयेन प्रामस्य मूल्यस्य किंचिन्न्यूनतो कस्यापि त्वा वणिजो राज्ञो दद्युः तत्र बृहस्पतिः शुल्कं दद्युस्ततो मासे एकैकं पण्यमेवं च अर्थनिरंचम
ऊन वणिजस्तत्र एव क पृथगिति । प्रनष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुः प्रनष्टस्वामिस्वं कोऽदृष्टं अस्वामिकमज्ञायमानस्वामिक
मधिगम्य भूमौ पातितमप्युपलभ्य जनपदपालननियुक्ता येते राज्ञे प्रब्रूयुः अन्ये राजपुरुषा यदि दृष्टवन्तस्तेऽपि प्रब्रूयुः ततः किं कर्तव्यं राज्ञा वि
ख्याप्य संवत्सरं राज्ञा रक्ष्यं इदमेवंजातीयकं वस्तूपलब्धमिदितं यस्य तेन स्वेन तत्र आगन्तव्यमिति नगरे पटहेन घोषयित्वा संवत्सरं रक्ष्यं प्राक् सं
वत्सरात् स्वामी आगच्छति ततो लक्षणानि पृष्ट्वा स्वाम्यं चेत्तस्मै देयं वैषम्ये सदृश्यः तथापि तु बल्यः प्रनष्टाधिगतं देयं नृपेणाधनिने धनं
विभावयेन्न चाल्लंघेत्स तत्समं दण्डमर्हति एवमधिगम्याः प्रशस्तं तो देयाः अथ संवत्सरादूर्ध्वं कथं ऊर्ध्वमधिगन्तुश्चतुर्थं राज्ञः शेषः य
नाधिगम्याख्यातं तस्मै चतुर्थांशं दत्त्वा शेषो राज्ञा ग्राह्यः स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु रिक्थं पित्रादीनामभावप्राप्तं
क्रयो मूल्येनात्मीकारः संविभागो भ्रात्रादीनां साधारणस्य परस्परविभागः परिग्रहो वन्यस्वामिकेषु वृक्षादिषु स्वीकारः अधि
गमः प्रनष्टस्याज्ञातस्वामिकस्य निध्यादेः स्वीकारः एतेषु कारणेषु द्रव्यस्वीकर्ता स्वामी भवति तत्र प्रनष्टाधिगते राज्ञोऽधिगन्तुश्च स्वाम्यमु

पपन्नमिति प्रकरणसंगतिः क्षेत्रेषूत्पन्नानि सस्यादीनि क्षेत्रवदेव क्षेत्रवतः स्वामिनि एतेनाकरेषूत्पन्नं लवणादि व्याख्यातं एतानि सर्ववर्णसाधा
रणानि स्वाम्यकारणानि ब्राह्मणस्याधिकं लब्धं लब्धं यद्दानरूपेण तद्ब्राह्मणस्याधिकं स्वाम्यमूलं क्षत्रियस्याविजितं विजयेन ल
ब्धं क्षत्रियस्याधिकं स्वं निर्विष्टं वैश्यशूद्रयोः निर्विष्टं कर्मणोपात्तं कृष्यादिना वैश्यस्य शूद्रस्य शुश्रूषादिना तदधिकमनयोः अथ
प्रनष्टाधिगन्तुश्चतुर्थांश इत्यस्यापवादः निध्यधिगमो राजधनं निधिश्चेदधिगतस्तद्राजधनमेव भवति अधिगन्त्रे तु अनुग्रहानुरूपं यत्किं
चिद्देयमिति न ब्राह्मणस्याभिरूपस्य अभिरूपः कट्कर्मनियुतः अभिरूपस्य ब्राह्मणस्य यो निध्यधिगमो न तद्राजधनं किं तर्ह्यधि
गन्तुर्ब्राह्मणस्यैवेति अब्राह्मणो व्याख्याता षष्ठं लभेतेत्येके अब्राह्मणोऽपि निधिमधिगम्य यथावन्निवेदयति इदं मया साधितमिति सतस्यापि नि
धेः षष्ठं लभेतेत्येके स्मृतीनामनुमन्यंते ब्राह्मणस्त्वनभिरूपे कल्प्यं चौरहृतमपजित्य यथास्थानं गमयेत् चौरैर्हृतं द्रव्यं तानपजित्य य
थास्थानं गमयेत् स्वामिन एव प्रत्यर्पयेत् न तु स्वल्पमपि किंचित् कोशाद्वा दद्यात् यद्यन्विष्यापि चौरा न दृष्टास्तदेव वाजिलाग
तास्तदा स्वकोशादादाय तावद्धनं स्वामिने दद्यात् न यावदपहृतं चौरैरिति रक्ष्यं बालधनमाव्यवहारप्रापणात् समावृत्तेर्वा बालोऽप्रा
प्तव्यवहारकः तस्य यद्रिक्थं पितृणा रक्षकाश्च पित्रादयो न सन्ति तदा गृहीत्वा धार्मिके ... तद्धनं राज्ञा रक्ष्यं आकृतः व्यवहार

प्रापणात् यावदसौ व्यवहारप्राप्तः पूर्णषोडशवर्षो भवति समाप्ते वा आप्तानुवर्तनेन अप्रांतोदस्य बुरुकुसीत्वद्वृत्तिः समावृत्तिः आवात
स्याइति एवं राज्ञोधिकं स्वत्वमूलमुक्तं ॥**वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यकुसीदं**॥ कृषिः प्रसिधाः वणिगिति वाणिज्यमुच्यते पशु
पालस्य कर्म पाशुपाल्यं कुसीदं वृध्यर्थो धनप्रयोगः कृष्यादिभिर्यल्लब्धं तदधिकं स्वं वैश्यस्य॥ **शूद्रश्चतुर्थो वर्ण एकजातिः**॥ चतुर्थो वर्ण
इति वर्णसामान्यत्वे सत्यपि चतुर्थग्रहणं पूर्वेषां त्रयाणां ब्राह्मणादिवर्णानां पृथक्कृपणत्वोपपादनार्थं त्रैवर्णिका इति प्रसिध्यत्वादेकजातिरुप
यनं पूर्वेषां द्वितीयं जन्म न तदस्य नास्तीति उपनयनप्रतिषेधात्तत्पूर्वकमध्ययनमपि न भवति तद्विषये गृह्यकारक आह शूद्रस्यापि निषेधकं पुं
सवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलान्यमंत्रकाणि यथाकालमुपदिष्टानीति विवाहोप्यमंत्रको यथाचारं भवति ॥**तस्या
पि सत्यमक्रोधः शौचं**॥ उपनयनाध्ययनरहितत्वेपि यथावृत्तिकत्वं मास्मादिति तस्यापि शूद्रस्य सत्यादयो धर्मा भवंति सत्यं यथादृष्टार्थ
वादित्वं अक्रोधः परानभिद्रोहबुद्धिः शौचं द्विविधं बाह्यं शौचं मनःशौचमित्यादि वसिष्ठस्तु सर्वेषां सत्यमक्रोधो दानमहिंसा प्रजननं च
ति॥ **आचमनार्थे पाणिपादप्रक्षालनमेवैके**॥ पूर्वेषां वर्णानां यदाचमनमुक्तं तद्विषये शूद्रस्य पाणिपादप्रक्षालनमेव भवति नान्यदाचम
नकल्प इत्येके मन्यंते मनुस्तु सकृदंबुपानमिच्छति स्त्रीशूद्रोनुमकृत्स्पृष्टाभिरिति न त्वाचमनविषये तरानाः सकृच्छूद्रस्यायादस्य शूद्रः पाणिपादं

हरिद्रादि फलमाम्रादि पुष्पमुत्पलादि ओषधयो बिल्वादि शिष्टानि प्रसिद्धानि एतेषु पण्येषु षष्ठितमो भागो राज्ञो देयो विंशके त्राकस्मात्पुनरेवं रा
ज्ञे देयमुत्पत्त आह तद्रक्षणधर्मित्वात् तेषां करदायिनां रक्षणलक्षणधर्मणानद्धत्वात् तेषामयं रक्षक इति तब्धेति तेषु तु नित्ययुक्तः स्यात्
तेषु कर्मकारिषु नित्ययुक्तः स्यात् रक्षणे नित्यमवहितः स्यात् अपर आह तेषु बल्यादिषु नित्ययुक्तः स्यात् तात्पर्येणादद्यात् शुल्कं यस्त्वेतद्धनमिति
अधिकेन वृत्तिः राज्ञोधिकं रक्षणमिति यदुक्तं तद्वारेणायदागतं धनं तदधिकं तेनात्मनः पोष्यवर्गस्य च हस्त्यश्वादीनां च वृत्तिः स्यात् मनुस्त्वे
र्थसंचित्य राजा तं कोशरूपेणात्मन जीवेत् आपदि तु तेनापि जीवेत् तथा च व्यासः कुटुंबपोषणं कुर्यान्नित्यं कोशं च वर्धयेत् आपदान्यत्र कोशं
तु न स्पृशेत्कदाचनेति शिल्पिनो मासि मास्येकैकं कर्म कुर्युः एकेनाह्ना साध्यमेकं कर्म शिल्पिनो लोहकारादयः ते प्रतिमासं राज्ञस्त्वा
मिकमहः कर्म कुर्युः एष एषां शुल्कः एतेनात्मोपजीविनो व्याख्याताः आत्मोपजीविनो ये शारीरायासेन जीवंति काष्ठवाहादयस्तेपि तेन शि
ल्पिदृष्टांतकारेण व्याख्याताः मासि मास्येकैकं कर्म कुर्युरिति नर्तकादिविषये चैव गतिः नौचक्रीवंतश्च नौश्चक्रं च नौ चक्रे चक्रवाहेन च
क्रवद्भवत्त लभ्यते तद्वंतो नौस्कक्रवंतः आसंदीवदष्ठीवादित्यादिना कुत्वचिद्रूपसिद्धिः नौमंतो नौजीविनः चक्रीवंतः शाकटजीविनः तेपि राज्ञ एकम
हस्त्वकर्म कुर्युः भक्तं तेभ्यो दद्यात् शिल्पिनो मासि मासीत्यारभ्य यदुक्तं तात्तेभ्यः कर्म कुर्वद्भ्यः भक्तं अन्नादिर्योभोजनं दद्याद्राजा पण्यवणि

॥३६॥

माश्रयते भर्तव्यस्तेन क्षीणोपि परिचर्यायावर्तमानः शूद्रो यदि क्षीणः कर्म कर्तुमसमर्थो भवति तथाप्ययमसौ पूर्वमाश्रितः कर्माण्यकरोत् तेनासौ भ-
र्तव्यः पूर्वकृतापेक्षया तेन चोत्तरः तेन च शूद्रेणोत्तरो वृत्तिक्षीणो भर्तव्यः शिल्पादिभिः पूर्वकृतापेक्षयैव अत्र जातूकर्ण्यः यो नीचमाश्रयते रा-
र्य आत्मानं दर्शयेत्सदा आत्मानं दासवत्कृत्वा चरेन्नीचोपि तं प्रति दरिद्रो ब्राह्मणो दांतो वेदानां चैव पारगः शूद्रेणापि सदा पोष्य भर्तव्यो नाश्रि-
तोपि सन् बिभृयाद्ब्राह्मणं नित्यं सर्वयत्नेन बुधिमान् अन्यं चाप्यानृशंस्यार्थं शूद्रोपि द्रव्यवान्सचेत् इति तदर्थोस्य निचयः स्यात् त-
स्य शूद्रस्य निचयोर्थसंचयः स तदर्थः स्यात् पूर्वसूत्रस्य हेतुरयं अनुज्ञातोस्य नमस्कारो मंत्रः अस्य शूद्रस्य वैश्वदेवादिषु तत्तद्दे-
वतापदं चतुर्थ्यंतं मनसा ध्यात्वा नमो नम इत्येवं मंत्रोनुज्ञातो धर्मज्ञैः अपर आह देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै
स्वधायै नित्यमेव नमो नम इत्ययं मंत्रो नमस्कारशब्देन विवक्षितः स पित्र्येषु कर्मसु भवति तथा चाह गृह्यकारः ब्राह्मणानुपवेश्य देवादि-
कं मंत्रं जपेदिति पाकयज्ञैः स्वयं यजेतेत्येके पक्वगुणेष्वष्टकाशूलगवेषु गार्ह्यकर्मसु पाकयज्ञशब्दप्रसिद्धिः यथाहापस्तंबः
लौकिकानां पाकयज्ञशब्द इति सर्वे चोत्तरोत्तरं परिचरेयुः सर्व एव वैश्यादयोप्युत्तरोत्तरवर्णं परिचरेयुः न केवलं शूद्र एव ब्राह्मण-
स्योत्तरो नास्ति मध्ये क्षत्रियवैश्यौ तथापि सर्वशब्दो बहुवचनमनंतरप्रभवाणामपि ग्रहणार्थं अपर आह समानेपि वर्णे योयो गुणा-

तदुत्तरस्तं तमवरो वरः परिचरेदित्येवमर्थं आर्यानार्ययोर्व्यतिक्षेपे कर्मणः साम्यं साम्यं आर्यस्त्रैवर्णिकः अनार्यः शूद्रस्तयोः कर्मणा आचारस्य
व्यतिक्षेपे व्यत्यासे सति तयोः साम्यमेव भवति परिचार्यपरिचारकभावः ब्राह्मणादिरप्यनार्यकर्मा चेच्छूद्रेण परिचरणीयः शूद्रोप्यार्यकर्मा
चेदनार्यकर्मभिरितरैर्नाप्यपकर्षेणावमंतव्य इति एतेन ब्राह्मणक्षत्रियौ क्षत्रियवैश्यौ च व्याख्यातौ इति श्रीहरदत्तकृतायां गौतमी-
यसूत्रवृत्तौ मिताक्षरायां दशमोध्यायः १० आर्यानार्ययोर्व्यतिक्षेपनिवारयिता राजा अतस्तद्धर्मानाह राजा सर्वस्येष्टे ब्राह्मणवर्जं
राजा अभिषिक्तः सर्वस्य स्वजनपदवर्तिनो जनस्य ईष्टे निग्रहानुग्रहादिषु किमविशेषेणेत्याह ब्राह्मणवर्जं ब्राह्मणान्वर्जयित्वा त-
त्स्त्रैश्च वंतोपि स्वधर्मात्सांत्वनेन स्थाप्याः सर्वक्रियासु स्वातंत्र्यख्यापनार्थं वचनं यथाह नारदः अस्वतंत्राः प्रजाः सर्वाः स्वतंत्रः पृथिवी-
पतिरिति शास्त्राविरुद्धचेष्टत्वादस्य स्वातंत्र्यमित्याह साधुकारी साधुवादी साधुकारी शास्त्राविरुद्धाचरणशीलः साधुवादी व्यवहार-
काले स्वपक्षपरपक्षयोरनुवादी त्रय्यामान्वीक्षिक्यां चाभिविनीतः ऋग्यजुःसामात्मकास्त्रयो वेदास्त्रयी आथर्वणस्तु वेदत्वेपि तन्त्रं भव-
ति तत्रापि हि मंत्राः कृत्यायसंविधा भेदव्यवहारस्य प्रवर्तनानिमित्ताः शांतिपौष्टिकादिप्रमेयभेदानिबंधनो वा आन्वीक्षिकी न्यायविद्या
तयोरभिविनीतो गुरुभिः सम्यग्विनीतः शिक्षितः मनुस्तु त्रैविद्येभ्यस्त्रयीं विद्यात् दंडनीतिं च शाश्वतीं आन्वीक्षिकीं चात्मविद्यां वार्तारंभ-

गौ०सू०वृ०

३८

चलोकत इति शुचिर्जितेंद्रियो गुणवत्सहायोपायसंपन्नः शुचिरंतःपाद्व्यादिदोषास्पृष्टः बहिः स्नानादिपरः जितेंद्रियः स्त्रियो मृगया
पानमित्यादिव्यसनरहितः गुणाश्चारित्रादयः तद्वद्भिः क्षत्रियामात्यादिभिः सहायैः संपन्नः समन्वितः सामादिभिश्चोपायैः संपन्नो देशकालावच्छि
न्नरूपं तेषां प्रयोक्ता सर्वत्र स्यादिति वक्ष्यमाणमपेक्षते समः प्रजासु स्यात् व्यवहारकाले द्वेष्यप्रिययोः समः स्यात् हितं चासां कुर्वीत
आसां प्रजानां योगक्षेमयोरवहितः स्यात् तमुपर्यासीनमधस्तादुपासीरन्नन्ये ब्राह्मणेभ्यः तमेवंगुणं राजानमुपरि सिंहासनादावुच्चैरा
सीनमधस्ताद्भूमावेवोपासीरन् किमविशेषेण न अन्ये ब्राह्मणेभ्यः ब्राह्मणव्यतिरिक्ताः अथ उपासीरन्नित्येव सिद्धे उपर्यासीनमिति स्वभावानुवा
दः सर्वदायमुपर्यासीनो भवति न रहस्यपि भूमाविति तेप्येनं मन्येरन् तेपि ब्राह्मणा एनं राजानं मन्येरन् वागाशीर्वादादिभिः पूजयेयुः वर्णा
नाश्रमांश्च न्यायतोभिरक्षेत् वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचार्यादयः तान् न्यायतो यथाशास्त्रं षष्ठांशादिभागस्वीकारेणाभिरक्षेद
भितो रक्षेत् यथा वर्णाश्रमधर्मानुष्ठाने न निरपायास्ते भवेयुः अथवा न्यायत इति यथा देशादिधर्माणां भंगो न भवति तथा रक्षेदिति अनुलोमाद ३८
यो वांतरप्रभवा वर्णाश्रमेष्वेवांतर्भूताः रक्षणं सर्वभूतानामिति चादिभ्यो रक्षणं सर्वमेवोक्तं इदं तु पुनर्वचनं वर्णाश्रमधर्मेषु संकरो माभूदिति
चलतश्चैतान्स्वधर्मे स्थापयेत् ते यथा उत्स्यादिना स्वधर्माच्चलेयुस्ततश्चलत एतान् स्वधर्म एव निग्रहस्थापयेदिति कस्मात्पुनरसौ करोतीत्याह

प्रक्षालयेदिति श्राद्धकर्म अमावास्यायामित्यारभ्य यच्छ्राद्धकर्म वक्ष्यते तदपि शूद्रस्य कर्तव्यं मंत्रवर्जं भृत्यभरणं भृत्यो भरणीयः पोष्यवर्गस्त
स्य च भरणं कर्तव्यं तेन तदनुरूपमर्थार्जनमप्यस्य कर्तव्यमिति स्वदारवृत्तिः स्वेष्वेव दारेष्वस्य वृत्तिः सजातीयेष्वपि परदारेषु वेश्यासु च प्रसंज
नं दंड्य इति अपर आह स्वदारवृत्तिरेवास्य भवति नाश्रमांतरप्राप्तिरिति परिचर्या चोत्तरेषां उत्तरेषां त्रयाणां वर्णानां परिचर्या शुश्रूषा च
कर्तव्या सैषा वृत्त्यर्थेत्याह तेभ्यो वा वृत्तिं लिप्सेत तेभ्यः परिचारितेभ्यो जीवनं लिप्सेत तत्र पूर्वं पूर्वं परिचरेत् तथा चापस्तंबः पूर्वस्मिन्
पूर्वस्मिन् वर्णे निःश्रेयसं भूय इति तदेव यथा याजनाध्यापनप्रतिग्रहेषु ब्राह्मणस्य मुख्या वृत्तिः प्रतिग्रहस्तथा शूद्रस्य परिचर्या तत्रा
ऋषीणामासनंहीति पि पूर्वस्मिन् पूर्वस्मिन् वर्ण इति जीर्णान्युपानच्छत्रवासःकूर्चानि कूर्चं बृहच्च्यादिदोषप्रसिद्धं जीर्णान्युपभुक्तानि उपानहादीनि परिचरते
६ शूद्राय देयानि अयं तु शुश्रूषवृत्तेः शूद्रस्य नियमो न गृहस्थवृत्तेः तस्य तु वृत्त्यनपेक्षं सामान्याकारेणाविशेषत्वं पुनः प्रकृतमनुसरति उच्छि
ष्टाशनं भोजनपात्रे यदुच्छिष्टमवशिष्टं तदस्याशनं नाब्राह्मणायोच्छिष्टं प्रयच्छेदित्येतत्तु दासविषयं गृहस्थ शूद्रविषयमन्ये तथा च व्या
घ्रः उच्छिष्टमन्नं दातव्यं शूद्राया गृहमेधिने गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने इति शिल्पवृत्तिश्च शिल्पानि चित्रकर्मादीनि
तैरप्ययं वर्तेत अत्र मानवे विशेषः अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिरिति यं चार्य

गो॰स॰वृ॰ मेषां परिहार इति नान्यपि सर्वाण्युपद्रवेयतनो येन किमर्थं तदधीनमस्य यद्येके योगक्षेमं प्रतिजानते न केवलं रक्षणादिविहितानुष्ठानं किं तर्हि
तदधीनमपि दैवोत्पातचिंतके ग्रहवैकृतादौ यत्कर्तव्यं तथा प्रोक्तं तद्दानमपि योगक्षेमं भवति अलब्धस्य लाभो योगः लब्धस्य रक्षणं क्षेमः त
योः समाहारद्वंद्वः आ योगक्षेमः प्रजापतिं दत्त योगक्षेमो नः कल्पताम् इत्यादावेकविंशत्यादिवत् परवल्लिंगता तद्यथा एकश्च विंशतिश्च एक
३९ विंशतिः तं योगक्षेमं प्रतिजानते एके आचार्या इति शांतिपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युदयिकानि विद्वेषणसंवनना
भिचारद्विषद्व्यृद्धिसंयुक्तानि च शालाग्नौ कुर्यात् अत्रापस्तंबोरा शालाविशेषानुवक्ष्याम इति प्रकृत्य वेश्म आवसथः सभेति त्रिस्था
नान्यभिधायाह सर्वेष्वेवाजस्रा अग्नयः स्युरग्निश्चात्र नित्यामथा गृह्मेध इति तेषामन्यतमो त्रशालाग्निर्नोपासनो नापि त्रेताग्निर्गार्ह
पत्यो तेषु त्व तेषां कर्मसु तयोर्नियतत्वात् शांतिसंयुक्तं दैवोत्पातचिंतकस्य चिंतापायनिपुण्यर्थं यत्क्रियते गृहशांतिमहाशांत्यादि
पुण्याहसंयुक्तं दिनदोषनाशाय विवाहादौ यत्क्रियते स्वस्त्ययनसंयुक्तं यात्रादौ यत्क्रियते आयुष्यसंयुक्तं जन्मनक्षत्रादावायुष्यवृद्ध्य ३९
र्थं यत्क्रियते दूर्वाहोमादि मंगलसंयुक्तं ग्रहप्रवेशादौ यत्क्रियते वास्तुहोमादि एतानि आभ्युदयिकान्यभ्युदयनिमित्तानि विद्वेष
णसंयुक्तं येनास्य शत्रुप्रकृतीनां विद्वेषो भवति संवननसंयुक्तं येनास्य शत्रवो वश्याः प्रणिपतंति अभिचारसंयुक्तं येनास्य शत्रवो म्री

यंते कृष्टेर्भावो द्विषद्व्यृद्धिः द्विषतां व्यृद्धिर्द्विषद्व्यृद्धिः येनास्य शत्रवो विगतैश्वर्या भवंति उच्चाटनादीनि एतानि च शालाग्नौ कुर्यात् । कः राजा । तस्य
कर्तृत्वमिदमेव यद्युक्तसंविधानं त्वमर्थप्रदानादिना । तद्यथा । यो पृथक्ता नेतृत्वमासीनो भक्तं बीजबलिवर्द्दैः प्रतिसंविधत्ते सोप्युच्यते पंचभि
र्हलैः कृषतीति । अपर आह । आभ्युदयिकानि पुरोहितः स्वयं कुर्यात् इतराणि कारयेत् इति । यस्मिंश्चाभ्युदयिकानि न नयेत तताए
कुर्वंति किं सम्यंतरे । इष्टोक्तानामन्यतरस्मिन् । पयोक्तमृत्विजोन्यानि । अन्यानि गार्ह्याणि श्रौतानि च तानि कर्माणि यथोक्तं य
स्मिंश्च कर्मणि यावंतः ऋत्विज उक्तास्तत्रावंतः कुर्युः । तद्यथा । औपासने चाग्निहोत्रे चाध्वर्युरेकः दर्शपूर्णमासयोश्चत्वारः चातुर्मास्ये
ष्वपि पशुबंधे षट् ज्योतिष्टोमादौ षोडश । अत्र मनुः । पुरोहितं च कुर्वीत वृणुयादेव चार्त्विजः इति । तत्रैव श्रौतकर्मसु पुरोहितोऽध्वर्यु
र्भवति अन्ये । तस्य व्यवहारो वेदो धर्मशास्त्राण्यंगान्युपवेदाः पुराणं । व्यवहरत्यनेनेति व्यवहारः । तस्य राज्ञः प्रजापालनेऽधिकृतस्य
वेदादीनि व्यवहारसाधनानि । यथा वेदादिषु अभिहितं तथा व्यवहरेदिति । व्यवहारो लोकमर्यादास्थापनं । देशजातिकुलधर्माश्चाम्ना
यैरविरुद्धाः प्रमाणं । देशधर्मेषु जातिधर्मेषु कुलधर्मेषु च स्वर्गादि नियतमनुष्ठीयमानेषु यद्यपि वेदादिमूलभूतं नोपलभ्यते तथापि
यदि वेदादिभिर्विरोधो न भवति तथैव परिपालनीयाः । न तु म्लेच्छानुयोगेन विहितं तयाद्धिति । तत्र देशधर्मा मेषसंस्थे सवितरि दोले

गौ॰सू॰ट॰

सुकुमार्यो नानावर्णै रजोभिर्भूमावादित्यं सपरिवारमभिलिख्य मासं प्रातः पूजयंति मार्गशीर्ष्यां चालंकृता ग्रामे पर्यटयंत्युद्धर्ष्यं त देवायुनिवे
दयंते। कर्कटस्थे सवितरि पूर्वयोः फल्गुन्योः भगवतीं गुमामाराध्य यथाविभवमरुद्धां शंकुरिका भमुद्गा क्लुठवर्णं च प्रयच्छंति। मीनस्थे च
सवितर्युत्तरयोः फल्गुन्योर्गृहमेधिन्यः श्रिया देवीं पूजयंति। जातिधर्मो ग्राम्येऽपि विवाहमध्ये स्थूणां निखाय तत्र संपूर्त रेकस्यां त्वि
४० त्यां निधाय शतवातदीपानारोप्य वधूं हस्ते गृहीत्वा त्रिःप्रदक्षिणयति। अन्यदप्येवं जातीयकं द्रष्टव्यं। कुलधर्माः केचिन्मध्ये शिखाः
केचित्पृष्ठशिखाः प्रवचनादयस्तत्कालभेदेनाभ्ययनः शिखाः संबंधश्चैते तैः स्वस्वगैरिति। यत्त्वाम्नायाविरुद्धा मातुलसुतापरिणय
नं। अनधीत्य वेदानन्य आश्रम इत्यादयो देशधर्मा नेह प्रमाणं   कर्षकवणिक्पशुपालकुसीदिकारवः स्वेस्वे वर्गे   कर्षकाः कृषिजी
विनः वणिजः क्रयविक्रयव्यवहारपराः पशुपालाः गोपालाः कुसीदिनो वार्धुषिकाः कारवस्तक्षरजकादयः एते स्वेस्वे वर्गे स्ववर्गसंवेदे
प्रमाणं। ततश्च कर्षकादिषु विप्रतिपन्नेषु सत्सु   तेभ्यो यथाधिकारमर्थान्प्रत्यवहृत्य धर्मव्यवस्था   तेभ्यस्तद्वर्गेभ्यो यथाधिकारं ४०
येऽत्र वर्गेषु वक्तार एकलेनाधिकृतास्तेभ्यो यथानाचारप्रकारानत्रान्ययवहृत्य श्रुत्वावधार्य धर्मव्यवस्था कार्या। इदमस्माकं निकाय
आचार इति तेन क्लेन तथैव व्यवस्थाप्यमिति अथ ते पक्षपातेन मिथ्या ब्रूयुस्तदा कथं तत्वं ज्ञातव्यं   न्यायाधिगमने तर्कोऽभ्युपायः   न्या

धर्मस्य षष्ठांशभाग्भवतीति विज्ञायते   हि यस्मात् रक्षितो धर्मस्यांशो भवति उपलक्षणमेतत् अरक्षितादधर्मस्यांशो भवतीति द्रष्टव्यं अत्र म
नुः सर्वतो धर्मषड्भागो राज्ञो भवति रक्षणात् अधर्मस्यापि षड्भागो भवत्यस्य ह्यरक्षणादिति   ब्राह्मणं च पुरोदधीत विद्याभिजनवाग्रूपवयः
शीलसंपन्नं न्यायवृत्तं तपस्विनं   स एव बहुश्रुतो भवति न्यायेभ्यो व्याकरणादिविद्या विशिष्टकुले जन्माभिजनः वाक् संस्कृता भारती रूपमनो
हरं वयो मध्यमं नातिबालो नातिवृद्ध इति शीलमंतःकरणशुद्धिः बाह्यं चानुष्ठानं एतैर्विद्यादिभिः संपन्नं समृद्धं न्यायवृत्तं लोकाविरु
द्धाचारं तपस्विनमभोगपरं एवंभूतं ब्राह्मणं पुरोदधीत पुरोहितं कुर्वीत सर्वेषु कर्मसु पुरो धीयत इति पुरोहितः तदुद्दर्शयति   तत्प्रसूतः क
र्माणि कुर्वीत   तेन पुरोहितेन प्रसूतोऽनुज्ञातः इदमित्थं कर्तव्यमिति तेनोपदेशः कर्माणि श्रौतस्मार्तादीनि पौराणिकानि नित्यनैमि
त्तिकानि शांतिकपौष्टिकान्यभिचारिकाणि कुर्वीत तत्प्रसूतत्वस्य मूलत्वेन ब्राह्मणमाकर्षति   ब्रह्मप्रसूतं हि क्षत्रमृध्यते नव्य
थत इति च विज्ञायते   ब्रह्मणा ब्राह्मणेन प्रसूतमनुज्ञातं हि क्षत्रं क्षत्रियकर्तृकमृध्यते समृद्धं भवति न व्यथते न कुतश्चिद्धीति निरपायं
स्यादित्यर्थः इति एवंप्रकारेण विज्ञायते परंपरया दृश्यते   यानि च दैवोत्पातचिंतकाः प्रब्रूयुस्तान्याद्रियेत   दैवचिंतको ज्योतिर्विदः
उत्पातचिंतकाः शाकुनज्ञाः उत्पातानां ये फलानि जानंते नियमं ब्रूयुरिदमद्य ग्रहवैकृतमिदमद्य दुःशाकुनमयमद्योत्पात इति त्रय

गौ॰ सू॰ वृ॰

॥४९॥

दमनं भवति तावदेव प्रयोक्तव्यं धिग्दंडादीनामन्यतमं अत्र मनुः धिग्दंडं प्रथमं कुर्याद्वाग्दंडं तदनंतरं तृतीयं धनदंडं वधदंडमतःपरं देवदानव
गंधर्वा रक्षांसि पतगोरगाः तेपि भोगाय कल्पंते दंडेनैव निपीडिता इति अथ वक्ष्यमाणवचनत्रयस्याप्राप्तावसरस्य श्रूयमाणानां वर्णानामाश्रमा
णां चकासिद्धिरित्यत आह वर्णाश्रमाश्च स्वधर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्त
वित्तसुखमेधसो जन्म प्रतिपद्यंते वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचर्यादयः ते स्वधर्मनिष्ठा वर्णप्रयुक्ता नाश्रमप्रयुक्ता नुभयप्रयुक्तांश्च ध
र्माननुतिष्ठंत एवं ततः प्रेत्य मरणेन लोकांतरं गत्वा तस्य तस्य कर्मणः फलं स्वर्गादिकमनुभूय ततस्तदनंतरं शेषेण भुक्तावशिष्टेन कर्मणा वि
शिष्टदेशाधिकं भूत्वा जन्म प्रतिपद्यंते अत्र विशिष्टशब्दो देशादिभिः सर्वैः संबध्यते विशिष्टदेशो आर्यावर्तादिः विशिष्टजातिः ब्राह्मण
जातिः विशिष्टकुलं वेदाध्ययनादिसंपन्नं विशिष्टं रूपं कांतिमत् रोगरहितत्वमथायुषो विशेषः विशिष्टश्रुतं ब्राह्मणाश्च बहुश्रुततद
न्यत्र व्याख्यातं विशिष्टवृत्तमनुपाधिचारित्रं विशिष्टवित्तं धर्मार्जितं धर्मेण प्रयुज्यमानं च विशिष्टसुखं निरपायस्त्रकानाधिष्ठानेना
निषिद्धसुखसेवनं विशिष्टमेधा ग्रंथार्थयोर्ग्रहणशक्तिरिति मेधाशब्दः सकारांतत्वमार्षं सुमेधसो दुर्मेधस इत्यादिष्वेव दर्शनात्
कर्माणि भुज्यमानानि पुण्यान्यपुण्यानि च सशेषाण्येव भुज्यंते ऐहिकस्य शरीरग्रहणादेरपि पुण्यापुण्यानिबंधनत्वात् विष्वंचो ॥४९॥

विपरीता नश्यंति ये वर्णाश्रमाः स्वानि कर्माणि यथावच्चानुतिष्ठंति ते विपरीता विष्वंचो नानायोनीर्गच्छंतो नश्यंत्यनर्थपरंपरामनुभवंति तान
आचार्योपदेशो दंडश्च पालयते तान् विपरीतान् यथोक्तमकुर्वतो वर्णानाश्रमांश्च आचार्योपदेशस्तावत्पालयते तत्रातिष्ठतो राजदंडः च
एवं तस्माद्राजाचार्यावनिंद्यावनिंद्यौ तस्माद्धेतोः राजाचार्यौ मान्यौ अनिंद्यावितियद्यपि नियमनकाले हितेषितया प्रमुखपुरु
षा न भवतस्तथापि तयोर्निंदा न कार्या इति श्रीहरदत्तकृतायां गौतमीयसूत्रवृत्तौ मिताक्षरायामेकादशोध्यायः ११ दंडेना
दांतान् दमयेदित्युक्तं तत्र किं यत्नरोधे क्रियानुदंड इत्यत आह शूद्रो द्विजातीनभिसंधायाभिहत्य च वाग्दंडपारुष्याभ्यामंगं
मोच्यो येनोपहन्यात् शूद्रश्चतुर्थो वर्णो द्विजातीन् ब्राह्मणादीन् त्रीन् वर्णान् पारुष्येणाभिसंधायाभिभूय दंडपारुष्येणाभिहत्य च
अभिसंधिपूर्वः बुद्धिपूर्वं ताडयित्वा दंडग्रहणं हस्तादेरप्युपलक्षणं एवं कुर्वन्नंगं मोच्यो वयवेन वियोजनीयः येनांगेनोपहन्यात्
पराधं कुर्यात्तदंगं मोच्यः हस्तेन ताडने हस्तच्छेदः पादेन ताडने पादच्छेदः वाचा जिह्वाच्छेदः अत्र मनुः येनांगेनावरो वर्णो ब्राह्मणस्या
पराधुयात् तदंगं तस्य छेत्तव्यं तन्मनोरनुशासनमिति पारुष्यग्रहणात् परिहासेनाप्रियवचनेपरिहासादिना ताडने च न दंडो भव
ति आर्यस्त्र्यभिगमने लिंगोद्धारः स्वहरणं च शूद्र इति प्रकृतं षष्ठ्यंततमपेक्षते आर्याः त्रैवर्णिकास्तेषां स्त्रियं शूद्रोभिगच्छेत्त
स्य लिंगोद्धारो लिंगोत्पाटनं कार्यं यच्च यावच्च स्वं तस्य तच्च हरणं दंडः आर्यग्रामनस्येव सिद्धे स्त्रीग्रहणमार्यगृहीतायाः शूद्रायामपि भि

गौ० सू० वृ० तिसूचनार्थं तत्र वैश्यस्य क्षत्रियायां संग्रहणे क्षत्रियायां लिंगोद्धारः ब्राह्मण्यामुभयमिति गोप्ता चेद्वधोऽधिकः स यदि शूद्रस्तासां गोप्ता रक्षिता भ
वति तदा वधः कार्यः अधिग्रहणात्पूर्वोक्तात् दंडद्वयमपि भवति अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे
जिह्वाच्छेदो धारणे शरीरभेदः अथ हेति वाक्यालंकारे उपश्रुतिबुद्धिपूर्वमक्षरग्रहणमुपश्रवणं अस्य शूद्रस्य वेदमुपशृण्वतस्त्र
४२ पुजतुभ्यां त्रपुणा जतुनी च द्रवीकृतेन श्रोत्रे प्रतिपूरयितव्ये उपश्रवणमात्रेण यदृच्छया ध्वनिमात्रश्रवणे न दोषः सह वेदद्विजातिभिः स
ह वेदाक्षराण्युदाहरेदुच्चारयेत्तस्य तस्य जिह्वाच्छेद्या धारणे सत्यपि दान्यगतोऽपि स्वयमुच्चारयितुं शक्नोति ततः परश्वादिना शरीर
मस्य भेदः आसनशयनवाक्पथिषु समप्रेप्सुर्दंड्यः शूद्रो द्विजातिभिः आसनादिषु द्विजातिभिः सह साम्यं प्रेप्सति न तुल्यभावं ततोऽसौ दं
ड्यः दंडश्चापस्तंबेन दर्शितः वाचि पथि शय्यायामासन इति समीभवतो दंडताडनमिति दंडेनासौ ताड्य इति अत्र मानवे विशेषः
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः कट्यां कृतांको निर्वास्यः स्फिजं वाऽस्यावकर्तयेदिति शतं क्षत्रियो ब्राह्मणाक्रोशे ४२
क्षत्रियश्चेद्ब्राह्मणमाक्रोशेद्वा पारुष्ययानिंदेत्ततः शतं दंड्यः दंडप्रकरणे सर्वत्रानाधिकस्य कार्षापणस्य ग्रहणमिति स्मार्तो व्य
वहारः शतं कार्षापणानि दंड्यः दंडपारुष्ये द्विगुणं यथाह बृहस्पतिः वाक्पारुष्ये कृते यस्य यथा दंडो विधीयते तस्य वा द्विगुणं

प्रयुक्तस्यार्थस्याधिगमे वधारणे तर्कोऽनुमानमभ्युपायः अभिधातव्यर्थानुवादी तत्र मनुः आकारैरिंगितैर्गत्या चेष्टया भाषितेन च नेत्रवक्त्रवि
कारैश्च गृह्यतेऽन्तर्गतं मन इति ततश्च तेनाभ्यूह्य यथास्थानं गमयेत् तेन तर्केणाभ्यूह्य एवमयमर्थो भवितुमर्हतीति निश्चित्य यथास्था
नं यत्र पक्षेऽर्थः तत्र गमयेत् अथात्मन एकाकिनस्तर्केणापि दुरधिगमत्वे सति विप्रतिपन्ने त्रैविद्यवृद्धेभ्यः प्रत्यवहृत्य निष्ठां गमयेत्
विप्रतिपन्नोऽसन्त्यां दुरधिगमत्वे सति त्रैविद्यवृद्धान् समानाय्य तैर्विचार्यार्थतत्त्वं तेभ्यः प्रत्यवहृत्य निष्ठां गमयेत् यत्र पक्षेऽर्थो निष्ठितस्तं
गमयेत् किमेवं कुर्वतो भवति तथा ह्यस्य निःश्रेयसं भवतीति एवमस्य निर्णयं कुर्वतो निःश्रेयसमुभयोर्लोकयोर्भवति इह प्रजानुरा
गेणामुत्र धर्मप्राप्त्या च इति हेतौ न केवलं राज्ञ एव सिद्धिः किं तर्हि तेह निर्णयतां ब्राह्मणानामपीति दर्शयितुं श्रुतिमुपाहरति
ब्रह्म क्षत्रेण पृक्तं देवपितृमनुष्यान्धारयतीति विज्ञायते ब्राह्मणैस्त्रैविद्यवृद्धैः संपृक्तं क्षत्रेण पृक्तं राज्ञा सह धर्मं विविंचद्देवपितृमनुष्याननु
धारयतीति सिद्धं एवं हि निर्णये कृते यथोक्तं कर्माणि तिष्ठंति मनुष्याः तत्र धर्म्यकर्मदेवा उपजीवंति पितरश्च नष्टीयं तद्देनन्यायेन सर्वेषां
धारणं भवतीति अथ दोषी नापराधव्यवस्थामनुवर्ततेऽतः दंडो दमनादित्याहुस्तेनादांतान्दमयेत् दमनयोगाद्दंडशब्दस्य दं अ
डमित्याहुः धर्मज्ञास्तेनादांतानवश्यान्दमयेद्दण्डं नयेत् दंडेनादांतान्दमयेदित्येव सिद्धे दंडो दमनादिति योगप्रदर्शनं यावता यस्य

कस्मादिदमेवमित्याह विदुषोतिक्रमेदंडभूयस्त्वं यथायथावर्णोत्कर्षेणविद्योत्कर्षस्तथातथाविहितातिक्रमेदंडभूयस्त्वंभव
तिनिषेधदोषंज्ञात्वापिप्रवर्तमानस्यदोषाधिक्यंभवति अजानतस्त्वंधकूपपतनवस्तुयहास्ति अष्टापाद्यमित्यादेरपवादः फल
हरितधान्यशाकादानेपंचकृष्णलमल्पे फलमाम्रादि हरितधान्यंक्षेत्रेवस्थितंव्रीह्यादि शाकंवास्तुकादि एतेषांस्तेयेनादानेपंच
कृष्णलदंडः कृष्णलंगुंजाबीजप्रमाणं माषोविंशतिभागस्तुज्ञेयःकार्षापणस्यहि कृष्णलस्तुचतुर्थांशोमाषस्यैषःप्रकीर्तितइतिपंचा
नांकृष्णलानांसमाहारःपंचकृष्णलं अल्पंतच्चेत्फलादि अल्पमुदरपूरणमात्रं अधिकेत्वष्टापाद्यमेव पशुपीडितेस्वामिदोषः
पशुभिरुपहतेसस्यादौपशुमतोदोषोदंडः दंडपरिमाणंतुवक्ष्यति पालसंयुक्तेतुतस्मिन् सचेत्पशुःपालायस्वामिनासमर्पि
तस्तदातस्मिन्पालेदोषः पालयतीतिपालः इदंप्रमादकृते बुद्धिपूर्वंतुद्विगुणोदंडः तथास्मृत्यंतरेदर्शनात् पथिक्षेत्रेनावृतेपा
लक्षेत्रिकयोः क्षेत्रिकःक्षेत्रवान्यस्यक्षेत्रंपथ्यनावृतंभवतितत्रपशुपीडितेपालक्षेत्रिकयोरुभयोर्दंडःपालस्यानवधानात्क्षेत्रिक
स्यवृत्यकरणाद्वृत्तिश्चात्रकर्तव्यायथोष्ट्रोनावलोकयेदितिमानवेदर्शनात् दंडपरिमाणमाह पंचमाषागवि उष्ट्रानसामाषोदशैतःमा
षोविंशतिभागस्तुज्ञेयःकार्षापणस्यहि काकिणीतुचतुर्थांशोमाषस्यैवप्रकीर्तितइति माषाःपंचगोपीडितेसस्यादौदंडः षडुष्ट्रखरो

ष्ट्रकवड्वाचः उष्ट्रखरेतूपहंतरिप्रत्येकंषण्माषादंडः अश्वमहिषोर्दश लिंगमविवक्षितं अश्वेमहिषेचप्रत्येकंदशमाषाः अजादिषुद्वौ
द्वौ अजेषुविषुचोपहर्तृषु द्वौद्वौमाषौ संभूयचरंतीतिबहुवचनंप्रत्यजंप्रत्यविचद्वौद्वौदंडइति सर्वविनाशेशदः यथापुनःप्ररोहोनभ
वतितथासर्वविनाशेशदोदंडः शदइतिभोगाभिधानं यावांस्तत्रभोगउत्पन्नस्तस्यतेनावत्स्वामिनेदेयंराज्ञेचानुरूपोदंडः शिष्टाकरणेप्रति
षिद्धसेवायांचनित्यंचैलपिंडादूर्ध्वंस्वहरणं शिष्टविहितंनित्यंशिष्टस्याकरणेनित्यंचप्रतिषिद्धसेवायांचैलपिंडादूर्ध्वंचैलमाच्छादनं
पिंडोग्रासस्ताभ्यामूर्ध्वंयावतातयोर्निवृत्तिस्ततोधिकंयत्स्वंतस्यहरणंकार्यंआचारनाशार्थंयत्किंचित्परिहाप्यावशिष्टमस्यस्वंहर्त
व्यमिति एवमतानिवृत्तेः अदत्तादानविषयेअपवादमाह गोभ्यर्थंतृणमेधान्वीरुद्वनस्पतीनांचपुष्पाणिचस्ववदाददीतफलानि
चापरिवृत्तानां आग्निहोत्रिस्मार्ताग्निर्लौकिकः गवार्थंतृणानिअग्न्यर्थमेधांसिवीरुद्वनस्पतीनांलतानांवृक्षाणांपुष्पाणिदेवार्चनार्था
निनोपभोगार्थानिगवाग्निसाहचर्याद्देवतार्थानीतिगम्यते एतानितृणादीनिस्वामिभिरदत्तान्यपिस्ववदाददीत यथास्वामीनिःशंक
मादत्तेतद्वदाददीत नतुवीरुद्वनस्पतीनामपरिवृत्तानांतेषांफलान्यपिस्ववदाददीतनस्वाम्यपेक्षा फलविषयमेतदपरिवृतत्वंनतुतृणादिविष
यंपृथग्वाक्यत्वात् कुसीदवृद्धिर्धर्म्याविंशतिःपंचमाषिकीमासं वृध्यर्थप्रयुक्तस्यद्रव्यस्यकुसीदसंज्ञा माषःकार्षापणस्यविंशा

मी०स्मृ०टी० तिगमो भागः इत्युक्तानोक्तं ॥ पंचमाषाद्यधिरूपेणादीयंते यत्राशीतौ माषपंचमाषिकी ॥ नदास्मिन्नृः ... लाभः शुक्लोपदादीयन इत्यत्राथ प्राग्व
हेनष्टकं ॥ अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायामिति लुक् प्राप्तेन कृतः स्याच्छंदो घां दृष्टीणां कार्षापणानां पणानां वा विंशतिः प्रतिमासं पंचमाषिकी
यथा भवति तथा भवंती कुसीदवृद्धिर्धर्म्या धमर्णिपता ॥ अत्र मनु ॥ वशिष्टप्रहितां वृद्धिं सृजेद्वित्तविवर्धिनी ॥ अशीतिभागं गृह्णीयान्मा
४४ सादाधुर्षिकः शतद्विंति ॥ अशीतिपीयमेव वृद्धिरुक्ता ॥ कथं पणस्याविंशति भागो माषः पणानां विंशतिश्चतुःशीतिमाषाणां संपद्यते चतुःश
त्याः पंचमाषा शीतिस्त्रीनेरेकः पंचस्रानीतियश्चतुर्थानीति याज्ञवल्क्यस्तु ॥ अशीतिभागो वृद्धिस्यान्मासि मासि सबंधके ॥ वर्णक्रमाच्छतं
द्वित्रिचतुःपंचकमन्यथेति विश्वासार्थं यदाधीयते सुवर्णादि तद्बंधकं तद्युक्ते धनप्रयोगे वर्णानुपूर्व्याद्ब्राह्मणादिषु धमर्णेषु धनी द्वि
त्र्यादिषु क्रमाद्भवति ॥ नानि संवत्सरीमेके ॥ य यमशीतिभागलक्षणे धर्म्यावृद्धिस्तामीतिसांवत्सरीं संवत्ते ऐतिकाने भवां भ दृष्टी
यात् एकस्मिन्नेव संवत्सरे प्रतिमासं अशीतिभागो ग्राह्यः ततः ऊर्ध्वं किंचिदपि न ग्राह्यं एषा धर्म्या भवतीत्येके मन्यंते अतिसांवत्सरीमि ४४
ति सूर्यसिद्धिः ॥ चिरंस्याचमनमाह ॥ चिरस्थाने द्वैगुण्यं प्रयोगस्य ॥ यावता कालेन प्रयुक्तं धनं द्विगुणं भवति तावंतमेव कालं धर्म्या
बध्योवर्धते नातः परमिति सुवर्णादिद्रव्यविषयमेतत् अत्र वसिष्ठः ॥ द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याता वृक्षमूल

दंडं कारयेत्प्रणाहत इति ॥ अध्यर्धं वैश्यः ॥ वैश्यस्तु ब्राह्मणाक्रोशे अध्यर्धशतं दंड्यः ॥ अर्थाधिकं पंचाशदधिकं शतं दंड्यः ॥ ब्राह्मण
स्तु क्षत्रियेपंचाशतं ॥ क्षत्रियाक्रोशे ब्राह्मणस्तु पंचाशत्पणान्दंड्यः ॥ तदर्धं वैश्ये ॥ वैश्याक्रोशे तदर्धं पंचविंशतिपणान्दंड्यः ॥ न
शूद्रे किंचित् ॥ शूद्रे त्वाक्रुष्टे न किंचिदपि द्रव्यं ब्राह्मणो दंड्यः तदिदं न वक्तव्यमवचनादेव दंडाभावः सिध्येत् किंतु क्षत्रियवैश्ययोः शूद्राक्रोशे
दंडप्रापणार्थमुक्तं तदुक्तं मनुना शूद्राक्रोशे क्षत्रियश्चतुर्विंशतिपणान्दंडभाक् वैश्यः षड्विंशतिरिति ॥ ब्राह्मणराजन्यवत् क्षत्रि
यवैश्यौ ॥ ब्राह्मणराजन्ययोः परस्पराक्रोशे यादृशो दंडस्तादृशः क्षत्रियवैश्ययोः परस्पराक्रोशे ॥ ततश्चैवं सूत्रमूहितव्यं शतं वैश्यः
क्षत्रियाक्रोशे क्षत्रियस्तु वैश्ये पंचाशदिति एवमंतरप्रभवेष्वपि द्रष्टव्यं ॥ अत्र जगद्भिः मातृतुल्यमनुलोमानां पितृमूल्यं प्रतिलोमानां
मिति ॥ उक्तः साहसदंडः स्तेयदंडमाह ॥ अष्टापाद्यं स्तेयकिल्बिषं शूद्रस्य ॥ स्तेयं चौर्यं स्तेयापात्तं द्रव्यं किल्बिषमित्यनंतराकिल्बि
षमित्युच्यते स्तेयापात्तं द्रव्यं अष्टगुणमादापनीयः शूद्रस्य कर्ता ... षष्ठ्यर्थास्ते यत्किल्बिषं शूद्रोष्टगुणमादापयितव्यो राजा तेदंडरूपेण प्राप्तं
पादयेदिति तत्रैकगुणं स्वामिने देयं शेषं राज्ञः उक्तं हि चौरहृतमवजित्येत्यादिना ॥ द्विगुणान्तराणि इतरेषां प्रतिवर्णं ॥ इतरेषां वैश्यादीनां
स्तेयकिल्बिषाणि प्रतिवर्णं द्विगुणान्तराण्यापादनीयानि वैश्यस्य षोडशगुणं क्षत्रियस्य द्वात्रिंशद्गुणं ब्राह्मणस्य चतुःषष्टिगुणमिति

ओ॰मू॰द॰ भोगमधिकृत्य कृतं तद्यथाधिको भोग वृद्धिः तत्राप्येष एवार्थः ॥ एतासु च कुरव्यादिषु वृद्धिर्द्वैगुण्यात्परमपि भवत्येव ॥ ४ ॥ कु
सीदं पशुपज्ञ्जोमक्षेत्रशादवाह्येषु नातिपंचगुणं ॥ पशोरुपजातं पशुस्यत्तं घृतक्षीरादि ॥ कुणीके बलवामरवालुव्यञ्जनादि
॥४५॥ लोम क्षेत्रजं तत्र क्षेत्रभोगः बलीवर्दादि वाह्यमिति प्रायेणापवर्तते तत्राप्येष एवार्थः एतेषु पशूपजातिषु प्रयुक्तेषु तत्कुसीदं यावत्
पंचगुणं वर्धते तं पंचगुणं नातियाति अपरस्त्वाह पशूपजातिषु मूल्यत्वेन कल्पितस्य द्रव्यस्य तदानीमप्रदाने यावत्तत्पंचगुणं वर्धते धर्म्या
या च वृध्या पंचगुणानां नात्येति अजडापोगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुः जडः उन्मत्तः पोगण्डो अप्राप्तव्यवहारः यो जडो न
भवति पोगण्डो वा न भवति तस्य धनं परैस्तत्सन्निधावेव दशवर्षाणि भुक्तं भवति तदा तद्धनं भोक्तुरेव स्यादिति निश्चीयते स एव भोगस्वा
मिनः सकाशाद्दानादिरूपेण तस्य धनस्य निर्गतिं सूचयति कथमपरथा तावन्तं कालमर्थपरे लोके तूष्णीमासीतेति अत्र क्षेत्रविषये या
ज्ञवल्क्यः पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी परेण भुज्यमानाया धनस्य दशवार्षिकीति पश्यन्नन्यस्य ददतः क्षितिं यो न निवा
रयेत् स्वामी सन्नपि लेख्येन न स तल्लब्धुमर्हतीति बृहस्पतिः अत्र मनुः यत्किंचिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी भुज्यमानं परैस्तू
ष्णीं न स तल्लब्धुमर्हतीति अनागमं तु यो भुंक्ते इत्यादीनि च संनिधिविषयाणि जडादिविषयाणि वा अस्यापवादः न श्रोत्रियप्रव्र

जितराजपुरुषैः श्रोत्रियादिभिर्भुज्यमानं न भोगमात्रात्तेषां भवति पेक्षाकारणोपपत्तेः श्रोत्रियप्रव्रजितो धर्मतस्तद्युपेक्षेते । राज
पुरुषस्तु भयेन राजपुरुषग्रहणं बलवतामुपलक्षणं एतेन साहसिका व्याख्याताः अपरिग्रहस्यापि प्रव्रजितस्य स्वस्वामिकेऽन्यग्रहाद्दु
पभोगः संभवति पशुभूमिस्त्रीणां नातिभोगः पशवश्चतुष्पादाः भूमिः क्षेत्रादिका स्त्रियः परिचारिकादास्यः पश्वादीनां स्वत्वेन नातिभो
गोपेक्षितः अल्पेनापि भोगेन भोक्तुः स्वं भवति कथमनंतरगृहे दृश्यमानां गां स्वयं तत्कालादिक्रीतोपपन्नीतमुपेक्षेत कथं वा वकुप
ठमारामकं वा दासीं यौवनस्थां अन्यगृहे परिचारिकां रिक्थभाजः ऋणं प्रतिकुर्युः ये यस्य रिक्थभाजः ते तदृणं प्रतिदद्युः पुत्रपौत्रैः
रिक्थाभावेऽपि देयं तथा बृहस्पतिः ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं पैतामहं समं देयं न देयं तत्सुतस्य हीति नारदः क्रमादव्या
गतं प्राप्तं पुत्रैर्यदृणमुद्धृतं दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते याज्ञवल्क्यः पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा पुत्रपौत्रैर्ऋ
णं देयं निह्नवे साक्षिभावितं प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदंडजान् पुत्रान्नाध्याभवेयुः अत्र नारदः उपस्थानाय दानाय प्रत्यया
य प्रत्ययायतश्चैव त्रिविधः प्रतिभूर्दृष्टस्त्रिष्वेवार्थेषु सूरिभिरिति तस्य प्रतिभुवि प्रेते दायादानपि दापयेदिति विष्णुयाज्ञवल्क्यादु
र्शने प्रत्यये दाने प्रातिभाव्यं विधीयते आद्यौ तु वितथे दाप्याविततरस्य सुता अपीति तस्मादिदमपि दाने प्रतिभूर्व्यतिरिक्तविषयं
द्रष्टव्यं अहमेनं दर्शयिष्यामीति प्रतिभाव्यत्वमदर्शयित्वा पितरि प्रेते तत्पुत्रेण सोऽदर्शयितव्य इति वणिग्वणिज्यार्थमुपात्तं द्रव्यं

गो० व० तद्दपि न पुत्रा नध्या भवंति। यं यदा सलाभे धनं मूल्यं दास्यामीति परिभाष्य कस्यचित्सकाशाद्द्रव्यं गृहीत्वा पान्यायदेशांतरगतो म्रियेत तदा त
त्पुत्रैर्न तत्प्रति कर्तव्यमिति। तथा शुल्कं प्रतिश्रुत्य विवाहं कृत्वा मृते तत्पुत्रैर्न तच्छुल्कमध्याप्यं भवति। तथा स्वं दास्यामीति मध्यं वकुप्रीत्या
४६ तेन लुब्धेन न तद्द्याद् तथा द्यूते पराजितः तत्पणद्रव्यमदत्त्वैव यदि म्रियते तदपि न तत्पुत्रो दातुमर्हति। तथा व्यवहारे पराजितो राज्ञे दंडम
दत्त्वैव यदि म्रियते तदा सोपि दंडः पुत्रैर्न ध्याप्य भवंतीति। ॥निध्यन्वाधियाचितावक्रीतादयो नष्टाः नीने दितान्पुरुषापराधेन॥ ॥निधिर्निक्षे
पः स्वद्रव्यं यत्र विस्रंभान्निक्षिपत्यविशंकितः स निक्षेपः अन्वाधिरूपनिधिकामिति स्मृत्यंतरे प्रसिद्धं। तत्र याज्ञवल्क्यः। भाजनस्थमनाख्याय
त हस्तेन्यस्य यदर्प्यते। द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तदिति। याचितं कुंभवाद्याभरणादि। अवक्रीतमदत्तमूल्यं अर्धदत्तमूल्यं वा। आधि
र्जीयाधिः। एते निध्यादयो यदि पुरुषापराधेन विना नष्टा भवंति। चोरादिअरपहृताः सर्वास्तानीनादितानाकुः अदोषनाकुः। न केवलं पुत्रान्ने ४६
यनाध्याप्यवेयुः किं तर्हि येषां सकाशे निक्षेपादयः कृतास्तानपि नाध्याप्य भवंति। आनंदितेति। तेयादपूर्वं दृष्टदोषाः न भवंति तदा सर्वमिदं
पुरुषापधरोस्त्कयदि धारयितारः स्वद्रव्यवन्न रक्षेयुः। यद्यग्निभयादेः स्वद्रव्यं गृहीत्वा निध्यादि उपेक्षेरन्। स्वद्रव्यं वा गुप्तं निधाय बहि
र्निध्यादि स्थापयेयुः एतस्मिन्पुरुषापराधे सति दद्युरेव॥ ॥स्तेनः प्रकीर्णकेशो मुसली राजानमियात्कर्म चक्षाणः॥ ॥स्तेनः सुवर्णस्तेयकृत्
सुवर्णस्तेयकृद्ब्राह्मणो राजानमभिगम्य तु स्वकर्म ख्यापयन्ब्रूयां मां भवाननुशास्त्विति मानवं कीर्णकेशो मुक्तकेशः। आयसं खादिरं वा मुसल सप्र

कालानवस्तुना धृतमष्टगुणमिति विरश्च रूणा स्वहस्तेणापि संवत्सरे नैव द्विगुण्यात्परं वर्धत इति भुक्ताधिर्न वर्द्धेत विश्वासार्थं यदा धीयते कांस्याभरणादि
स आधिः स चेदुपभुक्तः प्रयुक्तोर्थो न वर्द्धते भाग एव तत्र वृद्धिरिति दित्सतो वरुद्धस्य च धनिने धनं दातुमिच्छतो धमर्णस्य धनं न वर्धते धनी वृद्धिलो
भाच्चेन्न गृह्णाति तत्राक्षिप्ते वदिवसे परिहर्तव्य स्यार्थं तत आरभ्य न वर्धते तथा यो दित्सन्नरुद्धं धमर्णो राजादिना वरुद्धस्तस्यापि दातुमसमर्थस्य द्रव्यं
तत आरभ्य न वर्धते अथापदि स्थ्यंतराण्याह चक्रकालवृद्धिः वृद्धिश्च शब्दः प्रत्येकमभिसंबध्यते यावता कालेन यावती वृद्धिस्ता मूलमपि मूली
कृत्य तावतो मूलस्य पुनर्वृद्धिश्चक्रवृद्धिः यथाह नारदः वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति इयतः कालस्य यन्ती वृद्धिरिति यत्र समयेन गृह्यते सा
कालवृद्धिः कारिता कायिका शिखाधिभोगाश्च वृद्धय इति शेषः प्रयोक्तृत्वा ग्रहीत्वा च देशकालकार्याद्यवस्थापेक्षया या प्रभूताल्पा न्यूनाबाध्य यमेव क
ल्पिता वृद्धिः कारयिता कायिका शिखाधिभोगाश्च कायकर्मसंज्ञा ध्या। यथा बृहस्पतिः। कायिका कर्मसंयुक्तेति। याज्ञवल्क्य। दोहवाहादिकर्मभुक्ता कायिका
समुदाहृता इति। शिखावृद्धिं कात्यायन आह। प्रत्यहं गृह्यते या तु शिखा वृद्धिस्तु सा स्मृता। शिखेव वर्धते नित्यं शीर्षच्छेदान्निवर्तते। मूले दत्ते तथैवे
षा शिखावृद्धिस्ततः स्मृतेति। उदाहरणं। तंडुलप्रस्थस्य प्रत्यहं तंडुलमुष्टिर्गृह्यत इति। अधिभोगः आहितस्य क्षेत्रस्य भोगो गृहस्य वस्त्र आधिक्ष
गएवृद्धिः। सा च कालेनापि वत्सरेनैव निवर्तते। तत्र चोत्तमर्णस्य चेन भवति यदा कोट्या विशपमूलप्रदानेना धमर्णस्य भवति। अधिभोग इत्यन्ये।

गो॰ व॰

सं

॥४७॥

दंड्योत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रं पुरोहितः। कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजेति। सचोरसमः सचिवो मतिपूर्वे साचिव्यं प्रतिग्रयाहा
रद्दानादि। साहाय्यं तेनैव मतिपूर्वं चोरोयमिति ज्ञात्वापि यदि साचिव्यं करोति स चोरसमः। चोरवद्दंड्यः। अज्ञाते पुनरज्ञानमेव वारणं। प्रतिग्रही
ताप्यधर्मयुक्ते। अपिशब्दान्मतिपूर्वं चोरोयमिति ज्ञात्वापि यदि साचिव्यं करोति स चोरसमः चोरवद्दंड्य इति वर्त्तते। योन्यस्य द्रव्यमनेन चोरित
मिति ज्ञात्वैव ततः प्रतिगृह्णाति सोपि तस्मिन्नधर्मसंयुक्ते प्रतिग्रहे चोरसमः। प्रकरणादेव सिद्धे अधर्मसंयुक्तग्रहणमन्यत्रापि पापविषय
प्रतिग्रहीतुस्तत्पापं भवतीति ज्ञापनार्थं। पुरुषशक्त्यपराधानुबंधविज्ञानाद्दंडनियोगः। पुरुषा ब्राह्मणजात्यादि। शक्तिरर्थदंडे बहुर्थोल्पार्थ इ
ति। शारीरदंडे दुर्बलप्रबलौ लोकविनिश्चितौ। अपराधः साक्षात्कर्तृत्वं साचिव्य ... वर्तृत्वं चेति। अनुबंधोपायः एतान्पुरुषादीन्विज्ञाय तद
नुरूपो दंडो नियोक्तव्य इति। अनुज्ञानं वा वेदवित्समवायवचनात्। वेदविदां त्रयाणां चतुर्णां वा समवायः संघः। चत्वारो वा त्रयो वापि यं ब्रूयु
र्वेदपारगाः। स धर्म इति विज्ञेयो नेतरेषां सहस्रश इति मनुः। तस्य संघस्य वचनादनुज्ञानं वा कर्तव्यं। अनुपरोधे धर्मो वचनीय इति यदि ते ब्रूयु
स्तदा वयं त्वामनुजानीमस्त्वं गच्छ यथेष्टमिति ॥ इति श्रीहरदत्तकृतायां गौतमीयधर्मसूत्रवृत्तौ मिताक्षरायां द्वादशोऽध्यायः १२ ॥ विप्र ॥४७॥
तिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था। विप्रतिपत्तौ साक्षिणः प्रत्ययास्ते यथोक्तं तथा सत्यव्यवस्थायां। अत्र नारदः। एकादशविधः साक्षी शास्त्रे
दृष्टो मनीषिभिः। कृतः पंचविधस्तेषां षड्विधोऽकृत उच्यते। लेखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च। गूढश्चोत्तरसाक्षी च साक्षी पंचविधः कृतः।

अन्ये पुनरनिर्दिष्टाः साक्षिणः समुदाहृताः। ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणां। कार्येष्वभ्यंतरो यश्च अर्थिना प्रहितश्च यः। कुल्याः कुलविवा
देषु भवेयुस्तेपि साक्षिण इति। ते पुनः कियंतः कीदृशा वा। बहवः स्युरनिंदिताः स्वकर्मसु प्रात्ययिका राज्ञो निष्प्रीत्यनभितापाश्चान्यतर
स्मिन्। वर्णप्रयुक्तान्याश्रमप्रयुक्तान्युभयप्रयुक्तानि स्वानि कर्माणि श्रौतानि स्मार्तानि च। तेष्वनिंदिता अकरणादन्यथाकरणा
द्वा। त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापरा इति याज्ञवल्क्यः। प्रत्ययो विश्वासस्तेन चरंतीति प्रात्ययिकाः य एवंभूता राज्ञामदृष्टदोष
तया विश्वसनीयाः। अर्थिप्रत्यर्थिनोरन्यतरस्मिन्निःप्रीतया निःस्नेहा अनभितापा अकृतदोषाः एवंभूता बहवः साक्षिणः स्युः। उभया
नुमतः साक्षी भवत्येकोपि धर्मविदिति याज्ञवल्क्यः। अभ्यंतरस्तु निक्षेपे साक्ष्यमेकोपि वाच्यते। अर्थिनः प्रहितः साक्षी भवत्येकोपि
याचित इति कात्यायनः। प्रमाणमेकोपि भवेत्साहसेषु विशेषत इति व्यासः। अपि शूद्राः। शूद्रा अप्येवंविधाश्चेत्साक्षिणो भवेयुः किं
पुनर्द्विजातय इति। एवं गुणवद्द्विजात्यभावे शूद्रा अप्येवंविधा भवंतीति द्रष्टव्यं। ब्राह्मणस्त्वब्राह्मणवचनादनवरोध्योनिबंधश्चेत्
ब्राह्मणो नाम श्रोत्रियः। अस्य वृत्तांतस्यासौ ब्राह्मणः साक्षीत्यब्राह्मणेनोक्ते राज्ञासौ साक्षित्वेन नावरोध्यो न निर्बंधेन ग्राह्यः। अनिबंधश्चेत्त
चेत्तु निबंधो भवति लिखितारूढस्तदा भवत्येव साक्षी। नात्र कश्चिद्धेतुरस्ति केवलं वचनमेव प्रमाणं। अत्र नारदः। असाक्ष्यपि हि शास्त्रेषु दृष्टः पंच
विधो बुधैः। वचनाद्दूषिता भेदात्स्वयमुक्तो मृतांतरात्। श्रोत्रियाद्याश्च वचनतः स्तेनाद्या दोषदर्शनात्। भेदाद्विप्रतिपत्तिः स्याद्विवादे यत्र साक्षिणां।

मो०वृ० स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्ययोरदेन। मृतांतरेऽर्थिनि प्रेते मुमूर्षुः श्रावितादृते इति। नहि हश्रोत्रियः कश्चिदपि साक्षी न भवतीति नारदस्यप
क्षः इह ब्राह्मणवचनादित्युक्तत्वाद्ब्राह्मणेनोक्तः श्रोत्रियोऽपि भवत्येव साक्षी। ।नासमवेता दृष्टाः प्रब्रूयुः। ।असमवेता असमुद्गता
ज्ञाप्राड्विवाकेन वा अदृष्टाः संतो न ब्रूयुः किंतु समवेताः पृष्टाः प्रब्रूयुः। ।अवचनेऽन्यथावचने च दोषिणः स्युः। ।तेनैवंभूता यदि
॥४८॥ वचनं ब्रूयुस्तदा दोषिणो दुष्टाः स्युः इह हानिरुक्ता उपरि परत्र नारकिणः स्वर्गः सत्यवचने विपर्ययेन नरकः ब्रुवंतः साक्षिणो यदि सत्यं ब्रुवंति तदा स्वर्गो भ
वति विपर्यये असत्यवचनेन नरको भवतीति अनिबद्धैरपि वक्तव्यं निबद्धा निर्दिष्टाः यूयमत्र साक्षिण इति। तद्विपरीता अनिबद्धास्तै
रपि साक्ष्यं वक्तव्यं। तच्च नारदेनान्यैः पुनरपि निर्दिष्ट इत्यादिस्य कथितं। दूष्यः नपीडाकृते न वधः पीडाकृते पीडाकरणे निबंधो निबं
धनं अर्थसंबंधादृते पीडाकरणे हिंसाविषये साक्षिणां निबंधो न निरूप्यः। अर्थसंबंधादृते न किंचिदपि दूषणं भवति। व्यास आह स्तेये च
साहसे चैव संसर्गे च स्त्रियास्तथा। गरादीनां प्रयोगे च न दोषः साक्षिषु स्मृत इति प्रमत्तोक्ते च प्रमादोऽनवधानं। अन्यपरवाक्यं सा
क्षिणाय दृष्ट्या यदुक्तं तत्रापि निबंधो न भवति। अर्थसंबंधादृते दूषणं न भवति। विपर्ययेन नरक उक्तः। न केवलं साक्षिण एव किं तर्हि साक्षि ४८
सभ्यराजकर्तृषु दोषो धर्मतंत्रपीडायां तंत्रं लौकिकव्यवहारः धर्मतंत्रयोः पीडायां सत्यां साक्षिषु सभ्येषु राजनि कर्तरि च सर्वेषु दोषो भवति क
र्तृग्रहणं दूषणार्थं यावत्कर्तृ दोषस्तावत्साक्ष्यादीनामपीति। यद्यपि साक्षिणः पूर्वं दोष उक्तस्तथापि ग्रहणं सभ्यादीनां ससाक्षिकेऽपि दोष
प्रापणार्थं। अन्यथाऽसाक्षिकव्यवहारे सभ्यादीनां दोषः ससाक्षिके तु साक्षिणामेवेत्युक्तं स्यात्॥ ॥शपथेनैके सत्यकर्म॥ ॥यत्र साक्षिषु

इति स्मृत्यंतरं। तद्वान्। अंसे मुसलमादायेत्यापस्तंबः। राजानमियात् कर्माचक्षाणः एवंकर्मास्म्यनुशाधि मामिति ब्रुवाणः पूतो वधमोक्षाभ्यां वधस्ता
डनं मरणांतिकं। तेनैनं हन्यादित्यापस्तंबः सकृद्देवताडनं। गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयमिति स्मरणात्। मोक्षो मोचनं। पुनरेवंविधं माका
र्षीर्गच्छेति। ताभ्यां वधमोक्षाभ्यां स्तेनः पूतो भवति। हतोऽपि शुध्यति मुक्तोऽपि शुध्यतीति अघ्नन्नेनस्वी राजा यदि दयादिना तं न हन्यात्तदा राजा स्व
यमेनस्वी भवति चोरस्य यदेनस्तदस्य भवतीति। अयं तु दंडो ब्राह्मणवर्जमिति दर्शयति न शारीरो ब्राह्मणदंडः स्वयमुपस्थितस्यापि ब्रा
ह्मणस्य शारीरो दंडो न कर्तव्यः मोक्ष एव। तथा च मनुः। वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव वेति। अत्रैवकारद्बलाद्दनीतस्यापि ब्राह्मणस्य
तपसा मोक्षः। न क्कापि निमित्ते हस्तच्छेदादिकमपि कर्तव्यमित्येवमर्थः। तथा च मनुः। त्रिषु वर्णेषु तानि स्युरक्षतो ब्राह्मणो व्रजेदिति। तपस्विब्रा
ह्मणविषयमिदं। अस्य तु यथापराधं दंडमाह। कर्मवियोगविख्यापनविवासनांककरणानि यथा पुनस्तत्कर्म न करोति तथा करणं क
र्मवियोगः। सर्वस्वहरणं प्रतिभूयस्य हरणमित्यादि। विख्यापनं चौर्यचिह्नेन ग्रामनगरादिष्वाघोषणं विवासनं निर्वासनं यथापराधं ग्रामान्न
गराद्देशाद्वा। अंककरणं चिह्नकरणं। अत्र मनुः। गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः। स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति। एषां
कर्मवियोगादीनामेनस्सु गुरुषु गुरूणि लघुषु लघूनीति न्यायेनापराधरूपाण्यवस्था। एतन्महापातकविषयमिदं। अंककरणं तु तपस्विब्राह्म
णस्यापि भवत्येव। अशक्तोऽप्रायश्चित्तीसः यस्तु राजा चोरविषये चैव दंडको न वर्तते तस्यामेव...यं प्रायश्चित्ती भवतीति। तत्र वसिष्ठः।

अपदिमहा। भूमिविषयो विकल्पः। हरणे नरकः। प्रासंगिकमिदं। भूमीति विपरिणामेन संबंधः। भूमेर्हरणे नरको भवति। कालांतरावधिः। आप्ल
तारावसेयः। प्रकृतमाह भूमिवदप्सु अप्सु विषयेऽनृते भूमिवत्स्वहननदोषः। हरणे नरक इति तु समानं। अपूत्राब्जेन कूपतटाकादि रूपलक्षितः।
मैथुनसंयोगे च मैथुनसंयुक्ते चानृते परदारानयं गच्छतीत्यादौ भूमिवदिति चकाराद्गम्यते पशुवन्मधुसर्पिषोः मधुसर्पिर्विषयेऽनृते पशुवद्दो
षः गोवद्वस्त्रहिरण्यधान्यब्रह्मसु ब्रह्म वेदः वस्त्रादिविषयेऽनृते गोवद्दोषः अधीत्यनास्मान्मयाधीतमित्यादि ब्रह्मानृतं यानेष्वश्ववत् हस्तिर
कटशिबिकादीनि यानानि तद्विषयेऽनृते ऽश्ववद्दोषः अन्येषु तु इत्पश्चनृत इत्यारभ्य साक्षिश्रावणे योजयंति तु इत्पश्चनृतं साक्षिणो दशपुरुषह
ननदोषस्तस्मात्वया सत्यमेव वक्तव्यमिति साक्षी श्रावयितव्य इति। एवं सर्वत्रापि ऋष्टादपि। एवमदृष्टविषये दोषमुक्त्वा दृष्टविषये साक्षिणो दंडमा
ह मिथ्यावचने याप्यादेइय श्रसाक्षी मिथ्यावचने दृष्टसाक्षी याप्यो गर्हितः नवरेऽयमसंव्यवहार्यः दंड्यश्च राज्ञा। अत्र मनुः। लोभात्सहस्रं दंड्यस्तु
मोहात्पूर्वं तु साहसं। भयाद्वौ मध्यमौ दंड्यौ मैत्र्यात्पूर्वं चतुर्गुणं। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं। अज्ञानाद्वे शते पूर्णे बालिश्याच्छतमेव तु। कू
टसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्प्रधार्मिको नृपः। प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेदिति। विष्णुः कूटसाक्षिणां सर्वस्वापहार उक्तो चोपजीविनां से
ति नानृतवचने दोषो जीवनं चेत्तदधीनं यदा सत्यवचनात्परस्य वधः अनृतवचने तु तदधीन मनृतवचनं निबंधनमस्य जीवनं भवति न वध
स्तत्रानृतवचने पूर्वोक्तो न दोष इति। तत्र याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्। तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति ननु

पापीयसो जीवनं यदि त्वनृतवचनेन पापीयसः पापरतस्य परपीडारतस्य जीवनं भवति तदा न तु दोषः दोष एवेति। अथ साक्षिणः केन प्रष्टव्या इत्यत आ
ह राजा प्राड्विवाको ब्राह्मणो वा शास्त्रवित् पृच्छतीति प्राड्विविच्य वक्तीति विवाकः अन्यं करादि न पुद्रकीतादृत्विकुले। राजा प्राड्विवाकः स्यात् अन्य
परे तु तस्मिंस्तेन नियुक्तो ब्राह्मणो वा शास्त्रवित्। तत्र मनुः। यदा स्वयं न कुर्यात्तु नृपतिः कार्यनिर्णयं। तदा नियुंज्याद्विद्वांसं ब्राह्मणं कार्यनिर्णये इति प्रा
ड्विवाकमध्यमवेत् अधिपरिभावे ऐश्वर्ये वा। आज्ञकातार्थे एवमुक्तलक्षणं प्राड्विवाकस्तु पर्यासीनमधीश्वरं वा गुलाभूतः सन्नागच्छत्कार्या
र्थिनं तु प्राड्विवाकः स्वयं कार्यमुत्पाद्यायावृक्षेदिति। तथा च मनुः। नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुष इति संवत्सरं प्रतीक्षेत अप्रतिभायां यदभि
युक्तस्यार्थिनः साक्षिणो वा प्रतिभा भवति वक्तव्यं न प्रतिभाति स्वयं ज्ञाउया हृदुपेतत्वादर्थस्य वा चिरवृत्तत्वादिना दुर्निरूपत्वात्तदा संवत्सरं प्रतीक्षेत ए
तावता कालेनानिरूप्य ब्रूहीति कालं दद्यात्। अत्र कात्यायनः। अस्वतंत्रजडोन्मत्तबालदीक्षितरोगिणां। कालः संवत्सरादर्वाक् त्र्यहमेव यथेप्सितं। नारदः।
गहनत्वाद्विवादानां असामर्थ्यात्स्मृतेरपि। ऋणादिषु हरेत्कालं कामं तत्त्वबुभुत्सया इति। प्रजापतिः दिनमेकमथ द्वे वा त्रीणि वा पंच सप्त वा। कालस्तृण
दो गहने आ त्रिपक्षादपि स्मृत इति। धेन्वनडुत्स्त्रीप्रजननसंयुक्ते च शीघ्रं संप्रयुक्त आद्यः प्रत्यर्थकं संबध्यते। धेन्वादिसंयुक्ते विवादे शीघ्रं वादयेत्
प्रजननं विवाहः तद्धेतुत्वात् स्त्रीदास्यादिः। तथा ह कात्यायनः। धेनावनडुहि क्षेत्रे स्त्रीषु प्रजनने तथा। न्यासे चात्ययिके चैव क्रयविक्रये। कन्या
दूषणे स्तेयकलहे साहसे निधौ। उपधौ कूटसाक्ष्ये च सद्य एव विवादयेदिति। आत्ययिके च व्यपत्तिरर्थं यत्र विनाश शत्याग एव च। कालंतत्र न

कुर्वतः कार्यमात्ययिकं हितादिति कात्यायनः। एवमादत्यायिके कार्ये शीघ्रं विवादयेत्। न कालं दद्यात्। याज्ञवल्क्यः। साहसस्तेयपारुष्यगोभि-
शापात्यये स्त्रियां। विवादयेत्सद्य एव कालोन्यत्रेच्छया स्मृत इति सर्वधर्मेभ्यो गरीयः प्राड्विवाके सत्यवचनं असत्यवचनं श्रौतस्मार्तत्वादिति भ्यः
सर्वधर्मेभ्य एवोत्तरं यत् प्राड्विवाकः पृच्छति सनिमित्तं ब्रूयादिति। द्विरुक्तिः पूर्ववत्॥ ॥इति श्रीहरदत्तकृतायां गौतमीयमूलमिताक्षरायां त्रयोदशो-
ध्यायः ॥ १३ ॥ अथाशौचप्रकरणमाह शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिंडानां शावमिति निमित्तं नावं। अनृ-
त्विभाव अशौचं दशरात्रं दशाहोरात्रं भवति सापिंडानामृत्विगादिवर्जितानां। ऋत्विग्याजकः कर्मणि वर्तमानः। दीक्षितः क्रतौ दीक्षितीयः कर्म-
णि वर्तमानः। ब्रह्मचारी प्रसिद्धः। आवश्यकत्वं पूर्वयोरात्रु स्वयं अपरस्य किंपुनरिदमाशौचं तत्क्षणं कर्मण्यधिकारः। अभोज्यान्नत्वमस्पृश्यत्वादा-
नादिष्वनधिकारश्च। अत्र मनुः। उभयत्र दशाहानि कुलस्यान्नं न भुज्यते। दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते। नस्पृष्टेषु रतासन्नाः प्रेतस्या-
सन्नबांधवानिति च। अंगिराः। मृतके तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत्पानीयमज्ञानात् समश्नीयात्स्पृशेत वा। पानीयपाने कुर्वीत पंचग- ५०
व्यस्य भक्षणं। त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा स्नानं विधीयत इति। याज्ञवल्क्यः। उदक्यां शौचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेदिति। स्ववर्तः। अ-
स्थिसंचयनादूर्ध्वमंगस्पर्शो विधीयत इति। व्याघ्रः। मरणादेव कर्तव्यं संयोगो यस्य नाग्निभिः। दहनादेव कर्तव्यं यस्य वैतानिको विधिरिति। शंखः।
चतुर्थे दशरात्रं स्यात् षण्णिशाः पुंसि पंचमे। षष्ठे चतुरहः शुद्धिः सप्तमे तु दिनत्रयमिति। एतत्सर्वं निर्गुणविषयं गुणवद्विषये पराशरः। एक-

तथा विश्वासो न भवति तत्र शपथेन सत्यकर्म। शपथं कारयित्वा सत्यं वाचयितव्यमित्येके मन्यंते तद्देवराजब्राह्मणसंसदि स्यादब्राह्मणानां
ते शपथेन सत्यकर्म। देवसंसत् देवतायतनं देवतानां सन्निधौ ब्राह्मणानां संसदि परिषदि वा भवति क्षत्रियादीनां। अर्थगुरुत्वलघुत्वापेक्षो विकल्पः।
महत्यर्थे देवतानां सन्निधौ अल्पार्थस्यान्यत्रेति। अब्राह्मणानामिति वचनाद्ब्राह्मणानां शपथकर्म न भवति। अत्र विष्णुः। पृष्ठे ब्रूहीति ब्राह्मणं सत्यं
ब्रूहीति राजन्यं गोबीजकांचनैर् वैश्यं सर्वपातकैः शूद्रं। एवं च साक्षिणः पृष्ठे द्रुतमुक्तमनो नृप इति मनुस्तु। सत्येन शापयेद्विप्रं क्षत्रियं वाह-
नायुधैः। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति। विपर्ययेनैनर इति मान्यन साक्षिणो दोषउक्तः। इदानीं व्यवहारे विशेषतो दोषविशेष-
माह क्षुद्रपश्वनृते साक्षी दश हंति क्षुद्रपशवो अजाविकादयस्तान्हि त्यद्यन्नृतं वदन्साक्षी दश हंति। तेषां दशानां वधे यावान् दोषस्तावानस्य भ-
वतीति दं। प्रायश्चित्तमपि तदनुगुणं द्रष्टव्यं गोश्वपुरुषभूमिषु दशगुणोत्तरान् उक्तानां क्षुद्रपशूनामुत्तरोत्तरं दशगुणान् दशगुणोत्तरान् गवादिविषये
नृते साक्षी भूत्वा ज्ञात्वा दशगुणोत्तरं जनतद्वधाद्दोषयुक्तो भवति। एतेषु दशगुणोत्तराद् उक्तं भवति। गवानृते साक्षिणो गोशतहननदोषः। अश्वानृते अश्व-
सहस्रहननदोषः। पुरुषानृते अयुतपुरुषहननदोषः। भूम्यनृते तस्य सा भूमिस्तज्जातीयानां लक्षहननदोष इति। पंच पश्वनृते हंति दश हंति गवानृ-
ते। शतमश्वानृते हंति सहस्रं पुरुषानृते इति तत्पुनः क्षुद्रपश्वादिविषयं सर्वं वा स्मै यदि वा भूमिविषय सर्वमेव मनुष्यजातो हंति। यामद-

शूद्रे षड्रात्रेण शुद्धिरिति प्रकृतं। एषां वृत्ताद्यपेक्षया व्यवस्था। अधिकवर्णविषये मनुः। सर्वे तूत्तमवर्णानामाशौचं कुर्युरादृताः। तद्वर्णविधिदृष्टेन स्वं
तु शौचं स्वयोनिषु इति। उत्तमवर्णानां मरणादिनिमित्तमाशौचमनुकूलवर्णविधिदृष्टेन प्रकारेण कुर्युः स्वयोनिषु तु स्वमाशौचं स्वजातिनिमित्तं कुर्यु
रिति। अत एव शातायनेन मातृजातिप्रयुक्तमनुलोमानां धर्मज्ञैन। तत्रैवं तत्र पुनरापतेत तच्छेषेण शुध्येरन्। अंतरित्यस्य प्रतियोग्यपेक्षायामाशौच
माशौचं दशरात्रमिति प्रकृतं दशरात्राद्यभिसंबध्यते। शावस्य दशरात्राद्याशौचस्य मध्ये तस्मिन्वर्तमाने यद्यन्यच्छावाशौचं समानकालं न्यूनका
लं वा पुनरापतेत्तदागच्छेत्तत्र शेषेण पूर्ववर्तमानस्य दशरात्रादेर्यानि शिष्टान्यहानि तैरेव शुध्येरन्। न पुनरापतितस्य कालमपेक्षेतेति। अत्र जनन
योर्व्यभिन्यति दशात्रपूर्णस्य जननाशौचस्य मध्ये समानकाले न्यूनकाले वा जननाशौचे समापतेच्छेषेण शुध्येरन्। यत्र न्यूनकालस्याशौचस्य मध्ये पू
र्णकालपाते तेनैव गच्छति। अत्र मनुः। अंतर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी। तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति। देवलः। आद्यानां
यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसेति। अंगिराः। मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता। पितुः शेषेण शुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीमि ति।
सूतकाद्विगुणं शावं शावाद्विगुणमार्तवं। आर्तवाद्विगुणा सूतिस्ततोपि शवदाहक इति वृद्धात्रिः। अनेन दाहकस्य स्वत्रिकायाश्च पूर्वाशौचस्या
पर्णोत्तरस्य न शुद्धिरिति। अत्र षट्त्रिंशन्मतं। शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत्। शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति। रात्रि
शेषे द्वाभ्यां। पूर्वस्मिन्नाशौचे रात्रिशेषे सति यद्यन्यदापतेत्तदा द्वाभ्यामहोभ्यां शुध्येरन्। प्रभाते तिसृभिः। अथ दशाहादौ व्यतीते परेद्युः प्रभाते सं

वे यद्यन्यदापतेत्तदा तिसृभिः शुध्येरन्। अत्र मनुः। विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति। गोब्राह्मणह
तानामन्वक्षं। गवार्थं ब्राह्मणार्थं वा हतानां ये सपिंडास्तेषामाशौचमन्वक्षं। अन्वीक्ष्यते प्रत्यक्ष्यते शवस्तावत्संस्कारान्तरमाशुध्येरन्निति। अत्र स
द्यः शौचविधिकारे मनुः। गोब्राह्मणस्य चैवार्थे यस्य चेच्छति भूमिप इति। गवार्थं ब्राह्मणार्थं वा ये हतास्तज्ज्ञातीनामाशौचमन्वक्षमिति वार्थः। तथा होश
नाः। गोभिर्हतानां ब्राह्मणैर्हतानां च सद्यः शौचमिति। राजक्रोधाच्च। हतानामित्युपसमस्तमपेक्ष्यते। राजक्रोधाद्ये हतास्तज्ज्ञातीनामन्वक्षमाशौ
चं। युद्धे। चकारोनुवर्तते। युद्धे च हतानामन्वक्षमाशौचं। अत्र मनुः। डिंबाहवहतानां च विद्युता पार्थिवेन च इति। डिंबो जनसमर्दः। सद्यः शौचं प्रकृ
तं। पाठांतरत्वं सत्यं न रोचते यदि वा स एव पाठः। आयुधैरिति तु पदच्छेदः। आयुधं प्रायो धनं संग्राम इति। सर्वथा न दुष्टसमासा न रोचते। प्रायानाशक
शस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतां। प्रायो महाप्रस्थानं। तदनुष्ठानेपि रजभयादिनासंभवती। तीक्ष्णतामित्युक्तं। एवमुत्तरेष्वपि यथासंभ
वमिच्छतामिति द्रष्टव्यं। अनाशकेनेच्छ राजमार्गः स एव शाकः सत्यक्तभोज्यद्रव्येच्छाधादिना प्राणनिवृत्तिः। शस्त्राग्निविषोदकोद्बन्धनानि प्रसिद्धानि।
प्रपतनं पर्वतात्तु वृक्षाद्वा पातः। एतैः प्रायादिभिरात्मव्यापादनेच्छकारादन्यैरप्येवं विधैरन्वक्षमाशौचमिति। अत्र ब्रह्मपुराणे। क्रोधात्प्रायं विषं वह्निं
शस्त्रमुद्बन्धनं जलं। गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः। ब्रह्मदंडहता ये च ये चैव ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्तिताः। पतितानां
न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः। न चाश्रुपातः पिंडो वा कार्यं श्राद्धक्रिया न चेति। अत्रांगिराः। यदि कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचं

विधातव्यं कर्तव्या चोदकं क्रियेति। सपिंडत्वमित्युक्तं केते सपिंडा इत्यत आह। पिंडनिवृत्तिः सप्तमे पंचमे वा। कूटस्थमारभ्य षष्ठपर्यंतं सापिंड्यं सप्तमे नि
वृत्तिः। केवलं सप्तमे सा इंदकत्वं सप्तमे तु निवृत्तिरित्युक्तत्वात् ततः परं सगोत्रत्वमेव। पंचमे वेति यदुक्तं तद्दौरसव्यतिरिक्तविषयं। तत्रापि यथा
संभवं द्रष्टव्यं। एवं चार्थः। पितृपितामहप्रपितामहेभ्यस्तत्परमपिद्वाभ्यामित्यात्मना षष्ठपर्यंतं पिंडं दद्यात् सप्तमे तु निवृत्तिः। पंचमे वेति पुत्रि
कापुत्रविषयमेतत्। अत्र बौधायनः। कथमु खलु पुत्रिकापुत्रस्य पिंडदानं एतत्ते मुष्यै पितर्मम पितामह एष त्वामनु एतत्ते मुष्यै पिता
मह मम प्रपितामह ये च त्वामनु एतत्ते मुष्यै प्रपितामह मम परिप्रपितामह ये च त्वामन्विति। अस्य च पिंडं ददतः पंचमे प्राप्ते पिंडनिवृत्तिः।
मत्स्यपुराणे। लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः। सप्तमः पिंडदस्तेषां सापिंड्यं साप्तपौरुषमिति। जननेप्येवं। शावमाशौचं दश
रात्रमित्यादिः प्रभाते तिसृभिरित्यंतस्यातिदेशः। यथा शावे त्वाशौचमेवं जनने पि द्रष्टव्यं। मातापित्रोस्तन्मातुर्वा। तज्जननाशौचं मातापि
त्रोर्वा मातुरेव वा मुख्यत्वाज्जनन्याः पितुः प्रागसंजातीनां। तत्र व्याघ्रः। सूतकं तु सपिंडानां पित्रोर्वा मातुरेव वेति। मातापित्रोर्यत्निमित्त ५२
त्वादिति मनुरुक्त। जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतां। सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकमिति। याज्ञवल्क्यः। त्रिरात्रं द
शरात्रं वा शावमाशौचमिष्यते। ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि। बौधायनः। जनने तावन्मातापित्रोर्दशाहमाशौचं मातुरित्येके
तत्र्यौं परिहरणात् पितुरित्यपरे। शुक्रप्राधान्याद्योनिर्व्या ह्यपि पुत्राः स्युः यं ते मातापित्रोरेव तु संसर्गसामान्यात्। अंगिराः। नाशौचं सूतके

हा शुध्यते विप्रो योग्निवेदसमन्वितः। त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैरिति। बृहस्पतिः। त्रिरात्रेण विशुध्येत्तु विप्रो वेदाग्निसंयुतः। पंचाहेनाग्नि
हीनस्तु दशाहाद्ब्राह्मणब्रुवः इति। अत्र ब्रह्मचारिणां गृहस्थव्यतिरिक्तानामप्रमाणमुपलक्षणं। अत्र बृहस्पतिः। नैष्ठिकानां गृहस्थानां यतीनां ब्रह्म
चारिणां। नाशौचं सूतके प्रोक्तं शावे चापि तथैव चेति। दीक्षितस्य ग्रहणं चांद्रायणादिव्रतप्रवृत्तानामप्युपलक्षणार्थं। अत्र वसिष्ठः। न राज्ञामघदोषो
स्ति व्रतीनां सत्रिणां तथा। ऐंद्रं स्थानमुपासीना ब्रह्मभूता हि ते सदेति। एकादशाहं क्षत्रियस्य। दीक्षितब्रह्मचारिव्यतिरिक्तजातिमरणे क्षत्रियस्यैकादश
रात्रं भवति। द्वादशरात्रेणेति याज्ञवल्क्यः। पंचदशरात्रेणेति वसिष्ठः। दशरात्रेणेति पराशरः। षोडशाहमिति पैठीनसिः। एतेषां त्वाभि
स्वा ध्यायसमासव्यासापेक्षो विकल्पः। द्वादशरात्रं वैश्यस्यार्धमासमेके। एकत्रिंशद्रात्रं पराशरः। विंशतिरात्रं वसिष्ठपैठीनसी। पूर्ववत् विकल्पः।
मासः शूद्रस्य। सच्छूद्राणामर्धमासमित्यंगिराः। अत्र वर्णिकान्परिचरंतः तेभ्यो वृत्तिं लिप्संते ये सच्छूद्राः। सा हि तेषामुत्तमा वृत्तिरित्यवोचाम।
दासविषये तु बृहस्पतिः। दासांतेवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येनाशौचेन शुध्यंति मृतसूतके इति। अत्र कर्मविवाहे बौ
धायनः। क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांधवाः। तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते। राजन्यवैश्यावप्येवं हीनजातिषु बंधुषु। स्वमेव
शौचं कुर्यातां विशुद्ध्यर्थमसंशयमिति। बृहस्पतिस्तु। शुध्येद्विप्रो दशाहेन जन्महान्योः स्वयोनिषु। सप्तपंचत्रिरात्रैस्तु क्षत्रविट्शूद्रयोनि
ष्विति। अत्र येस्तु विशेषमाह। ब्राह्मणस्य क्षत्रविट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्रैकरात्रैः क्षत्रियस्य विट्शूद्रयोः षड्रात्रत्रिरात्राभ्यां वैश्य

क्षाव्यवस्था। वृद्धवसिष्ठः। मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यतीति। एतच्च सर्वं संवत्सरादर्वाक्।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति मनुः। अत्रैव पैठीनसिः। पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहेन भु
चिर्भवेदिति। स्मृत्यंतरेऽपि। पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः। संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेदिति। निर्दशज्ञातिमरणे श्रु
त्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानव इत्येतत्समानोदकविषयं। अत्र पिंडयोनिसंबंधे सहाध्यायिनि च सपिंडता
 यस्य निवृत्ता सो ऽसपिंडः समानोदकः। योनिसंबंधा मातामहमातृष्वसृतत्पुत्रादयः स्त्रीणां प्रत्तानां पित्रादयः श्वशुरादयश्च। सहाध्याय एक
स्मादुपाध्यायादधीतः तत्र वेदस्य च कारात्स्मृत्यंतरपठितानां पितृष्वसृतदपत्यादयोऽन्ये च। तेषु मृतेषु परस्परं पक्षिणीमात्रं च भवति। पक्षिणी
कालं व्यतीते स्नानमेव। मनुस्तु समानोदके त्रिरात्रमाह। राजन्यैकेव चैकेन त्रिरात्रैरेव चात्रिभिः। शवस्पृशो विशुध्यंतीति त्र्यहात्तूदकदायिन इति। अ
नयोः पूर्ववद्व्यवस्था। एतद्द्वयमप्युपनीतमरणविषयं। ततोऽर्वाक् स्नानमेव। जननेऽपि समानोदकानां मनुना त्र्यहाद्दर्शितं। जन्मन्येकोदकानां तु
त्रिरात्राच्छुद्धिरिष्यत इति। सब्रह्मचारिण्येकाहं समानब्रह्मचारिणः सुहृदः। तस्मिन्मृते एकमहोरात्रमाशौचं भवति। श्रोत्रिये चोपसं
पन्ने श्रोत्रियोऽधीतवेदः उपसंपन्ने आश्रिते गृहवासादिना तस्मिन्मृते एकाहमाशौचं। चकारादेकाहमित्यनुवर्तते। अत्रांगिराः। गृहे यस्य
मृतः कश्चिदसपिंडः कथंचन। तस्याप्याशौचं विज्ञेयं त्रिरात्रं नात्र संशय इति। मनुः। श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेदिति। आंगिरस

मपि वचनं श्रोत्रियविषयं। अत्र विष्णुः। स्त्रीणां विवाहः संस्कारः संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणेऽपि पितृगृहे चेद्भवेतां तदेकरात्रं चेति।
प्रसवे एकरात्रं मरणे त्रिरात्रमिति व्यवस्थितो विकल्पः। प्रेतोपस्पर्शने दशरात्रमाशौचमभिसंधाय चेत्। नात्रोपस्पर्शनं शवेन स्पर्शमात्रं वि
वक्षितं पतितचंडालेत्यादिना सचेलस्नानस्य तद्विषये वक्ष्यमाणत्वात्। किं तर्ह्युपस्पर्शनं प्रेतनिर्हरणं। तस्मिन्दशरात्रमाशौचं भवति। तच्चे
न्निर्हरणमभिसंधाय वेतनादिप्रयोजनाभिसंधानेन भवति न धर्मार्थं। सत्यर्थाशौचाधिकारे पुनराशौचग्रहणं पूर्वस्मादाशौचादस्य वैध
र्म्यप्रदर्शनार्थं। तेन वक्ष्यमाणवधःशय्यासनादिकमस्मिन्विषये न भवति। अस्पृश्यत्वानधिकारलक्षणमेव। उक्तं वैश्यशूद्रयोः। अभि
संधाय प्रेतोपस्पर्शनविषये वैश्यशूद्रयोरुक्तमाशौचं चेद्द्वादशरात्रमर्धमासमिति पूर्वोक्तं। आर्तवीर्वा ऋतुसमानसंख्या वा रात्रि
रात्रीराशौचं। ष ऋतवः पंच वा हेमंतशिशिरयोः समासेन पूर्वयोश्च पूर्वयोर्ब्राह्मणक्षत्रिययोरपि वर्णयोरुक्तमाशौचं आर्तवीर्वा रात्रीराशौचं।
उक्तस्यापि ब्राह्मणस्य पूर्वयोरिति पुनरुपादानमार्तवीर्येति विकल्पसिद्ध्यर्थं। पूर्ववद्देशकालावस्थाद्यपेक्षो विकल्पः। अत्र प्रीतिरहितेन निर्हा
रे मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्। यद्यन्नमत्ति तेषां यः स दशाहेन शुध्यति। अन्न
दन्नेनमह्नैव न चेत्तस्मिन्गृहे वसेदिति। बंधुवत्स्नेहादिना ग्रामाद्बहिर्वा सेवाद्युपास्य स्यादिति। यथाह हारीतः। प्रेतस्पृशो ग्रामं न प्रविशे
युरा नक्षत्रदर्शनात् रात्रौ चेदादित्यदर्शनात् ततः शुद्धिरिति। ग्रामप्रवेशो तु अनंतरं त्वन्यये कृते मानवमेकाहं। अनाथविषये पराशरः। अ

अनाथब्राह्मणं प्रेतं ये वहंति द्विजातयः। पदे पदे क्रतुफलं मानुपूर्व्याल्लभंतीति। प्रेतस्पर्शनसंस्कारे ब्राह्मणो नैव दुष्यते। वोढा चैवाग्निदाता च सद्य
स्नात्वा विशुध्यतीति। प्रेतोपस्पर्शनादूर्ध्वमारभ्य सर्वेषां वर्णानां त्र्यहं। एषा अत्युत्कटविषयमिदं आचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवं
उपनीय तु यः शिष्यमित्यादिनोक्तलक्षण आचार्यः तत्पुत्र आचार्यपुत्रः आचार्यस्त्री। याज्योयाजनीयः ऋत्विगपेक्षयाऽयजमानः प्रसिद्धः ए
तेषु मृतेषु चैवं त्र्यहमिति। विजातीयनिर्हरणविषय आह अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् पूर्वो वावरं तत्र शावोक्तमाशौचं अवरो जघन्यः
क्षत्रियादिः ब्राह्मणापेक्षया। पूर्वो ब्राह्मणादिः क्षत्रियापेक्षया तयोरन्यान्यनिर्हरणे शावज्ञानकृतमाशौचं भवति ब्राह्मणानिर्हरणे क्षत्रियस्य द
शरात्रं क्षत्रियस्य निर्हरणे ब्राह्मणस्य कदाचिदेकरात्रमित्यादि। अत्रैव भृत्यर्थे व्याघ्रः। अवरश्चेद्वर्णमवरं वावरो यदि। वहेच्छवं तदाशौचं। दृष्टा
र्थे द्विगुणं भवेदिति। बुद्धिपूर्वकं शवस्पर्शनमात्रप्रासंगिकेन सह शुद्धिमाह पतितचांडालसूतिकोदक्यात्राबस्पृत तत्स्पृष्ट्युपस्पर्शने सचेलो
दकोपस्पर्शनाच्छुध्येत् पतितो ब्रह्महादिः चंडालः सूतिकोदक्या त्राबाः प्रसिद्धाः एतेषां स्पृष्टितत्स्पृष्टानां च स्पृष्टे तदुपस्पर्शने तत्स्पृष्ट
स्पृष्टानां स्पर्शने सचेलं उदकोपस्पर्शनात् स्नानाच्छुध्येत्। स्नानेन सचेलं तं न शुद्धो। अतः क्रियाविशेषापायगयुक्तः। अबुद्धिपूर्वं तु मानवं। दि ५४
वाकीर्तिमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति शवानुगमने च अनुगम्येच्छया प्रेतं ज्ञातिमज्ञा
तिमेव च स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति घृतप्राशनादूर्ध्वमपि स्नानं केचिदिच्छंति। तत्र मूलं मृग्यं। याज्ञवल्क्यो पि।

आत्मकं सपिंडानां कथं च न। मात्रापित्रोरशौचं स्यात् सूतके मातुरेव वा। यमः। सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं। मातुर्वा सूतकं तु स्यादुप
स्पृश्य पिता शुचिः। शंखलिखितौ। जनने प्येवं तत्र मातापितरावेवाशुचीन मातेत्येक इति। पैठीनसिः। सपिंडाः शुचयः सर्वे मातापित्रोस्तु सू
तकं। सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिरिति। अत्र दृष्टाद्यपेक्षो दशाहे तेषां विकल्पः अन्ये त्वल्पते अनधिकारलक्षणमाशौचं सर्वेषां भ
वति उभयत्र दशाहानि कुलस्यान्नं न भुज्यत इति मानवदर्शनात्। अस्पृश्यतालक्षणं तु मातापित्रोरेवेति। गृहांतरे च सतस्तत्संसर्गमगच्छतः
पितुश्चेनेति। सूतके सूतिकावर्जं संस्पर्शनं निषिध्यत इति त्वपठंति गर्भमासतमा रात्रीः स्रंसने गर्भस्य आचतुर्थाद्भवेत्स्रावः पातः पंचम
षष्ठयोः। अत ऊर्ध्वं तु नारीणां स्राव इति समुच्यत इति। तिस्रो गर्भविपदः तासु सर्वासु स्रंसने त्रादेनोच्यते। यावतिमासे मासे गर्भस्य स्रंसनं तन्मासतमा
रात्रीरा शौचं भवति। अत्यंतसंयोगे द्वितीया। द्वितीयमासादि यथामाससंख्यान्याहानीति त्र्यहं वा द्वितीयेपि मासे त्र्यहं वा भवति। नतु पूर्वोक्तं।
अत्वा चोर्ध्वं दशाभ्यां पक्षिणी दशमीग्रहणं दशाहादूर्ध्वं परिपूर्णे शौचस्योपलक्षणं। अहर्द्वयमध्यगतारात्रिः पक्षिणी रात्रिद्वयमध्यागतमह
र्वा। एवं द्वितीयाप्राप्तिः विपत्तिप्रकरणान्मरणनिमित्तमूर्ध्वं दशाहाद्यशौचकालेन ज्ञातिमरणं श्रुणुयात्तत्र पक्षिणीमाशौचं भवति। दिवा
श्रवणे तदहः नंतरा रात्रिः परेद्युश्चाहः। रात्रौ श्रवणे सा रात्रिः परेद्युर्होरात्र इति। अत्र मनुः अतिक्रांते दशाहे तु त्रिरात्रमशुचिर्भवेदिति। तथा जाबालः
अतीते सूतके स्वे त्रिरात्रमशुचिर्भवेदिति। अत्र सूतकशब्दः आशौचमिति पर्यायः। विष्णुरुक्त। यतीतेब्दे संवत्सरस्यान्ते कर्तव्यमिति एषां दशकुलधर्मापि

गो०वृ०

५५

विशुध्यति। अस्थिसंचयनादूर्ध्वं मासो यावद्विजातयः। अहोरात्रेण शुध्यंति वाससां क्षालनेन च। अथ प्रसंगादनुप्रसंगेन शुनश्च उपसमस्त
मप्यभिधीयते शुनःस्पर्शने सचैलउदकोपस्पर्शनाच्छुध्यते। पृथग्योग्यकरणं तस्य श्विन्याद्यव्यर्थं। यत्तुपहन्यादित्येके एके तु यदंगं श्वोपह
न्यात्तस्यैव प्रक्षालनमिच्छंति। तत्राप्यस्तंबीयो विशेषः। शुनोपहतः सचैलोवगाहेत प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्र
यतो भवतीति। ऊर्ध्वं नाभेः स्पर्शे स्नानं अधः प्रक्षालनमिति व्यवस्था। जातूकर्ण्य आह। ऊर्ध्वं नाभेः करौ मुक्त्वा स्पृशत्यंगं खगो यदि। स्नानं तत्र
विधातव्यं शेषे प्रक्षाल्य शुध्यतीति उदकदानं सपिंडैः कृतचूडस्य कृतचूडस्य प्रेतस्य सपिंडैरुदकदानं कर्तव्यं। यावद्दंतोत्पत्तंतताव
गिति। अग्निसंस्कारोप्यस्यैव। यथाह काश्यपः। तूष्णीमेवोदकं दद्यात्तूष्णीमेवाग्निमेव च। सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयमिति। एवं कृ
तचूडस्य नियतोग्निसंस्कार उदकदानं च। अकृतचूडस्य त्वनियतं। तदकरणे न प्रत्यवायः। चूडाकरणे न कालो लक्ष्यते। तृतीये वर्षे। बहुषु
स्मृतिषु तथा दर्शनात्। मनुरप्याह। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कुर्यान्नाम्नि वापि कृते सतीति। अत्र युक्तग्रह ५५
णमोर्ध्वदेहिकस्योपलक्षणं। तत्र देवलो विशेषमाह। द्वादशाद्वत्सरादर्वाक् पोगंडमरणे सति। असपिंडीकरणं तस्याहुरेकोद्दिष्टानि कारयेदि
ति तत्स्त्रीणां च तदुदकदानं स्त्रीणां च कृतचौलानां कर्तव्यं एके प्रत्तानां एके मन्यंते प्रत्तानामेव स्त्रीणामुदकदानमप्रत्तानां तु नेवेति।

प्रत्तानां च भर्तृपक्षे देयं। अथाशौचकाले ज्ञातयः कथं वर्तेरन्। अधःशय्यासनिनो ब्रह्मचारिणः सर्वे भूमावेव शयीरन् भूमावेवासीरन् नक
दासनादिषु मैथुनं वर्जयेयुः। सर्वग्रहणात् समानोदकार्थे न मार्जयीरन् मार्जनं गात्रमलापकर्षणं। तच्च न कुर्युः मांसं न भक्षयेयुरा प्रदाना
त् प्रदानं श्राद्धस्य आ तदंतं मांसं न भक्षयेयुः प्रथमतृतीयसप्तमनवमेषूदकक्रिया प्रथमादिष्वहस्सु सपिंडैः प्रेताय तिलमिश्रमुदकं दे
यं। एवं गोत्राय शर्मणे प्रेतायैतत्तिलोदकं ददामीति। प्रथमेहनि त्रीन् तृतीये नव सप्तमे त्रिंशन्नवमे त्रयस्त्रिंशदिति पंचसप्ततिर्जलांजलयो
देयाः आरभ्य। प्रथमेह्नि त्र्यहः द्वितीयादिष्वेवोत्तरं दीयते वाससां च त्यागः उदकदानकाले परिहितानि वासांसि प्रथमतृतीयसप्तम
नवमेषु त्याज्यानि। क्रमेण अन्यानि परिधेयानि अंतेसंतानां वर्णबाह्याः शूद्राः तेषामत्येन नवमेहनि वाससां त्यागः दंतजन्मादि मातृ
पितृभ्यां दंतजन्मप्रभृतीति पुत्रस्य मातापितरावुदकं दद्यातां तूष्णीं माता बालदेशांतरितप्रव्रजितासपिंडानां सद्यःशौचं बालोकृतचूडः।
देशांतरितो दूरेण व्यवहितः देशांतरस्थः। प्रव्रजिता नैष्ठिकवानप्रस्थपरिव्राजकाः। असपिंडाः समानोदकाः तेषां मरणे ज्ञातीनां सद्यःशौचं
स्नानेन शुद्धिः। बालविषये याज्ञवल्क्यः। ऊनद्विवार्षिकं प्रेतं निखनेन्नोदकं ततः। आदंतजन्मनः सद्य आ चौलान्नैशिकी स्मृता। त्रिरात्रमाव्र
तादेशाद्दशरात्रमतः परमिति। अंगिराः। यद्यप्यकृतचौडो वै जातदंतस्तु संस्थितः। दाहयित्वा तथाप्येनं नाशौचं त्र्यहमाचरेदिति। मनुस्तु ऊनहि

गो०२० वार्षिकं प्रेते निरध्युर्बांधवा महि। अलंकृत्य शुचौ भूमावस्थिसंचयनादृते। नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया। अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेवहि
ति। आश्वलायनः। अदंतजातेपीजाते नैकाहमिति। आपस्तंबस्तु। मातुश्च सयोनिसंबंधोभ्यः पितुश्चासप्तमात्पुरुषात् यावतां वा संबंधो ज्ञायते तेषां प्रेते शृ
दकोपस्पर्शनं गर्भान्परिहाप्यापरिसंवत्सरान्मातापितरावेव तेषु भर्तारः स्त्रीति। एतेषां देशकुलधर्मापेक्षा व्यवस्था। अत्र कन्याविषयमापस्तंबेन अप्रौढा
५६ यां तु कन्यायां सद्यःशौचं विधीयते। अहरस्त्वदत्तकन्यासु बालेषु च विशोधनमिति। इदं चोलादूर्ध्वं। व्याघ्र आह। बालमृते सपिंडानां सद्यःशौचं विधी
यते। दशाहेनैव दंपत्योः सोदराणां तथैव चेति। इदं तु सूतकं स्त्रीणां तन्मरणविषयं। तथा च। अंतर्दशाहे जातस्य शिशोर्निष्क्रमणं यदि। सूतकेनैव
शुद्धिः स्यात्पित्रोः शातातपोऽब्रवीदिति   राज्ञां त्वकार्यविरोधात्   राज्ञश्च सद्यःशौचं। कार्यविरोधात्कार्यं प्रजारक्षणादि। बहुवचननिर्देशादेचा
न्यमात्यादयः स्वकार्यवंतस्तेषामपि। यस्य चेच्छति पार्थिव इति मनुः   ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थं   ब्राह्मणस्य च सद्यःशौचं स्वाध्यायनि
वृत्तिर्माभूदिति। बहुश्रोत्रियस्याध्यापयितुरिदमुक्तं   इति श्रीहरदत्तकृतायां गौतमीयधर्मसूत्रमिताक्षरायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ५६
अथ श्राद्धं   अपवादाधिकारार्थः। श्राद्धं नाम कर्माधिक्रियते। अप्रायत्ये विधानेन श्राद्धं। तच्च पंचविधं। नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथा
परं। पार्वणं चेति विज्ञेयं श्राद्धं पंचविधं बुधैः। तत्र नित्यं मनुराह। दद्यादहरहः श्राद्धमन्नाद्येनोदकेन तु। पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाहरन्॥ इ

स्पृष्ट्वाग्निं घृतं भुक्त्वा शुचिरिति एतावदाह। इदं सजातीयविषयं। ब्राह्मणस्य क्षत्रियवैश्यानुगमने वसिष्ठोक्तं मनुष्यास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमा
शौचमस्निग्धे त्वहोरात्रं शवानुगमने चैवमिति एवमिति त्रिरात्राहोरात्रयोरतिदेशः। अत्र क्षत्रियानुगमने एकरात्रं वैश्यानुगमने त्रिरात्रमि
ति व्यवस्था। शूद्रानुगमने त्वांगिरसं। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत्। त्रिरात्रे तु ततः पूर्णे
नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। क्षत्रियवैश्ययोर्वैश्यशूद्रानुगमने ब्राह्मणवत्कल्प्यं। क्षत्रियस्य शूद्रानुग
मने एकरात्रं प्राणायामशतं च। मनुः। नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेत्। आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविं। इदं बुद्धिपूर्वंवि
षयं। विशेष मनुः। दहनं वहनं चापि प्रेतस्यान्यस्य गोत्रिणः। न कुर्यादुभयं तत्र कुर्याद्देवं पितुस्तदा। ज्येष्ठस्य चानपत्यस्य मातुलस्य सुतस्य वेति।
पितुरिति मातुरप्युपलक्षणं। अनुरव्यंजने पारस्करः। अस्थिसंचयनादर्वाक् रुदित्वा स्नानमाचरेत्। अंतर्दशाहे विप्रस्य ऊर्ध्वमाचमनं स्मृ
तमिति। विप्रस्य मृतस्यांतर्दशाहे रुदतां सर्वेषां वर्णानां समानमिदं। अत्राविष्णुः। सर्वस्यैव प्रेतस्य बांधवैः महाश्रुपातं कृत्वा स्नानेनास्थिसं
चयं सचेलस्नानेन शुद्धिरिति प्रकरणाद्गम्यते। इदं क्षत्रियादिमरणसमानापकृष्टानां रोदने शूद्रवर्णं हीनवर्णविषयानुरव्यंजने ब्रह्मपुराणप
ठंति। अनास्थिसंचये विप्रो रौति क्षत्रियवैश्ययोः। तदा स्नात्वा सचेलस्तु द्वितीयेऽहनि शुध्यति। कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेदिति। क्षत्रि
यस्य वैश्यानुरव्यंजने पक्षिणमेकाहिकं। शूद्रानुरव्यंजने पारस्करः। अस्थिसंचयनादर्वाक् यदि विप्रोऽश्रु पातयेत्। मृते शूद्रे गृहं गत्वा त्रिरात्रेण

तः सामावास्या। तत्र पितृभ्यश्च बहुवचनात् पितृपितामहप्रपितामहेभ्यो दद्यात्। दानप्रकारोऽग्रे वक्ष्यते। होमो ब्राह्मणभोजनं पिंडनिर्वपणमिति। इह तु
ब्राह्मणभोजनविस्तारः॥ ॥पंचमीप्रभृति वापरपक्षस्य॥ ॥अपरपक्षः कृष्णपक्षस्तस्य पंचमीप्रभृति वा दद्यात्॥ ॥यथाश्राद्धं सर्वस्मिन्वा॥ ॥
सर्वस्मिन् अपरपक्षे दद्यात्। यथाश्राद्धं यथाश्रद्धा भवति तथेति॥ ॥द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः॥ ॥तिलमाषेत्यारभ्य वक्ष्यमा
कां णं तत्र प्रशस्तं द्रव्यं। देशो गयापुष्करादिः। पुष्करेष्वक्षयं श्राद्धं कुरुक्षेत्रे तथैव च। दद्यान्महोदधौ चैव वटे गोष्ठे गिरौ तथेति व्यासः। यद्ददाति गया
स्थश्च सर्वमानंत्यमश्नुत इति याज्ञवल्क्यः। ब्राह्मणाः पंक्तिपावना वक्ष्यमाणाः षडंगविदादयः। एतेषां द्रव्यादीनां सन्निधानसमवाये कालनि
यमः। सन्निधिरेव कालनियम इति। वा शब्दो विकल्पार्थः॥ ॥शक्तितः प्रकर्षेद्गुणसंस्कारविधिरन्नस्य॥ ॥अन्नस्य भक्ष्यभोज्यादेर्गुणविधि
यः पायसलावितादिसिद्धत्वादयः। संस्कारविधयो भर्जनमरीचजीरकलवणादिभिः सुरभीकरणादयः। एतान्यथाशक्ति प्रकर्षेत् कृष्टान् कुर्या
त्॥ ॥नवावरान् भोजयेदयुजः॥ ॥नवसंख्या अवरा येषां ते नवावरास्तावंतो ब्राह्मणा भोजयेत्। अयुजः अयुग्मसंख्यान्। तत्र नवपक्षे पि
त्रर्थे त्रीन् पितामहार्थे त्रीन् प्रपितामहार्थे त्रीन्। अवरग्रहणादधिका अपि भवंति। पंचदशैकादशेत्यादयः। अयुज इति वचनाद्द्वादशादिव्या
वृत्तिः॥ ॥यथोत्साहं वा॥ ॥यथासामर्थ्यं नवभ्योर्वागपि भोजयेत्। अयुज इत्यनुवर्तत एव। तथा चापस्तंबः अयुग्मान् अवरान् इति। श्रा ५१
द्धं तेष्वपि विश्वेभ्यो देवेभ्यो ब्राह्मणभोजनमाम्नातं। मातामहानां च यथाह याज्ञवल्क्यः। द्वौ दैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा। माता

महानामप्येवं तंत्रं वा वैश्वदेविकमिति। एकैकमेवेति देवानामेकः पित्रादीनां त्रयाणामेक इति। मातामहानप्येवं पितृश्राद्धवद्द्वौ दैवे मातामहार्थे त्रयः। वैश्वदेविकं तंत्रं वा भवति। पितृश्राद्धस्य मातामहश्राद्धस्य च। कीदृशान् भोजयेत्   श्रोत्रियान् रूपवयःशीलसंपन्नान्   श्रोत्रि
यानधीतवेदान् वाक्संपन्नान् सुशिक्षितवाक्यान् अस्खलनभाषणादि। रूपसंपन्नान् सौम्यभवान् न्यूनाधिकांगान् श्वित्राद्यदूषितान्। वयःसं
पन्नाननतिबलान्। शीलमंतःकरणशुद्धिस्तत्संपन्नान्। एवंगुणान् भोजयेत्   युवभ्यो दानं प्रथमं   एवंगुणेभ्यो युवभ्यः श्राद्धदानं मुख्यः
कल्पः   एकोपि तद्वत्   एकैकमन्यं ते पितृवत् पित्राद्यनुरूपं दानमिति। पित्रे तरुणाय पितामहाय वृद्धः प्रपितामहाय वृद्धतर इति   न च तेन मि
त्रकर्म कुर्यात्   न च तेन श्राद्धनिमित्तं कर्म कुर्यात्। येन मैत्री कार्या तस्मिन्नर्थापेक्षितं न भोजयेत् मित्रत्वोपकारार्थेन भोजयेदित्यर्थः। अ
पत्तिस्त्वनर्थापेक्षे भोजयेदित्ति विशेषमाह   पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युः   पुत्राद्ययरिति प्रथमः कल्पः। तदभावे स
पिंडाः भ्रातृतत्पुत्रादयः। तदभावे मातुलसपिंडा मातुलतत्पुत्रादयः। तदभावे शिष्यः   तदभावे समानगोत्राचार्यो   शिष्याभावे ऋत्विजस्त
दभावे आचार्यश्च दद्युरिति =४= श्रोत्रियादित्वे सत्यपि वर्ज्यानाह   न भोजयेत् स्तेनक्लीबपतितनास्तिकतद्वृत्तिवीरहाग्रेदिधि
षुदिधिषूपतिःस्त्रीग्रामयाजकाजपालोत्सृष्टाग्निमद्यपकुचरकूटसाक्षिप्रातिहारिकान्   स्तेनो हिरण्यस्तेनः। क्लीबो माद्यवीर्यः। न तृतीयाप्र

गो०सू०वृ० । कृतिः अश्रोत्रियत्वात् । पतितो ब्रह्महादिः । नास्तिकः प्रत्यक्षभावापवादी । न हि अस्ति नास्तिकवृत्तिः प्रेत्यभावमंगीकृत्यापि यस्तदनुकूलं न चेष्टते संसर्ग
वन्नात् । वीरहा यो बुद्धिपूर्वमग्नीनुद्वासयति सत्यामप्युपपत्तौ श्रूयते । वीरहा वा एष देवानां यो ग्निमुद्वासयत इति । अग्रेदिधिषुर्नितिदीधर्निकेवि
त्यर्थंति । पतितशब्दः प्रत्येकं संबध्यते । अग्रेदिधिषूपतिर्दिधिषूपतिरिति । ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु
५८ दिधिषूः स्मृतेति । तयोः पती । नैघंटुकास्तु पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः । स तु द्विजोग्रेदिधिषुः सैव यस्य कुटुंबिनीति । स्त्रीया
मयाजकः स्त्रीयाजकः । ग्रामयाजकः । स्त्रीणां व्रतानामुपदेष्टानुष्ठापयिता च स्त्रीयाजकः । ग्रामयाजको बहुयाजकः । अजपालोऽजाक्षेप
जीवकः । उत्सृष्टाग्निरालस्याद्वा घनुपपत्त्या स्मार्त्ताग्निविच्छिन्नाग्निः । मद्यपः सुराव्यतिरिक्तमद्यकरद्व्यसनी पाता । सुरापस्तु पतितत्वेनोक्तः । कु
नरः कुत्सिताचारः । साक्ष्ये अनृतस्य वक्ता कूटसाक्षी । प्रातिहारिको द्वारपालवृत्तिः । एतान्न भोजयेत् । एषां पतितादीनां दर्शनस्पर्शनादिकं प्रतिषि
द्धं तेषां निषेधः । श्रुतमाप्यश्चित्तानामपि वर्जनार्थः उपपत्तिर्यस्य च उपपतिर्जारः यस्य च सः उपपतिः यद्विषये स च साक्षात्पतिः पिता च भा
वीपनष्पालीयितव्यो कुंडाशी सोमविक्रय्यगारदाही गरदावकीर्ष्णिगणप्रेष्यागम्यागामि हिंस्र परिवित्ति परिवेत्तृ पर्याहित पर्याधातृत्यक्ता ५८
त्मदुर्बालकः नखि श्यावदंतश्चित्रिपानर्भवकितवाजयपराज्यजप्रेष्य प्रातिरूपिक शूद्रापति निराकृति किलासि कुसीदि वणिक शिल्पोपजीवि
ज्यावादित्रतालनृत्यगीतशीलान् परदारेषु जायेते द्वौ सुतौ कुंडगोलकौ । पत्यौ जीवति कुंडः स्यात् मृते भर्तरि गोलक इति मनुः तस्य कुंडस्यान्न

एकमप्यत्राशयेद्विप्रं पित्रर्थे पांचयज्ञिके । न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजमिति । अहरहरादिषु यत्क्रियते तन्नैमित्तिके । तस्य प्रयोगः पार्वणवत् । एको
द्दिष्टं सपिंडीकरणमप्येकस्य । तान्यपि नैमित्तिकान्येव । तत्रैकोद्दिष्टं षोडशविधं । मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरं । प्रति संवत्सरं चैवमाद्यमेकाद
शाहनीति याज्ञवल्क्यः । एकोद्दिष्टं तु कर्तव्यं तुल्याद्याः पादौ लौकाक्षिर्व्याघ्रः । एकादशाह्निकं तव्यं त्रिपक्षे च तथैव च । षण्मासे वत्सरा कुर्यादेकोद्दिष्ट
यथा तदिति । ततः संवत्सरे पूर्णे त्रिपक्षे वा तथैव च । सपिंडीकरणं कुर्याद् यदि वा वृद्धिरागता भवेदिति । तान्युक्तवर्षः । चतुर्थे पंचमे चैव नवमैकादशे तथा
यस्त्वत्र दीयते जंतोस्तन्नवश्राद्धमुच्यत इति पठंति । वर्णानुपूर्व्ये व्यवस्थितानि च त्वार्थ्यमानि । तदेव श्राद्धमेकादशाहनि प्रधाने । एकादशाहस्य
ग्रहणमस्यां तेनापलक्षणं । तत्र च मासि तदेव मासिकं सपिंडीकरणं वा तस्यैकोद्दिष्टं पित्रादिभ्यः पार्वणं । तत्रापि मासि तदेव मासिकमध्ये द्वादश
मासिकानि त्रिपक्षषाण्मासिकयोर्द्वे प्रति संवत्सरं चापरं मृताहे सांवत्सरिकमिति । षोडशैकोद्दिष्टानि पठंति च । तत्र त्रिपक्षषाण्मास्ये सां
वत्सिकमासिके । श्राद्धैः षोडशभिः प्रेतः पिशाचत्वं विमुंचति । यस्यैतानि न कुर्वंति एकोद्दिष्टानि षोडश । पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्ध
शतैरपीति । हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमी अष्टका एकस्यां वा । प्रथमेहनि क्रियमाणे ह्यपत्यं जायत इत्यादिकामसंयोगे
न क्रियमाणं काम्यं । तदपि पार्वणवदेव । विवाहादिवृद्धि कर्मसु पूर्वेद्युः कर्तव्यं वृद्धिश्राद्धं । तस्मात्पितृभ्यः पूर्वेद्युः क्रियत इति ब्राह्मणमू
लं । तत्र युग्मब्राह्मणाः यवैस्तिलार्थः । अन्यत्पार्वणवत् । पार्वणं तु वक्ष्यते अमावास्यायां पितृभ्यो दद्यात् सूर्याचंद्रमसोर्यस्यां सहव

वैद्योपजीवी। वादित्रशीलो भर्त्यादि ताडनवृत्तिः। तालशीलः तालवृत्तिः। नृत्तगीतशीलो वत्तथा। एतान्न भोजयेत्। पित्रा वा कामेन विभक्ता
न् ये चानियैकेनापि पित्रा विभक्तास्तान्न भोजयेत्। शिष्यं श्चैके सगोत्रांश्च एके आचार्याः शिष्यान् सगोत्रांश्च श्राद्धे भोजनीया
इत्यूः। एकग्रहणाद्भोजनीया इति स्वमतं। तत्र गुणवदसंभवे तेषां गुणवत्वे सतीति। तथा चापस्तम्बः। समुदितः सोदर्योपि भोजयितव्य इति
भोजयेदूर्ध्वं त्रिभ्यः यथोत्साहं त्वन्येन न सर्वार्थमेकस्यापि पित्र्यसंगतेन। इत्यर्थमिदं त्र्यवरान्भोजयेत्। त्र्यवरानित्यापस्तम्बीयदर्श
नात्र। गुणवंतं एकवचनप्रयोगेण गुणवांश्चेदेकमपि भोजयेत्। वसिष्ठोपि। अपि वा भोजयेदेकं ब्राह्मणं वेदपारगं। शीलवृत्त
कृतोपेतमवलक्षवर्जितमिति। मनुरपि। एकैकमपि विद्वांसं दैवे पित्र्ये च वयो नयेत्। पुष्कलं फलमाप्नोति नामंत्रज्ञान्बहूनपीति। सपि
श्राद्धी शूद्रातल्पगस्तन्पुरीषमासं नयति पितॄन्। येन श्राद्धं भुक्तं सततस्मिन्नहोरात्रे श्राद्धीत्युच्यते। श्राद्धभने नैभुक्तमिति निम
न्त्रः समानकालः स यदि तदहः शूद्रातल्पं गच्छेत्। तल्पग्रहणं भार्योपि। यद्यूढामपि शूद्रां गच्छेत् स एव तस्याः पुरीषे पितॄन्मासं नयेत् तदनि
इतरासु भार्यास्वकल्प्यं। अतस्तेदाहः तस्मात्तदहर्ब्रह्मचारी स्यात्। मां नैव दातुरपि नियम उक्तः निमंत्रितो द्विजः पित्र्ये नियतात्मा
भवेत्सदा। न च छंदांस्यधीयीत यस्य श्राद्धं च तद्भवेदिति। चांडालपतितावक्षणो दुष्टं श्वादिभिरवेक्षितमन्नं दुष्टं भवतोत्यश्राद्धं चावेक्षि ५९
तं दुष्टमन्नं भवतीत्यस्मादेव। तस्मात्परिश्रिते दद्यात्। परिश्रयणं तिरस्कारिण्यादिना व्यवधानं। तस्मात्को तिलैर्वा विकिरेत्। अ

भृगुः। पानीयमपि यद्दत्तं तिलैर्मिश्रं द्विजस्य तु। पितृभ्यः कामधुक् तस्यात्पितृगुह्यमिदं ततन इति। पङ्क्तिपावनेनाचामयेत्। पङ्क्तिर्येन पाव्यते
स पङ्क्तिपावनः। श्वाद्यवेक्षणाद्यो दोषः तं शमयेत्। क एक पुनरसौ तमाह पङ्क्तिपावनाः षडङ्गविज्ज्येष्ठसामिकस्त्रिणाचिकेतस्त्रिमधुः
स्त्रिसुपर्णः पंचाग्निः स्नातको मंत्रब्राह्मणविद्धर्मज्ञो ब्रह्मदेयानुसंतान इति छंदः कल्पो व्याकरणं ज्योतिषं निरुक्तं शिक्षा छंदोविचि
तिरिति षडङ्गानि तेषां पाठतोर्थतश्च ज्ञाता षडङ्गवित्। ज्येष्ठसामिकः तलवकाराणामुदुत्यं चित्रमित्येतयोर्गायकः ज्येष्ठसामगः छंदोगा
नां तु तदिदासीतीयं तद्वा गायति ज्येष्ठसाम तद्व्रती ज्येष्ठसामिकः। त्रिनाचिकेतः नाचिकेतो बह्वृचशाखासु विधीयते। तैत्तिरीयकठवा
ह्वीषुह्वानपथेव। तं यो वेद ब्राह्मणेन सह स त्रिनाचिकेतः। मधुवाता ऋतायत इत्येतं तृचं त्रिमधुः तत्र प्रत्यृचं त्रयाम्मधुवादाः। आश्वलायना
प्याह। तृप्तान् ज्ञात्वा मधुमतीः श्रावयेदिति। तद्वतस्तदध्यायी पुरुषस्त्रिमधुः। त्रिसुपर्णः ऋग्वेदे एकः सुपर्णः स समुद्रमाविवेशेत्यादि ऋ
ऋचः। तैत्तिरीये ब्रह्ममेतु मामित्यादयः त्रयोऽनुवाकाः तत्र हि यद्भूमे त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यादित्यादि श्रूयते। पूर्ववत्पुरुषवृत्तिः पं
चाग्निः सभ्यावसथ्याभ्यां सह। पंचानामनुवाको नामध्येता। पंचानां काठकाग्नीनामध्येता। स्नातको विद्याव्रताभ्यां। मंत्रब्राह्मणवित् ब्राह्मणाय मंत्र
स्यार्थज्ञः। धर्मज्ञो धर्मशास्त्राणामर्थज्ञः। ब्रह्मदेयानुसंतानः ब्राह्मविवाहोढासंतानः इतिकरणाद्यश्चान्य एवं युक्तः यस्मात्पितृपितामहादयः पुरो
पुरुषं समनुतिष्ठता विद्यातपोभ्यां पुण्येभ्यश्च कर्मभ्यो येषामुभयतो नाब्राह्मण्यं निनयेयुः पितरस्तद्विधो इत्येवमादिलक्षणः स एष सर्वः पंक्तिपावनः।

गौ०सू०टी०

६०

हविष्युचैवं हविःशब्देन देवानि मानुषाणि च कर्माण्युच्यंते। तेष्वयं च मुक्तलक्षण एव ब्राह्मणा भोजयितव्याः। ननु प्रतिषिद्धस्तेनादय
इति दुर्वालादीन् श्राद्ध एवैके श्राद्ध एवैके एके तु दुर्वालादीनारभ्य ये नुक्तास्ते श्राद्ध एव न भोजयेन्न तु दैवमानुषयोरिति मन्यंते। स्वमतं तु त
त्रापाभोज्या एवेति द्विरुक्तिः पूर्ववत्॥ इति श्रीहरदत्तकृतायां गौतमीयधर्मसूत्रवृत्तौ मिताक्षरायां पंचदशोऽध्यायः छ १५ छ छ छ
श्रावण्यादि वार्षिकं प्रोष्ठपदीं वोपाकृत्याधीयीत छंदांसि श्रवणेन युक्ता पूर्णमासी श्रवणनक्षत्रेण युक्तः काल इत्युक्तस्याणो लुक्तिविशेष
इति लुप्। युक्तवद्भावस्तु न भवति। विभाषा फाल्गुनीश्रवणाति निर्देशात्। श्रावणीत्यपि भवति। पौर्णमास्यां हि लुब्विशेष इति न भवति।
फाल्गुनी कार्तिकी चैत्रीभ्य इति निर्देशात् श्रवणशब्दे तूभयं भवतीति। मघादिस्थे सवितरि यो यो दर्शः प्रवर्तते। चांद्रमासास्तत्तदंतास्चैत्राद्या
द्वादश स्मृताः॥ तेषु या पौर्णमासी सा सा चैत्र्यादिका स्मृता। कादाचित्केन योगेन नक्षत्रस्येति निर्णयः। तदेवं सिंहस्थे सवितरि यामावास्या
तदंतश्चांद्रमसो मासस्तस्य या पौर्णमासी सा श्रवणा श्रावणीति चोच्यते श्रवणयोगस्तु भवतु मा वा भूत्। एतेन प्रोष्ठपदी व्याख्याता। प्रोष्ठपदीमि ६०
त्यधिकरणे द्वितीया अत्यंतसंयोगे वा कथंचित्। श्रवणायां प्रोष्ठपद्यां वा पौर्णमास्यामुपाकृत्य उपाकरणं स्वं कर्म यथागृह्यं कृत्वा तत् छंदां
छंदांसि ब्राह्मणलक्षणान्यधीयीत। आचार्योऽध्यापयेच्छिष्या अधीयीरन्। तदिदमध्ययनं वार्षिकमित्याख्यायते वर्षतौ प्रतिसंवत्सरं वा भव
णं तीति। अध्यापनमप्यात्मापेक्षया अध्ययनं परापेक्षया हि वद। शिष्यापेक्षया तदध्यापनं किं यतः क्रममधीयीत अर्धपंचमान्मासान् पंच दक्षिणायनं वा॥ ॥

मलानीति कुंडाशी। कुंडग्रहणं लोकस्थाल्युपलक्षणं। कुंडादीनां तु प्रतिषेधो दैवाद्यपि क्रियास्विशः। अपर आह। पाकभाजनं कुंडं तत्रैव भक्षयेदिति। अग्नेर्
तितन्न त्यजेदिति कुंडाशिनः। सोमविक्रयी यज्ञे सोमस्य विक्रेता। अगारदाही वेश्मदाहकः। गरदो विषस्य दाता। अवकीर्णी व्रतभ्रष्टः। अथवा ब्रह्म
चारी स्त्रियमुपेयात्स्मृतः। गणप्रेष्यो गणानां प्रेष्यकृत्। अगम्यागामी सामान्यप्रवरस्त्रीगामी। हिंस्रः प्राणिवधरुचिः। परिवेत्ता नुजो नूढज्येष्ठ
दारपरिग्रहात्। परिवित्तिस्तत्त्रायानिति निषिद्धः। ज्येष्ठो अकृताधानेन कृताधानः कनिष्ठः पर्याधाता। ज्येष्ठः पर्याहितः। वसिष्ठः उन्मत्तः
किल्बिषी कुष्ठी पतितः क्लीब एव च। यक्ष्मामयावी च तथा नन्यायः स्यात्प्रतीक्षितुमिति। शातातपः। क्लीबे देशांतरस्थे च पतिते प्रव्रजिते तथा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने इति। त्यक्तात्मा साहसिकः उद्बंधनादौ प्रसक्तः। दुर्बलः खलितः। वेष्टितः श्लीपदी इत्यन्ये। कुनखी विना
कारणेन विवर्णनखः। विनष्टनख इत्यन्ये। श्यावदंतः स्वभावतः कृष्णदंतः। श्वित्री श्वेतकुष्ठी। पौनर्भवः द्विरूढा पुनर्भूस्तस्याः पुत्रः। कि
तवो द्यूतकरः। किं तवास्तीति पणपूर्वं जीवतः। अजपो विहितस्य सावित्र्यादिजपस्याकर्ता। राजप्रेष्यो दूतादिः। प्रातिरूपिकः कूटतुलामा
नादिव्यवहारी। शूद्रापतिः सैव भार्या यस्य। निराकृतिरस्वाध्यायः श्रोत्रियानित्युक्तेऽपि पुनः प्रतिषेधाद्रूपवयः शीलासंपत्तावयस्तत्या
गतो ग्रहणं भवति। किलासस्त्वग्दोषः ऊनं कलीति द्विजानां प्रसिद्धः। भूमिभवतायी यत्र कुसीदी वार्धुषिको वृध्याजीवी। वेश्यस्तत्त्यावा
णिज्योपजीवी। वणिगुपजीवी। चित्रकर्मादिभिरुपजीवी शिल्पोपजीवी। शैलूषा दारादिभिः प्रत्येकमभिसंबध्यते। ज्यास्त्री लोधनु

यमाणे तावंतं कालं नाधीयीत श्वसृगालगर्दभसंह्रादे संह्रादः सहत्राब्दनं श्वुनां शृगालानां गर्दभानां संह्रादेनाधीयीत त्रयाणां तु सहत्राब्द
न दंडापूपिकतयासिद्धः प्रतिषेधः रोहितेंद्रधनुर्नीहारेषु आकाशे लोहितेंद्रधनुषि दृश्यमाने नीहारो हिमानी तस्यां च तावंतं कालं नाधी
यीत अभ्रदर्शने चापर्तौ अपर्तुरवर्षर्तु तत्र सादकस्य मेघस्य दर्शनेन नाधीयीत मूत्रितउच्चारिते संजातमूत्रेछा मूत्रितः उच्चारितेपि
तथा। तत्र श्रेयान पि नाधीयीत। उत्सर्गं तु मानसमथ शुचिरिति यक्ष्यति निशासंध्योदकेषु निशा रात्रेर्मध्यभागः। तस्मिन्संध्यायामुद
के चावस्थितो नाधीयीत वर्षति च वर्षति च देवे तावन्नाधीयीत। धात्वर्थमात्रमत्र विवक्षितं न परिमाणविशेषः एके वलीकसंतानं ए
के मन्यंते वलीकसंतानं वलीकं नीध्रं महपलं ततस्तत्र वर्षधारासंतन्यते यथा न स्याव वर्षति देवे नाध्येयं आचार्यपरिवेषणे आचार्यो गुरुस्तु को
तयाः परिवेषणेन नाधीयीत। अपर आह। परिवेषणं भक्ष्यभोज्याद्यन्नोपहरणं। आसनपानन्नेन परिवेषेत्यादौ दर्शनात्। आचार्यस्य परिवेष ६१
णे नाधीयीतेति ज्योतिषोश्च प्रसिद्धे ज्योतिषी सूर्याचंद्रमसौ तयोश्च परिवेषणे नाधीयीत। पूर्वसूत्रे द्वितीयपक्षे त्वनुवृत्तस्य परिवेषण
शब्दार्थभेदो गीकरणीयः भीतो यानस्थः शयानः प्रौढपादः भीतो वर्तमानभयः। यानस्थश्चाश्वाद्यारूढः। शयानः शय्यामासेवमानः। प्रौढपा
दः पादं पादोपरि आधायी। पीवासनाद्यारोपितपादो वा। एवंभूतेन नाध्येयं श्मशानग्रामांतमहापथाशौचेषु श्मशानं शवदहनस्थानं।
ग्रामांतो ग्रामसीमा। महापथः प्रसिद्धः। अशौचं शौचराहित्यं। एतेषु स्थानेषु नाध्येयं। अथवा अशौचं जननमरणनिमित्तमस्पर्शलक्षणं तस्मि

न्नपि नाध्येयं पूतिगंधांतःशवदिवाकीर्त्यशूद्रसन्निधाने पूतिगंधे घ्राणगोचरे। दिवाकीर्त्यश्चांडालः। अंतःशब्द उभाभ्यां संबध्यते। अंतःश
वो तर्दिवाकीर्त्य इत्यामहन्ति। शूद्रसंनिधाने नाध्येयं द्वंद्वैकवद्भावः आपस्तंबोपि। अंतःशवं अंतश्चांडाल इति शुक्तके चोद्गारे शुक्तं अम्लं। अम्ले
चोद्गारे वर्तमानेन नाधीयीत ऋग्यजुषं च सामशब्दो यावत् ऋक्च यजुश्च ऋग्यजुषं। अनंतु रेफ्यादिना निपातः यावत्सामशब्दः श्रूयते तावदृ
ग्वेदयजुर्वेदं च नाधीयीत षिष्ठयंतपाठस्तु नास्मभ्यं रोचते आकालिकानि र्घातभूमिकंपराहुदर्शनोल्काः निर्घातो वज्रनिपातः। भूमिकं
पो भूचलनं। राहुदर्शनं ग्रहणं। उल्काउल्कापातः। एते आकालिका अनध्यायहेतव इति प्रकरणाद्गम्यते। यस्मिन्काले एते भवंति अपरेद्युस्त
त्पर्यंतकाल आकालः तत्संबंध आकालिकः स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निषु स्तनयित्नुर्मेघशब्दः। प्रसिद्धमन्यत्। प्रादुष्कृतेष
ग्निहोत्रहोमकाले संध्यायां स्तनयित्न्वादय एते त्रयो भवंतः प्रत्येकमाकालिकानध्यायहेतवः। अपर्तावित्येके नावाह अहन्कृते वर्षतीवृते भ
वेयुः संध्यायां तदा प्रातश्चेदहर्मात्रमनध्यायः सायं तु रात्राववनध्याय इत्यर्थः ऋतौ त्वादानुक्ते विद्युति नक्तं चापररात्रात् यदि नक्तं वि
द्युद्दृश्यते न संध्यायां तदा अपररात्रात् रात्रेस्तृतीयभागोपररात्रं आतस्मादनध्यायः। ततोध्येयं। प्रातस्तु संध्यायां विद्युति जाबाल आह
विद्युतस्तु प्रातरहरनध्याय नद्गिजि त्रिभागादिप्रवृत्तौ सर्वं यद्यङ्क्तस्तृतीयाद्भागादारभ्य विद्युत्प्रवर्तते न केवलायां संध्यायां नापि नक्तं न
दा सर्वरात्रमनध्यायः उल्का विद्युत्समेत्येकेषां उल्का च विद्युत् तुल्यायथा विद्युत्यनध्यायो विद्युति नक्तं चापररात्रादित्येवमुल्का

पातेपीत्येकेषांमतं स्तनयित्नुरपराह्ने स्तनयित्नुरपराह्ने यदि भवति न संध्यायां तदा विद्युत्समो भवति।अपररात्रमनध्यायं करोति
अपि प्रदोषे प्रदोषेपि भवन्स्तनयित्नुर्विद्युत्समः अपररात्रमनध्यायहेतुः। सर्वं नक्तमर्धरात्रात् प्रथमात्त्रिभागादारभ्यार्ध
रात्रात्प्रवृत्तः स्तनयित्नुः सर्वं नक्तमनध्यायहेतुः अहश्चेत्सज्योतिः अहश्चेत्स्तनयित्नुर्भवति प्रागपराह्णात्तदा सज्योतिरनध्यायः
सकलं दिवसमित्यर्थः विषयस्थे च राज्ञि प्रेते यस्मिन्विषये स्वयं वसति तत्रस्थे तस्याधिपतौ राज्ञि प्रेते सज्योतिरनध्यायः।आकालि
कइत्यन्ये विप्रोष्य चान्योन्येन सह यदा सहाध्यायिनः परस्परं विप्रवसेयुः कोविद्याचार्येण संगं तास्तदा सज्योतिरनध्यायः।अप
रेषां मेलनादित्येके।आकालिकमित्यन्ये संकुलोपाहितवेदसमाप्तिछर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रं संकुलश्चोरादिभिर्या
माधुपद्रवः।उपाहितोग्निदाहः।वेदसमाप्तिः शाखासमाप्तिः।छर्दनं भुक्तोद्गारः।श्राद्धमेकोद्दिष्टादि।मनुष्ययज्ञो वसंतोत्सवादिः।भो
जनशब्द उभाभ्यां संबध्यते।श्राद्धभोजने मनुष्ययज्ञभोजनइति।एतेषु निमित्तेष्वहोरात्रमनध्यायः।मनुष्यप्रकृतीनां च देवानां यज्ञे
भुक्तेत्येकइति ये मनुष्या भूत्वा प्रकृष्टेन तपसा देवाः संपन्नास्तेषां यज्ञेस्तत्प्रीत्यर्थं ब्राह्मणभोजनं अमावास्यायां च अमावास्याया
महोरात्रमनध्यायः द्व्यहं वा तदहः पूर्वेद्युश्च द्व्यहमनध्यायः।शुक्लचतुर्दश्यां तेनध्यायस्य भूतांतरमृग्यं निस्त्वाष्टका त्रिरा
त्रं ऊर्ध्वमाग्रहायण्यास्तिस्रोपरपक्षे तिस्रोष्टकाः।नास्त्रिरात्रमनध्यायहेतवस्त्वहः पूर्वेद्युरपरेद्युश्च अंत्यामेके एकेत्वा

अर्धपंचमंमेयेषां तानर्धपंचमानर्धाधिकांश्चतुरो मासान्पूर्णान्वा पंचमासान्यावद्दक्षिणायनं एवमधीयानः। ब्रह्मचार्युत्सृष्टलोमान
मांसं भुंजीत ब्रह्मचारी भवेत्स्त्रीसंगं वर्जयेत् उत्सृष्टरोमा नरवश्मश्रुकस्मादित्यत्रोक्तं लोभकर्म तदुत्सृष्टं येन स उत्सृष्टरोमा एवंभूतो मु
वन्न मांसं भक्षयेदित्यर्थः।अयमध्यापयितुरुपदेशः।न ब्रह्मचारिणः प्राप्त्यभावात्।आपस्तंबोप्याह।प्रवचनयुक्तो वर्षाशरदं मैथुनं वर्ज
यदिति।यश्च केवलानि व्रतानि पारं नीत्वा जायामुपयत्य पश्चादधीते सोप्येवं तस्यात त्र ग्रहणार्थमप्येवं।अश्वलायनोप्याह।समावृत्तो ब्र
ह्मचारि कल्पेनेति।तत्र त्वनुगमनं पाक्षिकमभ्युपगतं।यथा ह जायामुपेयेत्येके।प्राजापत्यं तदिति द्वैमास्यो वा नियमः द्वौ मासौ भूतभा
विनौ वा द्वैमास्यः मासद्वयमित्यर्थः जो द्विगोर्यप्।अवस्थापि प्रयुंजते स एव द्वैमास्यः।अयं ब्रह्मचार्यादिनियमो मासद्वयं वा भवति त्रास्य प
क्षो विकल्पः।अथानध्यायानुच्यंते नाधीयीत वायौ दिवा पांसुहरे पांसून्हरतीति पांसुहरः।वायौ दिवा पांसुहरे यावत्तिष्ठति नाधीयी
त।अपांसुहरे न दोषः पांसुहरेपि रात्रौ न दोषः कर्णश्राविणि नक्तं व्यत्ययेनायं कर्मणि कर्तृप्रत्ययः कर्णाभ्यां श्रूयत इति कर्णश्रावी।
एवंभूते महाघोषे वायौ वाति सति नक्तं नाधीयीत बाणभेरीमृदंगगर्तार्तशब्देषु बाणो वीणाविशेषः शततंतुरिति महाव्रते दर्शनात्।भे
रीमृदंगौ प्रसिद्धौ।गर्तो रथः आरोहेतं वरुणमित्र गर्तं।स्तद्भिश्च गर्गस्त्वदंड इत्यादौ दर्शनात्।आर्ते बंधमरणादिना दुःखितः।तेषां शब्देषु

केवलं भुक्तवंतः। तत्र मनुः। प्राणि वा यदि वाप्राणि यत्किंचिच्छ्राद्धिकं भवेत्। तदालभ्याप्यनध्यायः पाण्यास्या ब्राह्मणाः स्मृता इति। आमश्राद्धेप्येत
द्द्वलिंगं प्रतिविद्यं स्यात्स्मरंति स्मरंति प्रतिविद्यं प्रतिधर्मशास्त्रं यानन ध्यायान्स्मरंति स्मर्तारस्तेष्वपि हेतुष्वनाधीयीत। तत्र वसिष्ठः। दि
ग्दाहपर्वतप्रपातेषूपलरुधिरपांसुवर्षेष्वाकालिकमिति। श्लेष्मातकस्य च्छायां मधूकस्य तथैव च। कदाचिदपि नाध्येयं कोविदारकपित्थ
योरिति। एवमन्यत्रापि द्रष्टव्यं इति श्रीहरदत्तकृतायां गौतमीयवृत्तौ मिताक्षरायां षोडशोऽध्यायः ॥ १६ ॥ मानसमप्यशुचीत्यु
क्तं तत्राशुचित्वमाहारजनितमपि भवतीति भक्ष्याभक्ष्यप्रकरणमारभ्यते प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत स्वकर्मसु
वर्णप्रयुक्तेष्वाश्रमप्रयुक्तेषूभयप्रयुक्तेषु गुणेषु च प्रशस्ताः अहो अयं स्वकर्माण्यनुतिष्ठतीति तेषां द्विजातीनां गृहे ब्राह्मणो भुंजीत। क्षुदुपघातार्थं भो
जनप्रवृत्तिः शक्यं च यस्य कस्यचिद्गृहे भुंजानेन क्षुदुपहंतुं। तत्र परिसंख्येयं एषामेव गृहे ब्राह्मणो भुंजीत नान्येषामिति प्रतिगृह्णीयाच्च ॥
प्रतिग्राह्यः एषामेव सकाशान्नान्येषामिति। अस्यापवादः एधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनावसथयानपयोदधि ६३
धानाशफरीप्रियंगुस्रङ्मार्गशाकान्यप्रणोद्यानि सर्वेषां एधः काष्ठं उदकं कूपादिस्थमपि यवसं तृणादि मूलमार्द्रकादि फलमाम्रादि
मधु माक्षिकं। अभयं परित्राणं। अभ्युद्यतमयाचितेनापि दात्रा स्वयमानीतमिदं गृहाणेति। शय्या कटादि। आसनं पीठादि। दधिपयसि
प्रसिद्धे। धाना भृष्टयवाः। शफरी मत्स्यविशेषः। स्रक् माला। मार्गं मृगमांसं। पंथा वा मार्गः। शाकं वास्तुकादि। एतान्येधादीन्यप्रणोद्यानि स धा

र्वतः प्रतिग्राह्याणि। याचित्वापि। अभ्युद्यतं त्वप्रणोद्यं अप्रणोद्यमप्रत्याख्येयं। प्रत्याख्याने दोषः। तथा चापस्तंबः। उद्यतामाहृतां भिक्षां पुरस्ताद
प्रचोदितां। भोज्यां मेने प्रजापतिरपि दुष्कृतकारिणः। न तस्य पितरोऽश्नंति दश वर्षाणि पंच च। न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यत इति। अस्यापवा
दः। कौलिकसौकरिकस्य मृगयोः अल्पकृतस्य पतितान्नः। कुलटायाः षंढस्य तेषामन्नमनाद्यमिति पितृदेवगुरुभृत्यभरणे चान्यत् पितृस्मरणम्
विदेहेन श्राद्धकरणं। देवभरणं अग्निहोत्रादि। गुरवः पित्रादयः। भृत्याः पुत्रदासादयः। तेषां भरणं भक्तादिदानं। एतेषु निमित्तेष्वन्यदपि उक्तादन्य
दप्यप्रणोद्यं। मनुरुक्त। पितॄन्गुरूंश्चोद्धरिष्यन्नर्चिष्यन्देवतातिथीन्। सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः इति वृत्तिश्चेन्नांतरेण शूद्रात्
यदि शूद्रप्रतिग्रहमंतरेण वृत्तिर्जीवनं न निर्वर्तते तदा शूद्रादपि प्रतिगृह्णीयात्। पशुपालक्षेत्रकर्षककुलसंगतकारयितृपरिचारका भोज्यान्नाः ॥
यो यस्य पशून्पालयति क्षेत्रं वा कर्षति यश्च यस्य कुले संगतः पारंपर्येण मित्ररूपेणागतः। यश्च यस्य परिचारको दासस्तेषां ते भोज्यान्नाः। पुरुषप्र
पन्नस्तेषां भुंजीरन्। कारयिता ऊर्ध्वं नापितः। श्मश्रूणि कारयतीति दृश्यते। सवर्णाविप्राद्व्यायामध्यायां जातः सोऽपि भोज्यान्नः। तत्र मनुः। क्षेत्रिकः
कुलमित्रं च गोपालो दासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेदिति। एतच्चात्यंतापद्विषयं वणिक् चाशिल्पी वणिक् च भोज्यान्नः न
स चेच्छिल्पी कुंभकारादिको न भवति। अथाभोज्यमाह नित्यमभोज्यं नित्यं परगृहे न भोक्तव्यं गृहस्थस्यायं प्रतिषेधः उपास्त्येयस्य त्वाय
परपाकमबुध्य इति मानवदर्शनात्। अनाथश्चायावत्त्वन्य हं दृश्यते तन्नित्यभोज्यं केशकीटावपन्नं यच्चान्नं केशैः कीटैर्वा संबद्धं तद्द्रव्यमभोज्यं।
अत्र वसिष्ठः। कामं तु केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मनावकीर्य वाचा प्रशस्तमुपयुंजीतेति। मनुस्तु। पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं। केशकी

शवपन्नं च मृत्प्रक्षेपेण शुध्यतीति । तदेषां कृतिविशेषोऽव्यवस्था । अपर आह । पावकादारभ्य यत्केशकीटावपन्नं तत्र गौतमीयं । ऊर्ध्वं तु वासिष्ठमानवे
इति रजस्वलाकृष्णशकुनिपदोपहतं कृष्णशकुनिः काकः पदग्रहणं तुंडादेरप्यवयवस्योपलक्षणं । रजस्वलायाः कृष्णशकुनिपदेन चोप
हतं स्पृष्टमन्नं अभोज्यं । प्रभूतं तु अन्यपरोक्षार्थः । शृतं द्रोणाधिकं वा श्वकाकैरुपघातितं । न त्य[illegible]स्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत् । गायत्र्यष्टस ग्यंत
हस्रेण मंत्रपूतेन वारिणा । भोज्यं तद्ब्राह्मणैरोक्षितं विप्रैः पर्यग्निकृतमेव चेति उपहतप्रदेशमुद्धृत्य इदं कार्यं भ्रूणघ्नावेक्षितं भ्रूणहा ब्रह्महा । तथा
च वासिष्ठः । ब्राह्मणं हत्वा भ्रूणहा भवतीति तेन प्रेक्षितमप्यभोज्यं भावदुष्टं भोजयित्रावज्ञातेन दत्तं भोक्तुर्वमिनं भोक्तुः घृणाकरं भावदुष्टं दत्ते
प्यभोज्यं गवोपघ्रातं गवा वत्ससमीपे घ्रातमभोज्यं शुक्तं केवलमदधि यत्पक्वं कालवशादम्लरसं तत्केवलं शुक्तं तदभोज्यं । के
वलग्रहणात् क्षीरोदकादिसंसृष्टं अम्लमपि भोज्यं । दधि तु केवलमप्यम्लं भोज्यं । तक्रकांजिकयोरपक्वत्वान्नायं प्रतिषेधः । आचारे पि तक्रे
निर्विवादः । कांजिके सविवादः पुनःसिद्धं सकृत्पक्वस्य तादृशस्यैव पाकः पुनः क्रियते । पूर्वं सुपक्वमपीति । तत्पुनःसिद्धं तदभोज्यं । ६४
अन्यथापक्वस्य तु पाकांतरे भर्जनादौ न दोषः पर्युषितमशाकभक्ष्यस्नेहमांसमधूनि उदयास्तमयांतरितं पर्युषितं । दिवापक्वं रा
त्रौ रात्रिपक्वं दिवा तदशुक्तमप्यभोज्यं । शाकादि तु पर्युषितमपि भोज्यं । शाकं मुक्तं भक्ष्याः पृथुकापूपादयः । स्नेहा घृततैलादिः मांसं
प्रसिद्धं मधु च । एतानि पर्युषितान्यपि भोज्यानि । स्नेहमध्वादीनामपक्वत्वादेवापर्युषितत्वं तस्मात् स्नेहमधुग्रहणं तत्संसृष्टस्यापि

मेकाष्टकामनध्यायहेतुं मन्यंते अभितो वार्षिकं श्रावणादिवार्षिकमिति यदुक्तं वार्षिकमनध्ययनं तदभितस्यास्योभयोः पार्श्वयोर्यत्कर्मणी उपाकरणो
त्सर्जने तयोरपि कुर्वतोस्त्र्यहमनध्यायमेके इच्छंति । तथा मनुः । उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतमिति । उत्तानाउपाकर्मणि चोत्सर्गे त्र्यहमध्याय इ
ति सर्ववर्षविद्युत्स्तनयित्नुसंनिपाते वर्षाविद्युत्स्तनयित्नुसंनिपाते त्रिरात्रमनध्याय इति सर्व एवाचार्या मन्यंते प्रस्यंदिनि प्रत्युत्स्यंद
ने वर्षप्रस्यंदनं तद्वति च काले यावत्प्रस्यंदनं अनध्यायः । व्यहं त्र्यहं चतुरहं वा ऊर्ध्वं भोजनादुत्सवे उपनयनादावुत्सवे भोजनादूर्ध्वं तदहरन
ध्यायः प्रधीतस्य च निशायां चतुर्मुहूर्तं उपाकृत्याधीते तु प्रक्रांतः प्राधीतः आदिकर्मणि क्तः कर्तरि च । तस्य निशायां चतुर्मुहूर्तं । चतुरोमु
हूर्तान् षष्ठीनाडिका अनध्यायः । श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीतेत्यापस्तंबीयेन समानार्थमिदं । चकारात्त्रयोदश्यां प्र
दोषे च निशायां चतुर्मुहूर्तनिषेधो दर्शितः नित्यमेके नगरे एके आचार्या नगरे नित्यमेवाध्ययनं नेच्छंतीति नित्यग्रहणं निशाधिकारनिवृत्त्यर्थं
मानसमप्यशुचिः अप्रयतः सन्मानसमप्यध्ययनं न कुर्यात् । एवं चान्येष्वनध्यायहेतुषु मानसमनिषिद्धं श्राद्धिनामाकालिकं श्राद्धमस्या
स्तीति श्राद्धी श्राद्धस्य कर्ता अत इनिठनौ । न तु श्राद्धमनेन भुक्तमिति । भोक्तारि पूर्वमेव निषेधत्वात् । तेषां श्राद्धदातॄणामाकालिकमनध्यायः
अपर आह । यः श्राद्धे केवलं भुक्तवं[illegible]तोनपि त्राद्यर्थं पात्रतया तेषां पूर्वको हेतोत्र निषेधः । अयं त्वाकालिकनिषेधः पित्राद्यर्थं पात्रतया भुक्तव
तामिति अकृतान्नश्राद्धिकसंयोगेपि भोजनासंभवे यदकृतान्नं पितृभ्यो दीयते तदकृतान्नश्राद्धिकं तत्संयोगे आकालिकमनध्यायं न

गौ० सू० टी०

भेनउपानेवाछते इतरेषामप्यभोज्यमिति । गुरुभिः छतेन न दोषः । समासमाभ्यां विषमसमे पूजातः । कुलशीलादिभिः तुल्यः समः तद्विपरीतो
समः । विषमसमत्वाद्यो भावयो वैषम्यसाम्ये इति समाहारद्वंद्वः । पूजातः पूजायामासनपरिवेषणादिकायां । समेन सह पूजायां विषमे असमे
न च साम्ये क्रियमाणे न तदन्नमभोज्यं । अनर्चितं च । यच्चानर्चितं दीयते तदपि अभक्ष्यमिति तदप्यभोज्यं । प्रतिग्रहेऽपि तुल्यमेतत् । यथाह
मनुः । येऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव यः । तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये इति । रोषवत इति क्वाप्यं प्रातरहः नान्यभिपूजयेदिति वसिष्ठः ।
तदकारणमनर्चितमित्यन्ये । गोश्च क्षीरमनिर्दशायाः सूतके । सूतकं प्रसवः प्रसूतायाः अनतिक्रांतदशाहायाः गोः क्षीरमभोज्यं । अजाम
हिष्योश्च । अजामहिष्योः सूतके अनिर्दशाहयोः क्षीरमपेयं । नित्यमाविकमपेयमौष्ट्रमैकशफं च । नित्यमहणात् केवलमनिर्दशाह
मेव । आविरजाविकः । उष्ट्रः प्रसिद्धः । एकशफ एकखुरः अश्वादयः । अविकादीनां संबंधि क्षीरं नित्यमपेयं । मनुस्तु । आरण्यानां च सर्वेषां मृगाणां
माहिषं विना । स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि इति । स्यंदिनीयमसूसंधिनीनां च । यस्यास्तनेभ्यः क्षीरं स्यंदते सा स्यंदिनी । यमसू ६५
र्युग्मवत्सप्रसूतिका । या गर्भिणी दुग्धे सा संधिनी । एककालदोहेत्यन्ये । एवंभूतानां गवादीनां क्षीरमपेयं । विवत्सायाश्च । वत्सेन वि
युक्ता विवत्सा । तस्याश्च गवादेः क्षीरमपेयं । अत्र प्रकरणे प्रतिषिद्धविकारस्यापि दध्यादेः प्रतिषेधो भवतीति । आचारस्त्वनिर्दशायां न यथा । अ
न्यत्रानियतः । इदानीं स्वरूपतस्त्वभक्ष्यानाह । पंचनखाश्शशकश्वाविङ्गोधाखड्गकच्छपाः । अभक्ष्या इत्युत्तरत्र वक्ष्यति । येषां

पाणिपादेषु पंच नखाः नखास्ते पंचनखाः वानराद्यः । अभक्ष्याः शल्यादीन्वर्जयित्वा । शल्यको वराहविशेषः । यस्य नाराचाकाराणि लोमानि । शशः प्रसिद्धः ।
श्वाविट् शल्यकः । यस्य चर्मणा तनुत्राणं क्रियते । गोधा कृकलासजातिर्महाकायः । खड्गो मृगविशेषः । शृंगमृत्युः । कच्छपः प्रसिद्धः । अत्र पठंति । अ
भक्ष्याणां तु यन्मूत्रं तदुच्छिष्टं तथैव च । अभोज्यमिति निर्दिष्टं विष्ठावच्च प्रलेपनमिति । उभयतोदत्केश्यलोमैकशफकलविंकप्लवचक्रवाकहंसाः ।
उभयतोदंता अश्वादयः । तद्भावः आर्षः । केशिनः केशातिशययुक्ताः चमर्यादयः । अलोमानः सर्पादयः । एकशफा एकखुराः । अनुभयतोदंतार्थमिदं ।
कलविंको ग्रामचटकः । प्लवः शकटविलाख्यः पक्षी । हंसचक्रवाकौ प्रसिद्धौ । एते चाभक्ष्याः । काककंकगृध्रश्येना जलजा रक्तपादतुंडा ग्राम्यकु
क्कुटसूकरौ । काकादयः प्रसिद्धाः । जलजा अपि पक्षिण एव काकादिसन्निधानात् । तेषां विशेषणं रक्तपादतुंडा इति । असंभवाद्ग्राम्यः उत्तरयो
श्चेत्ति विशेषणं । ग्राम्यकुक्कुटो ग्राम्यसूकर इति । आरण्ययोरप्रतिषेधः । धेन्वनडुहौ । धेनुः पयस्विनी गौः । अनड्वान् अनोवहनयोग्यो बलि
वर्दः । द्वंद्वे अचतुर इत्यादिसमासांतनिपातनात् डुच् । उहानि तिप्राप्तेति तृन्ना हृतं । अपपातायां धेन्वनडुहौ वा भक्ष्यौ । आपस्तंबीयं तु गवाभ्यां मे
सं भक्ष्यानुक्तः धेन्वनडुहौ भक्ष्यं मेध्यमानडुहमिति वाजसनेयकमित्युक्तं । आनडुहं केवलं भक्ष्यं मेध्यमपीत्यर्थः । बह्वृचब्राह्मणेऽपि श्रूयते । त
द्यथैवादो मनुष्यराज आगतेऽन्यस्मिन्वाऽर्हत्युक्षाणं वा वेहतं वा क्षदंत इति । तत्रोमिषेर्भक्ष्यमनेषामभक्ष्यमिति । वर्षापि किंलतत्र नानुज्ञातः ।
दातागोग्रासप्रदाने । मार्य स्मेह न्य तेसगाव्आतिथिरिति । एवं कलिपूर्वमाचारः । इदानीं न गेध्यापि । अपन्नदद्वसन्नवथामांसानि । अपन्नदन्न

गौ०सू०टी०

पतितदंतः। सो ऽप्रतिषिद्धोऽपि न भक्ष्यः। यदा वै पशोर्दंताः पद्यंते ऽथ समेध्यो भवतीति ब्राह्मणं। याप नरस्य मलं तत्पश्चान्नमिति विज्ञातं इत्यापस्तंबः।
६६ श्रवसन्नो व्याधितः। वृथा मांसं वृथान्नेन व्याख्यातं। पुनः प्रतिषेधस्तु मांसस्य प्रायश्चित्तगौरवार्थः। किसलयक्याकुलशुननिर्यासाः। किसलयः
पल्लवो ऽग्रप्ररोहः। क्याकु छत्राकः। लशुनं प्रसिद्धं। निर्यासो वृक्षत्वक्स्रुतः किनिभूतो रसो हिंग्वादिः। किसलयादयो ऽभक्ष्याः। लोहिता व्रश्चनाः। ६६
वृक्षादिषु वृश्चनप्रदेशे भवाः [illegible] व्रश्चनानि निर्यासास्ते लोहिताश्चेन्न भक्ष्याः। स्वयं स्रुतनिर्यासा लोहिता अलोहिताश्च भक्ष्याः। व्रश्चनप्रभवास्तु लोहिता
एवाभक्ष्याः। लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्त्यजेति। केचिल्लोहितत्वं किसलयादिष्वपि पठंति। हिंगुस्तु निर्यासो व्रश्चनप्रभवो नवेति चिं
त्यं। सर्वथा शिष्टा अपि भक्षयंति। कर्पूरस्तु न निर्यासो न व्रश्चनप्रभवो न लोहितः तस्माद्भक्ष्य एव। निचुदारुबकबलाकाशुकमद्गुटिट्टिभ
मान्धालनक्तंचरा अभक्ष्याः। निचुदारुः दार्वाघाटः। मद्गुः जलवायसः। मान्धालो वागुलः। नक्तंचरा उलूकादयः। अन्ये प्रसिद्धाः। अभक्ष्या इति पंचम
ख्यातस्यास्य संबंधे। भक्ष्याः प्रतुदविष्किरजालपादाः। तुंडेन प्रतुद्य प्रतुद्य भक्षयंतीति प्रतुदाः। ये पादाभ्यां विकीर्य विकीर्य भक्षयंति मयू
रादयस्ते विष्किराः। जालाकारौ पादौ येषां ते जालपादाः। एते भक्ष्याः। यद्यप्यभक्ष्येषूक्तेष्वन्ये भक्ष्या इति गम्यते तथापि भक्ष्या इत्युपादानं अनुक्ता
नामापद्येव भक्ष्यत्वं स्यादनापदि माभूदिति। मत्स्याश्चाविकृताः। विकृता मनुष्यशिरस्कादयस्तद्विपरीता अविकृता भक्ष्या इति। वध्याश्च ध
र्मार्थे। ये भक्ष्या उक्तास्ते न केवलं स्वयं मृता अन्यहता वा भक्ष्याः अपि तु वध्याश्च धर्मार्थे ऽतिथिपूजादौ। अपर आह। ये धर्मार्थे यज्ञादौ वध्यास्ते निपा

पर्युषितस्य पर्युदासार्थं। तेन तत्संसृष्टं पर्युषितमपि भोज्यमगर्हितं। तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेदिति। उत्सृष्टपुंश्चल्यभिशस्ता
नपदेश्यदंडिकतक्षककदर्यबंधनिकचिकित्सकमृगय्वनिषुचार्युच्छिष्टभोजिगणद्विषाणानां। उत्सृष्टः पितृभ्यां परित्यक्तः। गंडस्यापरि
जातानां परित्यागो विधीयते इत्यादिना कारणेन दुर्भिक्षे रक्षणाशक्त्या प्रातिकूल्येन वा। पुंश्चली अनियतपुंस्का व्यभिचारिणी गणिका च।
अभिशस्तस्तु जातजातावादोषेण ख्यातः। अनपदेश्य एवंभूतो ऽयमिति व्यपदेष्टुमनर्हः। स्त्री नपुंसकाभ्यामनिर्देश्यात्तृतीया प्रकृतिरित्यन्ये।
दंउ दंडिको राज्ञा [illegible]कारे नियुक्तः। शूद्रात् स्त्री नेलोमेन वैश्यायां जातस्तक्षा। वैश्यात् क्षत्रियायां जातो माहिष्यः। शूद्रायामुत्पन्ना वैश्याज्जाता करणी।
तस्यां करण्यां माहिष्याज्जातो रथकारः। स तक्षेत्यन्ये। कदर्यो लुब्धः। यमधिकृत्य मनुराह। श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषिकेरि
ति। बंधनिको बंधनागाररक्षी। चिकित्सको वैद्यः। शल्यकर्ता वा। मृगयुः सन्निषुचारी। न भवतीति किंतु यस्साचारी [illegible] एकः। उच्छिष्टभोजी निगद
सिद्धः। गणो जनसमुदायः। विद्विषाणः शत्रुः। एतेषामुत्सृष्टादीनामन्नमभोज्यं। येत्र प्रशस्ताद्द्विजातयो न भवंति तेषां ग्रहणं उद्यतप्रतिषेधा
र्थं। तथा चापस्तंबः। चिकित्सकस्य मृगयोः इत्यादि। आपद्यप्रतिषेधार्थमित्यन्ये। अयं त्वापदि नां प्राग्दुर्बलात्। यथापेक्ष्याः आपत्प्रदिष्टा
[illegible]मपर्युतास्तेषामप्यन्नमभोज्यं। वृथान्नाचमनोत्थानव्यपेतानि। यदात्मार्थं पच्यते न पितृभ्यो ऽद्यार्थे तद्वृथान्नं। श्रूयते हि मोघम
न्नं विंदते अप्रचेता इत्यादि। भोजनमध्ये यत्र कायाद्विना पुनराचम्यते उत्थीयते वा। अपेतान्यन्यद्व्यपेतं सहितमिति। एते आचमनोत्थानव्यपेते अ
न्ने। एतानि वृथान्नादीन्यभोज्यानि। अत्रेदं [illegible] अगुरुभिराचमनोत्थाने चेति। एकस्यां पंक्तौ बहुषु भुंजानेषु एकेनापि पुरुषेणातिभिक्षेनाच

गौ०सू०वृ०

पत्युर्भ्रातादेवरः कनिष्ठ इत्युपदेशः। तत्रप्रकारः गुरुप्रसूता नर्तुमतीयात् गुरुभिः पतिसपिण्डैः पितृपक्षैर्वा नियुक्ता सती संयुज्येत्। तत्रापि नर्तुम
तीयात्। ऋतुकालं नातिक्रमेत्। तत्रापि प्रथमे गमने गर्भसंभवः श्रूयते हि तल्लवकारणं ब्राह्मणेप्यु प्रथमे ह नु रेतः सिंचते स गर्भः संभवत्यथ यत्र
तत्सिंच्यते मुधैव तत्परासिच्यत इति। ततश्चर्ताववि समकृद्गमनं। अत्रोशनसो विशेषः। नियुक्तां सर्वाङ्गघृताभ्यक्तां तेनु सर्वाङ्गमात्मानमभ्यज्य
गच्छेदिति। देवराभावे क्रमेणागमनीयानाह पिण्डगोत्रर्षिसंबन्धेभ्यो योनिमात्राद्वा पिण्डसंबन्धः सपिण्डः। गोत्रसंबन्धः सगोत्रः। ऋषिसंबन्धः स
मानप्रवरः। हरितकुत्सादयः। एतेभ्यः क्रमेणापत्यं लिप्सेत। योनिमात्राद्वा। अत्र स्मृत्यन्तरं। सर्वाभावे योनिमात्राद्ब्राह्मणजातिमात्रादिति
नादेवरादित्येके एके मन्यन्ते देवरादेव लिप्सेत नादेवरादिति नातिद्वितीयं प्रथममपत्यमतीत्य द्वितीयं न जनयेदिति। अथ यदुत्पा
दितमपत्यं क्षेत्रिणो बीजिनो वेति विषये निर्णयमाह जनयितुरपत्यं जनयितुस्तदपत्यं भवति न क्षेत्रिणः। आपस्तम्बोपि। उत्पादयितुः
पुत्र इति हि ब्राह्मणमित्यादि समयादन्यस्य यदि ज्ञातयः समयं कुर्वन्ति युञ्जते तेभ्योऽपत्यमस्त्विति। तत्। यथा विचित्रवीर्यस्य क्षेत्रे स
त्यवतीतस्यां व्यासेनोत्पादितमपत्यमिति जीवतश्च क्षेत्रे यदा जीवत्येव स्वस्त्री वंध्या रुग्णा वा प्रार्थयते समक्षेत्रे पुत्रमुत्पादयेति तदा क्षेत्रिण
एवापत्यं न बीजिनः परस्मात्तस्य परस्माद्देवरादिव्यतिरिक्तादनियुक्तायामप्युत्पन्नं यत्सा मनपत्या वोत्पन्नः पुनस्तस्यैव बीजिनो भवति।
न क्षेत्रिणः द्वयोर्वा एवमुत्पादितमपत्यं द्वयोर्वा भवति क्षेत्रिणोः। इदं नियुक्ताविषयं। तथा च याज्ञवल्क्यः। अपुत्रेण परक्षेत्रे नियोगोत्पादितः

सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मत इति रक्षणात्तु भर्तुरेव यदि भर्ता क्षेत्रस्यैव रक्षण भरण पोषण संस्कारादि करोति तदा भर्तुरेव तदप
त्यमिति एवमृते नष्टे भर्तरि षड्वार्षिकं क्षपणं यदा दूरदेशगमनादिना भर्तुर्वार्ता न श्रूयते तदा षड्वर्षाणि प्रतीक्षणं कर्तव्यं ततो नियोगधर्मोनुष्ठे
यः श्रूयमाणेऽभिगमनं यदा तु भर्ता श्रूयतेऽस्मिन्देशे स्थित इति तदा तमभिगच्छेत् प्रव्रजिते तु निवृत्तिः प्रसङ्गात् यदि तु भर्ता प्रव्रजितो
भवति मोक्षाश्रमप्राप्तो भवति तदा सर्वस्मात्प्रसंगान्निवृत्तिः स्वयमपि निवृत्तिसुखी तं यत्नेन वस्यादिति द्वादशवर्षाणि ब्राह्मणस्य विद्यासंब
न्धे विद्याधिगमार्थं प्रोषितस्य ब्राह्मणस्य भार्या द्वादशवर्षाणि क्षपयेत्। नापत्योत्पत्तिर्नाभिगमनं भ्रातरि चैवं ज्यायसि यवीयान्कन्या
ग्न्युपयमेषु ज्येष्ठभ्रातर्यकृतदारे वाग्निहोत्रे च प्रोषिते कनीयान्भ्राता एवं द्वादशवर्षाणि प्रतीक्षेत ततः कन्यामुपयच्छेदग्नीनादधीत।
अत्र वसिष्ठविशेषः। अष्टौ दशद्वादशवर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति। द्वादशैव तु वर्षाणि ज्यायान्
धर्मार्थयोगतः। न्याय्याः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनरिति च षडित्येके एके मन्यन्ते षडेव वर्षाणि प्रतीक्ष्येतेति। प्रोषिते चाप्यन्तर
दृष्टिमेवात्र न धर्मपरइदं। गतं प्रासंगिकं पुनरपि स्त्रीधर्मानाह त्रीन्कुमार्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पित्र्यानलंकारान् ॥
यदि कन्यां पिता नदद्यात् ततः स्त्रीन्मृतूनतीत्य स्वयमेवानिन्दितेन कुलविद्याशीलादियुक्तेन भर्त्रा युज्येत। पित्र्यान्पितृकुलादागतानलंका
रानुत्सृज्य। अत्र मनुः। अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा। मातृकं भ्रातृदत्तं वा स्तेया स्याद्यदि किंचनेति। अत एवाह। प्रदानं प्राग्ऋतोः ॥

गो० सू० ६०

ऋतुदर्शनात् प्रागेव देयाकन्या अप्रयच्छन्दोषी तस्मिन्काले प्रयच्छन् पित्रादिर्दोषवान्भवति। आह याज्ञवल्क्यः। पिता पितामहो भ्राता सकुल्यो
जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ प्राग्वाससः प्रतिपत्तेरित्येके एके मन्यन्ते यदा
कन्या वासः प्रतिपद्यते अन्यथा लज्जितेवावदेवप्रदेयेति इत्यादानं विवाहासिद्ध्यर्थं धर्मतंत्रसंरोधे शूद्रात् इयमननुज्ञाता मपि शूद्राच्च ला
६८
दिकमादेयं विवाहसिद्ध्यर्थं यावता विवाहः सिध्यति तावत्। अधिके दोषः। तथा धर्मस्य पशुवधादेः प्रवृत्तस्य यज्ञतंत्रमंगपश्वादि तस्य संयोग
अविच्छेदसिद्ध्यर्थं यावता तंनिवर्तते तावदननुज्ञातमप्यादेयं शूद्रात् अधिके दोषः अन्यत्रापि शूद्राद्बहुपशोर्हीनकर्मणः इतरेभ्योपि
कृष्यंतइति पंचम्या स्तत्। शूद्रादन्यतोपि द्रव्यमादेयं स चेद्बहुपशुस्तथाहीनकर्मा भवति तद्दनुरूपं कर्म न करोति निषिद्धं वा कर्म सेवते।
शूद्रग्रहणं विधेयं यथा स्यादिति तेन शूद्राला भेवैश्यात्तदलाभे क्षत्रियात्। उक्तमेवार्थमुदाहरणेन दर्शयति शतगोरनाहिताग्नेः
गोग्रहणमुपलक्षणं। यस्तावद्द्रव्यो भवत्यग्नीश्च नाधत्ते निषिद्धकर्मेति शेषविहितदंडापूपिकतया व्याख्यातः सहस्रगोश्चासोमपात् पूर्वेणगतं ६८
यः सहस्रगुश्च भवति सोमं च न पिबति तस्मादिति सप्तमी चोभुक्तानिचयाय सप्तम्यर्थे द्वितीया। षट्सु वेलासु भोज्यालाभेनाभुक्त्वा स
तम्यां वेलायां यावता दिनिस्तावदननुज्ञातमप्यादेयं। अनिचयायेत्युक्तस्तेन निचयो न कर्तव्यः। भोभोज्यमपि नादेयं। अत्र मनुः अतएव सप्त
ह मभक्तेभक्तानिषडनश्नता। अश्वस्तनविधानेन हर्तव्यं हीनकर्मणइति आचक्षीत राज्ञा पृष्टः यद्यसौ चेवं कुर्वन्नन्याभिभिर्गृहीतोराजसु

अपि भक्ष्या अनृत्विजामपीति। धर्मार्थइति वचनादवकीर्णिवयो मासं न भक्ष्यं। तस्य प्रायश्चित्तार्थत्वात् व्यालहतादृष्टदोषवाक्याभ्यां न्युपयुक्ष्याप्युंजी
तातिथीनय्यायस्य इत्येवं भक्षयेत् नतुश्वादे रुच्छिष्टमिति वर्जयेत्। मनुराह। श्वामृगग्रहणेशुचिरिति। छिन्नस्विकत्त्वा। अत्र मनुः अनुमंता वि
शसिता निहंता क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः। न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफ
लेति। अत्र प्रतिषिद्धेष्वपि भक्षणानि वृत्तिरेव न्यस्तीत्यर्थः इति श्रीहरदत्तकृतायां गौतमीयसूत्रवृत्तौ मिताक्षरायां सप्तदशोध्यायः ॥ १७ ॥
अथ स्त्रीधर्मानाह अस्वतंत्रा धर्मे स्त्री श्रौतेगार्ह्ये च धर्मे स्त्री भर्तुरेवानुष्ठानमनुप्रविशति। व्रतोपवासादिभिरपि स्मार्तैः पौराणैश्च धर्मैर्नातिरेण भर्तु
रनुज्ञां स्वातंत्र्येणाधिक्रियते। आह शंखः। न व्रतोपवासनियमेज्यादानधर्मो वा नग्रहणं स्त्रीणामन्यत्र पतिशुश्रूषायाः। कामं तु भर्तुरनुज्ञया व्रतोपवा
सनियमादीनामभ्यासः स्त्रीधर्मइति। नारदोप्याह। स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि। विशेषतो गृहक्षेत्रदानाधमनविक्रयात्। एतान्येव
प्रमाणानि भर्ता यद्यनुमन्यतइति। मनुरुक्तं। बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने। पुत्रस्य स्थविरे भावे न स्त्री स्वातंत्र्यमर्हति। बालया वा युवत्या वा
वृद्धया वापि योषिता। न स्वातंत्र्येण कर्तव्यं कार्यं किंचिद्गृहेष्वपीति नातिचरेद्भर्तारं भर्तारं नातिक्रामेत्। भर्तुरन्यं मनसापि न चिंतयेत् वाक्चक्षुः
कर्मसंयता। यावदर्थं संभाषिणी वाक्संयता। प्रेक्षकादीनामप्रेक्षिणी चक्षुःसंयता। स्वकुटुंबार्थकर्मव्यतिरिक्तानां कर्मणामकर्त्री कर्मसंयता। ए
वंभूता स्यात्। अथानतिचरेद्भर्तारमित्यस्यापवादः अपतिरपत्यलिप्सुर्देवरात् अनपत्यायाः यस्याः पतिर्मृतः सापत्यं लिप्समाना सती देवराल्लिप्सेत।

६२

अथ खल्वयं पुरुष इति। किं सिद्धं भवति प्रतिलोमानामपि प्रायश्चित्तेष्वधिकारः सिद्धो भवति। यद्यपि तेषां भक्ष्याभक्ष्यविवेको नास्ति तथापि गोब्रा
ह्मणादिवधे ब्राह्मणस्वर्णादिहरणे च प्रायश्चित्तं भवत्येव। अकुर्वाणा एव तु प्रायश्चित्तं राज्ञा वध्याः। अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहा हि
मनुष्यमात्रधर्माः। न वर्णेष्वाश्रमेषु वा नियताः। अतस्तदतिक्रमे युक्तमेव प्रायश्चित्तं। यत्तु पूर्वमुक्तं प्रतिलोमास्तु धर्महीना इति तदैहिकामुष्मि
कश्रेयःसाधनेषु कर्मस्वधिकारनिवृत्तिपरमिति। प्रायश्चित्तस्य निमित्तान्याह   अथ खल्वयं पुरुषो याप्येन कर्मणा लिप्यते यथैतदयाज्य
याजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति   अथ खल्विति वाक्यालंकारे। अयं पुरुष इति संघातवर्तिनं प्रत्यगा
त्मानं निर्दिशति। याप्यं कुत्सितं। याप्येन पापेन कर्मणा लिप्यते। तज्जन्येनाधर्मेण लिप्यमाने कर्मणा लिप्यत इति भाक्तो वादः। याप्यस्य क
र्मण उदाहरणप्रपंचो यथैतदित्यादि। यथेत्युदाहरणे। अयाज्याः पतितादयः तेषां याजनं। अभक्ष्या लशुनादयस्तेषां भक्षणं। अवद्यमनृता
सभ्यादि तेषां वदनं कथनं। शिष्टं विहितं संध्योपासनादि तस्याक्रिया अकरणं। प्रतिषिद्धस्य हिंसादेः सेवनं करणं। इतिः समाप्तौ। एतावदेव
याप्यं कर्मेति। प्रतिषिद्धसेवनमित्येव सिद्धे अयाज्ययाजनादिग्रहणं याजनाध्यापनप्रतिग्रहाः सर्वेषामित्यापद्यनुज्ञा। तत्रापि प्रायश्चित्तार्थं
तत्रोशनाः आपद्विहितैः कर्मभिरापदं तीर्त्वा पुनस्तेषां प्रायश्चित्तं चतुर्भागं कुर्यादिति। अभक्ष्यभक्षणग्रहणमप्यापद्याध्यादौ लशुना
दिभक्षणविषयं च। अवद्यवदनग्रहणं तु प्राणिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेदित्यादिविषयं च। तथा यत्र ब्राह्मण इति ज्ञाते तत्रा उपयुः अयं ६२

नापहरेयुस्तत्र तद्ग्रहणार्थं। असभ्यानृतभाषणे नापि तन्निवार्य पश्चादापदं तीर्त्वा प्रायश्चित्तं चतुर्भागं चरेदिति   तत्र प्रायश्चित्तं कुर्यान्न कुर्या
दिति मीमांसते   तत्र तस्मिन्याप्यकर्मलेपे प्रायश्चित्तं। प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयोगात् प्रायश्चित्तमिति स्मृतमि
त्येवंलक्षणं कर्तव्यमिति विचारयन्ति ब्रह्मवादिनः। अत्रैके चित्   न कुर्यादित्याहुः   तत्र हेतुः   न हि कर्म क्षीयत इति   हि शब्दो हेतौ। यस्मात्
तं कर्म पुण्यं पापं वा नान्तरेण भोगं क्षीयत इति। यथा च शंखः। यथा पृथिव्यां बीजानि रत्नानि निधयो यथा। एवमात्मनि कर्माणि तिष्ठंति प्रभवंति
च। उत्पन्ने तु फलेन श्यंति। यथा बीजमंकुरे। प्रायश्चित्तानि तु नैमित्तिककर्मांतराणि। यथा गृहदाहादौ क्षामवत्यादयः   कुर्यादित्यपरं
कुर्यात्प्रायश्चित्तमित्यपरं दर्शनं। नास्मात्परमस्तीत्ययं परः सिद्धांतः। तत्र प्रमाणत्वेन श्रुतिवाक्यान्युदाहरंति   पुनःस्तोमेनेष्ट्वा पुनःसवनमायां
तीति विज्ञायते   अप्रतिग्राह्याद्ब्रह्म प्रतिगृह्य पुनस्तोमेन यजेतेति श्रूयते। अभक्ष्यभक्षणमवद्यवदनं पुनःस्तोमेन तरतीति च। असत्प्रतिग्र
हाद्दोषदूषिताः पुनःस्तोमेनाग्निकाहेनेष्ट्वा पुनःसवनमायांति। सवनशब्देन कर्मोच्यते। पुनरधिकृतो। तानि स्मार्तानि नित्यकर्माण्यायांतीति। आप्नुवंति
ते योग्या भवंतीति   व्रात्यस्तोमैरिष्ट्वा   पुनःसवनमायंतीत्यनुषंगः। व्रात्या यथाकालमनुपनीताः। तेषां कर्तव्या प्रायश्चित्तेष्टयो व्रात्य
स्तोमाः। बहुवचननिर्देशात् चत्वारः प्रत्येतव्याः।   तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते   इति चेति वक्ष्यमाणमपेक्ष्यते।
विज्ञायत इत्यनुषंगः   अग्निष्टुताभिशस्यमानं याजयेदिति च विज्ञायते   अग्निष्टुन्नामैकाहस्तेनाभिशस्यमानं याजयेत्। अत्र पुनस्तो

गो०म०३०

७०

मादीनां दोषनिघातार्थतयाश्रुतत्वात्। उपभोगेनैव प्रायश्चित्तेनापि पापं कर्म क्षीयते। शंखवचनं वा कृतप्रायश्चित्तविषयं। पुण्यविषयं च। अथ कस्मा
द्वचनागम्यर्थं विचारः क्रियते कुर्यान्न कुर्याद्वेति। न ह्युपनयनादावेवं विचारः कृत इति। उच्यते प्रायश्चित्तस्य कृत्यर्थोयं विचारः। इदानीं येष्वाहत्य न प्रा
यश्चित्तं विहितं तेषु प्रायश्चित्तान्युद्दिश्यन्ते तस्यानिष्क्रयणानि जपस्तपो होम उपवासो दानं तत्र याथात्म्यकर्मतो जपादीनि पंचनिष्क्रयणानि शो
धनानि। तत्र जपस्तावदुच्यते तथा चाह उपनिषदो वेदान्ताः सर्वच्छन्दस्सु संहितामधून्यघमर्षणमथर्वशिरो रुद्राः पुरुषसूक्तं राजनरौहिणे सामनी
बृहद्रथंतरे पुरुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यं ज्येष्ठसाम्नामन्यतमद्बहिष्पवमानं कूष्माण्डानि पावमान्यः सावित्री चेति पावनानि उ
पनिषदो रहस्यब्राह्मणान्याध्यात्मिकानि। तद्व्यतिरिक्तान्यारण्यकभागा वेदान्ताः। सर्वच्छन्दस्सु सर्वेषु प्रवचनेषु संहिताः संहितापाठेन पदक्रमादिपा
वः। मधूनि मधुवाता इत्युक्तानि यजूंषि ब्रह्ममेतु मामित्यादीनि। अघमर्षणं ऋतं च सत्यं चेति सूक्तं षड्ऋचमघमर्षणेन ऋषिणा दृष्टं। अथर्वशिरोऽथर्ववेदप्रसि
द्धं देवा ह वै स्वर्गं लोकमायन्नित्यादि। रुद्रा नमस्ते रुद्र मन्यव इत्याद्या अनुवाका एकादश एकादशात यजुःशाखास्ते सु सर्वासु पठ्यन्ते। पुरुषसूक्तं सहस्र ७०
शीर्षेत्यादि। राजनरौहिणे सामनी। इन्द्रं नरो नेमधिता हवन्त इत्यस्यां चेगीते। त्वामिद्धि हवामह इत्यस्यां बृहत्। अभि त्वा शूर नोनुम इत्यत्र रथंतरं। अ
मि हमस्मि प्रथमजा ऋतस्येति पुरुषगतिः। महानाम्न्यो विदामघवन्नित्याद्या ऋचः। महावैराजं पिबा सोममित्यस्यां गीतं साम। महादिवाकीर्त्यं विभ्राड्बृह
त्पिबतु इत्यस्यां। ज्येष्ठसामानि तलवकारिणामुदुत्यं चित्रमित्येतयोर्गीतानि। [illegible] मूर्धानं दिव इत्यस्यां गीतानि त्रीणि सामान्याज्यदोहानि
ब्राह्मणे तथास्तुतत्वात्। बहिष्पवमानमुपास्मै गायता नर इत्यस्यामृचि गीतं। कूष्माण्डानि तैत्तिरीयके स्वाध्यायब्राह्मणे यद्देवा देवहेडनं यददीव्यन्नृणमह

कान्नानीतः ते न पृच्छेयेत किमर्थं मिथ्यं करोषीति तदास्यामवस्थामाचक्षीत। न तु मिथ्या वदेदिति ॥ ते न हि भर्तव्याः श्रुतशीलसंपन्नाश्चेत् ॥ हित्वा
र्थेन त्वया राज्ञा सनकेवलं दंड्यः किं तर्हि तेन आरभ्य भर्तव्यः। न वयमवस्थामयानज्ञातेति सो तथिला। स चेच्छ्रुतवृत्तशीलसंपन्नो भवति। श्रुतं तत्रा
र्थपरिज्ञानं। शीलं तदनुकूल आचारः। इतरोपि न दण्ड्यः। भरणं तु तस्य तादृशं न कार्यं। दण्डाभावः पूर्वयोरपि निमित्तयोः समानः ॥ धर्मतन्त्रपीडायां
तस्याकरणे दोषो दोषः ॥ यदि पशुवधादौ धर्मे प्रवृत्तस्य तदङ्गं पश्वादिकं न वित्तं पीडितं भवति इतं सम्पूर्णं तं वा तस्मिन्निवेदिते तदैव तस्य प्रधा
नं कार्यं राज्ञा। अकरणे दोषो भवति ॥ इति श्रीमिताक्षरायामष्टादशोऽध्यायः ॥ ७ ॥ १८ ॥ ७ ॥ पंचविधो धर्मः। वर्णधर्म आश्रमधर्म उभयध
र्मो गुणधर्मो नैमित्तिकश्चेति। तत्र वर्णप्रयुक्तो धर्मो वर्णधर्मः। उपनयनं ब्राह्मणस्याष्टमे वर्षे इत्यादिः। आश्रमप्रयुक्त आश्रमधर्मः। ब्रह्मचर्यादेः
समिदाधानादिरिति। उभयप्रयुक्त उभयधर्मः। ब्राह्मणस्य ब्रह्मचारिणः पालाशो दण्ड इत्यादिः। अभिषेकगुणप्रयुक्तस्य प्रजापालनादिर्गुण
धर्मः। ब्रह्महत्यादौ निमित्ते कर्तव्यो नैमित्तिको धर्मः। प्रायश्चित्तं। तत्र नैमित्तिकं वक्ष्यन्नुक्तमनुभाषते ॥ उक्तो वर्णधर्मश्चाश्रमधर्मश्च ॥ उ
भयधर्मगुणधर्मयोरप्युपलक्षणमेतत्। यद्यप्यन्यत्रोक्तं नानुभाष्यते अननुभाषितेपि वक्ष्यमाणे शङ्क्यते वक्तुमिति तथापीहानुभाष्यते अत्रा
शंकानिवृत्त्यर्थं। अन्यथा परिशिष्टे दैहिकानि पुनस्तामादीनि प्रायश्चित्तान्युदाहरिते। तानि च शूद्रस्य न संभवन्तीति अतस्तद्वदेव प्रायश्चित्तान्तरा
ण्यपि शूद्रस्य न स्युरिति कश्चिदाशंकेत। अपि चाह। य उक्तो धर्मः स एव वर्णिनामाश्रमिणां च धर्मः वक्ष्यमाणस्तु पुरुषमात्रधर्मः। यदाह

चं चरुद्रा च्रं श्राधमस्तकं। श्रोरस्या चं तथाभक्ष्यं सर्वं पुनन्तु मे यवाः। इत्येतैः षड्भिः। ततो ब्रह्मादेवानामिति प्राश्य ततः प्राणाय स्वाहेत्यादिभिर्यथोक्तं
सर्वं प्राश्नीयात्। षड्रात्रं ततोनियामाति कर्म नात्यातिविद्धं सेवनादभक्ष्यभक्षणजाच्च सर्वस्मात्पापात्प्रमुच्येत। सप्तरात्रं पीत्वा भ्रूणहत्यां गुरुतल्पं
सुवर्णस्तेयं सुरापानं च पुनाति। एकादशरात्रं पीत्वा पूर्वकृतं पापं नुदति। एकविंशतिरात्रं पीत्वा गणान् गणाधिपतिं पश्यति विद्याधिपतिं
पश्यति। एवमहरहर्न्याहाराय वा पुनःप्राश्नीयादिति। सर्पिरादौ हिरण्यं निकषप्राशनं हिरण्यप्राशनं। घृतप्राशनं प्रसिद्धं। सोमपानं कृतानुक्तं।
वहिरप्यन्ये। इतिकरणाद्यच्चान्यदेवं युक्तं पंचगव्यशंखपुष्पादितत्स्यप्राशनं मेध्यं विज्ञेयं। अथ जपादीनां स्थानमाह सर्वे शिलोच्चयाः स
र्वाः स्रवंत्यः पुण्या ह्रदास्तीर्थान्यृषिनिवासा गोष्ठपरिस्कंधा इति देशाः शिलोच्चयाः शैलाः स्रवंत्यो नद्यः सर्वग्रहणात् पुण्यापुण्यविभाग
नादरणीयः। पुण्या ह्रदाः पुष्करिण्यादयः। प्रयागादीनि तीर्थानि। ऋषिनिवासा वसिष्ठादीनामाश्रमाः। गोष्ठं गवां स्थानं। परिस्कंधः देवा
यः। इतिकरणान्नैमिषारण्यादीनि। व्याख्यातः सहपरिकरो जपस्तपः स्वरूपमाह ब्रह्मचर्यं सत्यवचनं सवनेषूदकोपस्पर्शनमार्द्रवस्त्रताधः
शायिता नाशक इति तपांसि ब्रह्मचर्यं मैथुनत्यागः। सत्यवचनं दृष्टार्थवादित्वं। सवनेषु प्रातर्मध्यंदिने सायं चोदकस्पर्शनं स्नानं। आर्द्र
वस्त्रता स्नानसमयपरिहितस्य वाससस्तथैवापीडितस्य धारणं। अधःशायिता स्थंडिलशायिता। अनशनपाद्वाः सएवाशकः तस्य भावो नाश ७१
कोऽनशनं। अत्रापीतिकरणात्प्राणायामादीनां ग्रहणं। अत्र मनुः। सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनंत्यह

रहः कृतात् इति। होमाः कूष्मांडगणहोमादयः प्रसिद्धत्वान्न इहानुक्ताः। तत्र श्रुतिः। कूष्मांडैर्जुहुयाद्योऽपूत इव मन्येतेत्यादि। गणहोमस्तु बौधायनेनोक्तः।
कृत्वांसवित्र सहस्राक्षो मृगारो होमुच्यते गणे। पावमान्यश्च कूष्मांड्यो वैश्वानर्य ऋचश्च याः। घृतौदनेन ता जुह्वत् सप्ताहं सवनत्रयं। मौनव्रती हविष्याशी
निगृहीतेंद्रियक्रियः। मुच्यते सर्वपापेभ्यो महतः पातकादपीति। याज्ञवल्क्यः। यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमः सावित्र्या
प्रत्यहं जपस्तथेति। मनुः। न सावित्र्याः समं जप्यं न व्याहृतिसमं हुतं। नान्नतोयसमं दानं न चाहिंसापरं तप इति। उपवासो भुक्तित्यागः। स एव तपस्त्वपि
पुनः पुनः पठ्यते। आदरख्यापनार्थं। अपर आह। निवृत्तिर्यत्पुपठित उपवास इंद्रियनिग्रहः। व्यावृत्तस्य तु दोषेभ्यो यस्तु वासो गुणैः सह। उपवास
स्तु माकृत्स्तु न शरीरस्य शोषणमिति। पुराणादर्शनादिति। अथ देयान्याह। हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि निगदव्या
ख्यानमेतत्। अथ कियान्कालो जपादीनामित्यत आह संवत्सरः षण्मासाश्चतुर्विंशात्यहो द्वादशाहः षडहस्त्र्यहो होरात्र इति कालाः एतेषु भाव
नाभ्युध्याप्यमन्यते तावान्कालः एतान्येवानादेशे विकल्पेन क्रियेरन् एतान्येव जपादीनि निष्क्रयणानि अनादेशे ब्रह्महत्याप्रायश्चित्तमनिर्दिष्टं
तद्विषये विकल्पेन कर्तव्यानि। एवकारः पौनर्वचनिकः। तद्यथा देवदत्तोऽग्रामं गच्छतु स एवारण्यमिति। किं सिद्धं भवति यच्छु निमित्ते ब्रह्महत्याप्रायश्चित्त
मुक्तं तेषु अभ्यासानुबंधाद्दोषातिपूरणाय प्रशस्यं जपादीनामनुप्रवर्तनं सिद्धं भवति। किं तुल्यविकल्पेनेत्याह एनस्सु गुरुषु गुरूणि लघुषु लघूनि
अभिसंधिकृते मनो गुरु। तद्विपरीते लघु। एवमभ्यासानुबंधाद्यपि द्रष्टव्यं। यथाह आपस्तंबः। यः प्रथमतो हंति प्राप्तं दोषफलं सह संकल्पेन भूय ए
यमन्यद्यपि दोषवत्कर्मसु तथा पुण्यफलेषु यथा कर्माभ्यास इति कृच्छ्रातिकृच्छ्रौ चांद्रायणमिति सर्वप्रायश्चित्तं कृच्छ्रातिकृच्छ्रौ चांद्रायणं

गौ०स्मृ०वृ०

चापीरेशाद्धृस्यंतेसर्वग्रहणान्केवलंमनादेशो।एतानिचगुरुलघ्वन्सिसमस्तानिसमुदितानिप्रायश्चित्तलघून्येकमेकंलघुतरातितिलघुः।लघुत्तमेरू
क्षः।मनुरप्याह।संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः।अज्ञातभुक्तशुद्ध्यर्थंज्ञातस्यतुविशेषतइति।इतिकरणाद्यत्रान्यदेवमुक्तं।तत्रमनुः।यता
त्मनोप्रमत्तस्यद्वादशाहमभोजनं।पराकोनामकृच्छ्रोयंसर्वपापप्रणाशनइति इतिश्रीमिताक्षरायामेकोनविंशोध्यायः ॥ १९ ॥
म ७२ आद्ययोर्याप्यंकर्मकृत्वापिप्रायश्चित्तंनप्रतिपद्यतेसाकिंकर्तव्यमित्यत्राह त्यजेत्पितरंराजघातंकंशूद्रयाजकंशूद्रार्थयाजकंवेदविप्लाव
कंभ्रूणहनंयश्चांत्यावसायिभिःसहसंवसेदंत्यावसायिन्यांवा राजानमभिषिक्तं।नजातिमात्रोपजीवितं हतवान्राजघातकः।शूद्रयाज
यतिएतयानिषादस्थपतिंयाजयेदित्यादिविषयसच्छूद्रयाजकः।यःशूद्रार्थमधिगम्ययजतेसशूद्रार्थयाजकः।अनध्यायाध्यापनादिनायोवेदं
विप्लावयतिव्याकुलीकरोतिसवेदविप्लावकः।भ्रूणहाब्रह्महाएतन्महापातकिनामप्युपलक्षणं।चंडालःश्वपचःक्षत्तासूतोवैदेहकस्त ७२
था।मागधायोगवौचैवसप्तैतेंत्यावसायिनइत्यंगिराः।तैःसहैकस्मिन्स्थानेयोवसतिसतथोक्तः।अंत्यावसायिन्यांवासहवसतीत्यपेक्ष्यते।
तस्यांसंवासोमैथुनाचरणं।एतेषुनिमित्तेषुपितरमपित्यजेत्।पितृग्रहणात्किमुतपुत्रादिकमिति।अथत्यागप्रकारः तस्यविद्यागु
रून्योनिसंबंधांश्चसन्निपात्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युः तस्यत्याज्यस्ययेविद्यागुरवआचार्यगुरूपाध्यायायोनिसंबंधा
मातुलादयःतान्सर्वान्संनिपात्यएकत्रसमवेतान्कृत्वाउदकादीनिश्राद्धांतानिसर्वाणिप्रेतकर्माणिकुर्युः।के।पुत्रादयोज्ञातयः।पितरइत्यु

मायुरेवविश्वतोदधदिति त्रयोनुवाकाः।यत्रैतत्स्वाभिप्रायेणनपुंसकनिर्देशः।तत्रैवाम्भिद्रावेत्यत्रप्रश्नेयद्देवादेवहेडनमित्यनुवाकोयाकृत्तस्ताः कूष्मां
ड्यः।पवमानसोमदेवतायासाताः।पावमान्यः।स्वादिष्ठयामदिष्ठयाइत्याद्याआमंडलसमाप्तेः।तत्सवितुर्वरेण्यमित्येषासावित्री प्रसिधानया
कावनसवित्रदेवत्या।इतितत्रादृः प्रकारवचनः एवंप्रकाराण्यन्यान्यपिपावनानीति।अत्रमनुः।कौत्सं जप्त्वाप इत्येतद्वासिष्ठंचत्रत्प्रति।माहित्रंशुद्ध
वत्यश्च सुरापोपिविशुद्ध्यति।सकृज्जप्त्वास्यवामीयंशिवसंकल्पमेवच।अपहृत्यसुवर्णंतुक्षणाद्भवतिनिर्मलः।हविष्यंतीयमभ्यस्य नतमंहइतीति
च।जप्त्वातुपौरुषंसूक्तंमुच्यतेगुरुतल्पगः।सोमारौद्रंतुबह्वेनामासमभ्यस्यशुध्यतीत्यादि।प्रायश्चित्तप्रकरणेपुनःपावनानीतिवचनात्प्रायश्चित्तव्य
तिरेकेणापिशुद्धिकामस्यहरहरेतानिजप्यानि।जपस्ववृतस्याहारनियममाह • पयोव्रतताशाकभक्षताफलभक्षताप्रसृतयावकोहिरण्यप्राश
नंघृतप्राशनंसोमपानमितिमेध्यानि पयोव्रतताक्षीराहारता।व्रतग्रहणादुपवासंन्याय्येन।शाकंवास्तुकादि।फलंकदल्यादि।प्रसृतयावकः
प्रसृतयावकःप्रसृतपरिमितैर्यवैःपक्वओदनः।तत्रायंविशेषः।स्नातःशुचिर्भूत्वोदितेषुनक्षत्रेषुताम्रभाजनेप्रसृतयावकंश्रपयेत्।यथायुवा
गूर्भवतितस्यश्रपणकालेरक्षांकुर्यात्।नमोरुद्रायभूताधिपतयेपर्वतानांपतयेत्वमिमंरक्षस्वेति।श्रृतेवरोत्थदेवस्यत्वासवितुरित्यादिनातस्यसौ
विष्याभिमंत्रितंततोभिमंत्रयेत।यवोसिधान्यराजोसिवारुणोमधुसंयुतः।निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृतं।वाचाकृतंकर्मकृतंमनसादु
र्विचिंतितं।अलक्ष्मींकालकर्णींचसर्वंपुनतमेयवाः।महापातकसंयुक्तंदारुणंराजकिल्बिषं।बालवृत्तमधर्मंचसर्वंपुनतमेयवाः।सुवर्णस्तैन्यमव्रत्यमयाज्य
स्ययाजनं।ब्राह्मणानांपरीवादंसर्वंपुनतमेयवाः।श्वशूकरावधूतंचकाकोच्छिष्टमेवच।मातापित्रोरशुश्रूषांसर्वंपुनतमेयवाः।कैगणान्नंगणिका

मी०सू०९०

माणस्वीकरणविधिर्न भवति तस्य केवलं परत्रैव शुद्धिः। राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथेति। तस्मि
न्मूले कृते मक्षं शुभे ज्ञातकुंभमयं सौवर्णपात्रं पुण्यतमात् ह्रदान्नदीभ्यो वा हृते न जलेन पूरयित्वा ततस्तस्मादा वर्जिता आपस्तेन चरितप्रायश्चित्त
मुपस्पर्शयेयुस्ताभिरद्भिस्तापयेयुर्ज्ञातयः अथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेच्छांता द्यौः शांता पृथिवी शांतं शिवमंतरिक्षं यो रोचन
९३ स्तमिमं गृह्णामीति अथ स्नापनानंतरमस्मै स्नातायतनसौवर्णपात्रं दद्युर्ज्ञातयः स च तत्पात्रं प्रतिगृह्य जपेच्छांता द्यौरित्यादि गृह्णामीत्यंतं
ततो यजुर्भिः पावमानीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्यं जुहुयात् हिरण्यं ब्राह्मणाय दद्यात् होमानंतरे दानं गां वा इत्याचार्यो विकल्पः आचा
र्याय च यस्मात्मन आचार्यस्तस्मा अपि हिरण्यं दद्यात् गां वा यस्य तु प्राणांतिकं प्रायश्चित्तं स मृतः शुध्येत् उत्तरविवक्षये दमुच्यते। प्राय
श्चित्तस्य शुध्यर्थत्वाद्देव सिद्धा सिद्धिः। सर्वाण्येव तस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युः यद्यपि तस्य तस्मिन्लोके प्रत्यापत्तिस्तथापि मरणाद
र्ध्वं शुद्ध इति। सर्वाण्येव प्रेतकर्माणि कर्तव्यानि। सर्वग्रहणादाशौचमपि। येपि द्वादशवार्षिकादौ प्रायश्चित्ते प्रवृत्ते मध्ये म्रियंते तद्विषये व्यास आह। ९३
यतमानाः सदा धर्मे म्रियंते यदि मध्यतः। प्रामाण्येन तु तत्सर्वं न च मेनास्ति संशय इति एते देवशांत्युदक सर्वं भूपपातकेषु एते देवानं नरोक्त शांता
द्यौरित्यादिभिरभिमंत्रितं सर्वं भूपपातकेषु कर्तव्यं प्रायश्चित्तस्यांते। आदावित्यन्ये। द्विरुक्तिः पूर्ववत् इति श्रीमिताक्षरायां विंशोध्यायः २०
पतितानां त्यागविधिरुक्तः के पुनस्ते तानाह ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागपतित

त्यागिनः पतिताः ब्राह्मणस्य हंता ब्रह्महा। गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा। यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैरिति मनुः। तत्र यायस्य सु
रा प्रतिषिद्धा स तस्याः पाता सुरापः। गुरुः पिता आचार्यश्च। तल्पशब्देन भार्या लक्ष्यते गमनं मैथुनं। मातृसंबंधाः मातृपक्षे प्राक्सप्तमाद्भवाः। पितृसंबंधाः
पितृपक्षे प्राक्सप्तमाद्भवाः। योनिसंबंधाः भगिन्यादयः। य एना भार्यात्वे नाधिगच्छंति समातृपितृयोनिसंबंधगाः। स्तेनो ब्राह्मणसुवर्णापहारी। नास्ति
कः प्रेत्यभावापवादी। निंदितं प्रतिषिद्धं तस्य कर्मणो बुद्धिपूर्वं सातत्येनानुष्ठानं निंदितकर्माभ्यासी। पतितानेवं सतः पुत्रादीन् स्नेहादिना यो न त्य
जति स पतितात्यागी। यस्त्वपतितानेव द्वेषादिना त्यजति सोऽपतितत्यागी। एते ब्रह्महादयः पतिताः पातकसंयोजकाश्च पातकैः कर्मभिर्ये पु
रान् संयोजयंति तत्र प्रवर्तयंति द्रव्यप्रदानादिना मच्छत्रुमिमं व्यापादय त्वत्कृते व्यापादनं यमभ्युपाय इति। तथा केनचिद्विघांसितं पलायमानं यो
निवारयति निवारितश्च हन्यते सोपि प्रयोजकः। यस्यानुमतिमंतरेण यो नं निवर्तते समंतात्सहद्रव्यपृथग्जेनोपादीयते प्रयोजककोटिरेवास्मि
नि। आपस्तंबस्तु। कियताप्यवांतरभेदेन कर्मपि पृथग्युद्धे निवाच्च प्रयोजितामं ताक र्ताचेति स्वर्गे नाकपद्धेषु कर्मसु भागिनेयो भूयश्चारभेत त
स्मिन्फलविशेष इति तैश्चाद्रसमाचरन् तैः पतितैः सह योऽर्द्धं समाचरति यानासनशयनादीनि सोपि पतितः। अत्र कश्चित् संवत्सरेण पतति पतितेन
समाचरन्। यानासनाशनैर्नित्यमित्याद्वै ब्रह्मवादिन इति। याजनादौ तु याज्ञवल्क्य आह। याजनं योनिसंबंधं स्वाध्यायं सह भोजनं। कृत्वा सद्यः पतत्येव
पतितेन समाचरन्निति। सहभोजनमेकस्मिन्पात्रे। संवत्सरेण पतति पतितेन समाचरन्। याजनाध्यापनाद्यौनान्नतु यानासनाशनादिति। मानवमप्ये
वं व्याख्येयं। यानादिभिः संवत्सरेण पतति न तु याजनादिभिः। किंतु तैः सद्य एवेति। किंपुनरेषां पतितत्वे द्विजातिकर्मभ्यो हानिः पतनं द्विजातीनां

गो०स्मृ०प्र०

७४

यानि कर्माण्यध्ययनादीनि श्रौतानि गार्ह्याणि स्मार्तानि च तेभ्यो हानिस्तेष्वनधिकारः। तथा परत्र चासिद्धिः। यान्येन प्रागर्जितानि कुशलानि कर्माणि ना
न्यथास्य परत्र न सिध्यंति। फलाय न भवंति। तदेतेन पतितशब्दस्य निर्वचनं कृतं। कर्तव्येभ्यः कर्मभ्यः पूर्वार्जितानां सुकर्मणां फलेभ्यश्च पातः प्रच्यवनं प
तितत्वमिति तमेके नरकं [illegible]कें यैर्मेभ्यो हानिर्या च परत्रासिद्धिः तामेवैके नरकं मन्यंते। नरकसामानाधिकरण्यात् पुल्लिंगमेकवचनं च। कर्मभ्यो हीन
स्य बंधुभिस्त्यक्तस्य दुःखमुत्पद्यते परत्रासिद्धेः सुखलवो न भवति। अतो नरक एवायमिति। एवमतं तु विशिष्टे देशे दुःखैकतानस्य वासो नरक इति
त्रीणि प्रथमान्यनिर्देश्यानि मनुः अनुक्रांतानां पातकानां नामधेयप्रथमानि त्रीणि। ब्रह्महत्या सुरापान गुरुतल्पगमनान्यनिर्देश्यान्यनिर्देश्य प्रायश्चि
त्तानि तत्प्रायश्चित्तमनिर्देश्यमिति मनुराह। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इति ब्रह्मवधे सुरापाने मतिपूर्वमनिर्देश्यं प्राणांतिकमिति स्थिति
रिति गुरुतल्पे मृग्यं नस्त्रीष्वगुरुतल्पे पततीत्येके एके मन्यंते स्त्रीषु [illegible] गुरुतल्प एव पतति नान्य[illegible]तिस्य यं त्वन्यत्रापि पततीत्याह। मनुरपि। त्रै
चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति। अर्थाच्चिपाः पतनहेतुमाह भ्रूणहनि हीनवर्णसेवायां च
स्त्री पततीति भ्रूणहेति भावपरं। भ्रूणो गर्भः। आत्मापेक्षया गर्भहत्यायां स्त्री पतति। यो नहवर्णाः ब्राह्मण्याः क्षत्रियादिः क्षत्रियायाः वैश्यादिः वैश्यायाः शू ७४
द्रः। तत्सेवायां च स्त्री पतति। चकाराद्ब्रह्महत्यादिषु च। अपरस्त्वाह। भ्रूणहनं हीनवर्णं च या सेवते न तस्य भार्या भवति सा पतति। चकाराद्ब्रह्महत्यादिषु
चेति। भ्रूणग्रहणं पतितोपलक्षणं कौटसाक्ष्यं राजगामि पैशुन्यं गुरोरनृतेनाभिशंसनं महापातकसमानि कूटसाक्षिणो भावः कौटसाक्ष्यं साक्षिणो

पक्रमाद्बहुवचननिर्देशाच्च पात्रं चास्य विपर्यस्येयुः अस्यान्याज्यस्य पात्रं किंचित्कल्पयित्वा तदेव विपर्यस्येयुः। विपर्यासोऽधोमुखीकरणं। यथा त
दनुदकं भवति। तत्र प्रकारः दासः कर्मकरो वावकरादमेध्यपात्रमानीय दासीघटात्पूरयित्वा दक्षिणामुखः पदा विपर्यस्येदमुमनुदकं करोमीति नाम
ग्राहं दासः प्रसिद्धः कर्मकरो भृतकः तयोरन्यतरो वकारादवस्करात्। वर्चस्कावस्करः। अमेध्यानस्थानादशुचिपात्रं किंचिदुपादाय येन दास्युदक
माहरति तस्माद्घटाद्गृहीतेनोदकेन पूरयित्वा दक्षिणामुखो भूत्वा पदा सव्येन विपर्यस्येदपसव्यमधोमुखं विक्षिपेत्। तत्र मंत्रः। अमुमनुदकं करो
मीति। नामग्राहं अमुमिति स्थाने त्याज्यस्य नाम द्वितीयांतं गृहीत्वा नाम्न्यादिशि ग्रहेरिति णमुल्। ग्रहदिति पाठे नाम्नो ग्रहणं कर्तव्यमित्यर्थः। ग्रा
हइति पाठे रूपसिद्धिश्चिंत्या। तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखाः तं विपर्यस्यंतं सर्वे ज्ञातयः प्राचीनावीतिनो मुक्तशिखाः संतोऽन्वा
लभेरन् स्पृशेयुः विद्यागुरवो योनिसंबंधाश्च वीक्षेरन् न तु संस्पृशेयुः अपउपस्पृश्य ग्रामं प्रविशंति एवं इदं कर्म कृत्वा अपउपस्पृ
श्य स्नात्वा ग्रामं प्रविशंति प्रविशेयुः। अत एव ज्ञायते ग्रामाद्बहिरिदं कर्मेति अत उत्तरं तेन संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं अत
स्त्यागादूर्ध्वं तेन त्यक्तेन सह संभाषणमज्ञानात्कृत्वैकमहोरात्रं तिष्ठेन्न भुंजीत न शयीत नासीतेति। अज्ञानपूर्वमिति वचनादेकवचनेन निर्देशाच्च
ज्ञातिव्यतिरिक्तस्यापीदं भवतीति ज्ञानपूर्वं त्रिरात्रं यस्तु तेन ज्ञानपूर्वं संभाषते स त्रिरात्रमभुक्त्वा क्रमेण तिष्ठेत्। कार्याकार्यनिरूपणादाविदं।
परिप्रश्नादौ तु पराशरोक्तं। कृते निष्ठीवने चैव दंतस्पृष्टे तथैव च। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेदिति यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन्
शुद्धे शातकुंभमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनमपउपस्पर्शयेयुः प्रायश्चित्तेनेति वचनाद्राजदंडेन शुध्यस्य वध्य

गो॰मू॰टी॰

७५ ज्ञानासनादेः सेवायां प्रागभ्युत्थात्यरित्यर्थं । तर्हि संवत्सरेणापततीतिवचनमनर्थकं । न । तादृशस्त्यागोत्र न विवक्षितः । किं तर्हि लिंगाचार्यांतरमुपादे
यं । अनुपादाने दोष इति अन्यत्र हानात्पतति अन्यत्र अज्ञानाध्यापनादन्यत्र तयोस्त्यागो न कर्तव्यः कुर्वन्पतति तस्य च प्रतिग्रही नेत्येके तस्य
लिंगिभा वार्यमीदृशं त्यजनतः प्रतिग्रहीतां तयः प्रतिग्रहे तियाज्यत्वेन शिष्यत्वेन वा स्व लिंगाचार्यौ वा सोपि पततीत्येके मन्यंते । एके ग्रहणान्त्वज्ञा
त्वा प्रतिग्रहे पातित्यं नान्यत्रेति न कर्हिचिन्मातापित्रोरवृत्तिः न कस्यांचिदवस्थायां मातापित्रोरवृत्तिरशुश्रूषा कर्तव्या । किंतु कर्तव्ये
ति । पतितयोरपितयो नमस्कारादिका शुश्रूषा कर्तव्या । तथा चापस्तंबः । माता पुत्रस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपी
ति दायं तु न भजेरन् तदीयं तु धनं तदभावेन भजेरन् पुत्रादयः । राजगामि तद्भवति ब्राह्मणाभिशंसने दोषस्तावान् यो ब्राह्मणमभिशंस
ति तस्य सत्तं दोषं प्रथमं ख्यापयति तस्य दोषस्तावान्भवति यावान्कर्तुरिति । यथाहापस्तंबः । दोषं दृष्ट्वा न पूर्वं परेभ्यः पतितस्य समाख्याने स्याद्वर्ज
येत्वेनं धर्मेषु इति द्विरेनसि अनेनसि विषये दोषाभिशंसने द्विर्दोषोस्य भवति । द्विगुणः । अत्राभिशंसनमात्रे दोष उक्तः । मनवे तु पतितं प ७५
तितेत्युक्त्वा चौरं चौरेति वा पुनः । वचनात्तुल्यदोषस्यान्मिथ्याद्विर्दोषभाग्भवेदिति । पातित्यं चौर्यविषयमभिशंसनमुक्तं । वसिष्ठश्च । ब्राह्मणा
न मनृतेनाभिशस्य पतनीयेनोपपतनीयेन वा मासमप्भक्षः शुद्धवतीरावर्तयेत्पूतो भवतीति इति विज्ञायते दुर्बलहिंसायां चाविमोचने शक्तश्चेत् दु
र्बलं प्रबलेन हिंस्यमाने यः शक्तः सन्नभ्युपपद्यति तस्यापि तावान्दोषो यावान्हिंसतुः अभिक्रुद्धावगोरणे ब्राह्मणस्य वर्षशतमस्वर्ग्य यो भिक्रु

ध्यः सन् ब्राह्मणं प्रहर्तुं हस्तमायुधं वा उद्गुरते उद्यम्य कंपयति तस्य तदवगोरणं वर्षाणां शतमस्वर्ग्यं भवति स्वर्गप्राप्तिनिरोधकं तन्निमित्तानि सुकृतानि हं
तीत्यर्थः । अस्वर्ग्यमितिनरकपातोपलक्ष्यते । सजातीयविषयमिदं । विजातीयविषये तु द्विगुणं त्रिगुणं वेदवर्णगुणमथावपि वा । क्षत्रविट्शूद्राणां तीनां
ब्राह्मणस्य वधे स्मृतमिति । अनेनैव न्यायेन ब्राह्मणेनावगोरणे कृते त्रिपाद्विपाद्यं पादश्च ति क्षत्रियादिषु द्रष्टव्यं । एवमन्यत्रापि प्रतिलोमानुलोमा
द्यपराधेतरभावे तारतम्ये कल्प्यं निघाते सहस्रं यस्त्ववर्णेन नरं तितस्य वर्षसहस्रमस्वर्ग्यं । उपसमस्तं च वर्षपदमपेक्ष्यते लोहितदर्शने यावतस्त
त्रस्कंघ पांसून्संगृह्णीयात् यदि तेन निघातेन लोहितमुत्पादयेत्ततस्तल्लोहितं प्रस्कंघ भिनिःस्रत्य यावतः पांसून्संगृह्णीयात्पिंडीकुर्यात्ताव
ति वर्षाणि तदस्वर्ग्यं भवति । तस्माद्ब्राह्मणायनापगुरेन्न निहन्यान्न लोहितं कुर्यादिति आम्नायमानत्वादनुक्तं इति मिताक्षरायामेकविंशोध्यायः २१
एवं प्रायश्चित्तनिमित्तान्युक्तानि । अथ प्रायश्चित्तान्युच्यंते प्रायश्चित्ते अधिकारोयं । निश्चित्य तपसो नुष्ठानं प्रायश्चित्तं । तथा चांगिरः । प्रायो
नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपो निश्चयसंयोगात्प्रायश्चित्तमिति स्मृतमिति । अग्नौ सक्तिर्वधसमूहस्त्विरवद्वा तस्य सक्तिः संगः पतनं ।
अवज्ञातो वशीर्णः । भक्तत्यागेन कृशीभूतः ब्रह्महा भक्तत्यागेन कृशीभूत्वाग्नौ चित्तः पतेदुधोयाधाय । इह मत्स्य प्रायश्चित्तं । अवगमानं वेवशिवः । प्रास्य
दात्मानमग्नौ वा समिद्धे त्रिरवाक्शिरा इति । कावक श्रुतिः अनशनेन कर्षितो ग्निमारोहेदिति । नेदं मरणांतिकं त्रिरिति नियमात् । त्रिः पतने जीवन्नपि
शुध्यतीति लक्ष्यं वास्याज्ञान्यशस्त्रभृतो तन्यं शुद्धं । शस्त्रभृतः इष्वासा लक्ष्यमिति वचनात् । युद्धे इष्वासानां इष्टुत्नस्य नाम ध्येलक्ष्यं वध्यं भूत्वा तिष्ठेत् ।

मि॰सू॰टी॰ निर्विद्धो जीवन्मृतो वा शुध्यति। याज्ञवल्क्यः। संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात्। मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यतीति। खट्वांगकपालपाणि
र्द्वादशसंवत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत्कर्म विख्यापयन्। खट्वांगं पाशुपतानां प्रसिद्धं। कपालं च व्यापादितस्य ब्राह्मणस्य शिरःकपालं। ते पाणौ
७६ यस्य स खट्वांगकपालपाणिः। खट्वांगं दक्षिणपाणौ कपालं सव्ये भिक्षार्थं पानीयपानार्थं भोजनार्थं च। तथा चापस्तम्बः। पुरुषशिरः प्रतिपानार्थमा
दाय खट्वांगं दंडार्थे इति मनुरुक्त। कृत्वा शवशिरो ध्वजमिति। तस्मिन् पक्षे खट्वांगस्याग्रे ध्वजः। तन्मूले शवशिरः। भिक्षाचरणं तु लोहितेन खंडश
रावेण आपस्तम्बीये दर्शनात्। एवंभूतो भैक्षाय ग्रामं प्रविशेत्। एतावानस्य ग्रामप्रवेशः। अन्यदारण्ये भैक्षं च कर्म विख्यापयन् चरेत्। वेश्मनो द्वारि
तिष्ठामि भिक्षार्थी ब्रह्मघातक इति पराशरः। द्वादशसंवत्सरानेवं चरन् ब्रह्मचारी भवेत्। स्त्रीषु न प्रसज्जेत्। भिक्षाचरणे सप्तागाराण्यसंकल्पिता
नीत्यापस्तम्बः। संवर्तस्तु। भिक्षायै प्रविशेद्ग्रामं वन्यैर्यदि न जीवति। एककालाहार इति वसिष्ठः। यथोपक्रामेत्संदर्शनादार्यस्य आर्यस्त्वेव ७६
र्विकस्तस्मिन् दृष्टे यथोपक्रामेदपयायात्। तत्र व्याघ्रः। चंडालं पतितं दृष्ट्वा दूरतः परिवर्जयेत्। गोबालव्यजनादूर्ध्वं सचेलं स्नानमाचरेदिति। शूद्रा
दिस्पर्शं विवर्जयेत्। तथाह लौगाक्षिः। महापातकिसंस्पर्शे वर्णानां स्नानमुच्यते। अस्नात्वा भोजने चैव सप्तरात्रं समाचरेत्। त्रिरात्रं स्यादमत्या चेद्धरव
शुद्धीभूतं पयः। एवमानं विचंडालस्पृष्टानामपि कीर्तितमिति। स्थानासनाभ्यां विहरन् सवनेषूपस्पृशञ्छुध्येत्। तिष्ठेदहनि रात्रावासीत यथा
शक्ति प्रातर्मध्यंदिने सायमिति सवनेषु त्रिसंध्यमुदकोपस्पर्शी स्यात् स्नायात्। एवं द्वादशवर्षाणि चरन्नेतेन शुध्येत्। स्नानविधानादयतस्नानभूतमेवारि

नृतवचनं। सतोऽसतो वा परदोषस्याविष्करणं पैशुनं। राजनीति वक्तव्ये राजगामीति वचनं यत्रोक्ते परं पर्येणापि राजा न गच्छति तदपि वर्ज्यमित्येवमर्थं। गुरोः पितु
राचार्यस्य वानृतेनासत्येन दोषेणाभिशंसनं दुष्टत्वाख्यापनं गुरोरनृताभिशंसनं एतानि पातकसमानि। साम्यातिदेशः प्रायश्चित्तमर्धमिति स्मार्तो व्यवहारः।
अपंक्त्यानां प्राग्दुर्बालो ज्ञाहं त्वब्रह्मोज्झनं तन्मित्रकूटचकी। खिंपावितसावित्रिकेषूपपातकं। स्नेनादयोगीनन्त्रीलो ताएकपंचाशन्न भोजयितव्या इ
त्युक्ताः। श्राद्धप्रकरणे अपंक्त्यास्तेषामपंक्त्यानां मध्ये द्वौ ह्यागम्यावंतल्पक्तात्मपर्येताएकत्रिंशतेषूपदितकूटसाक्षी चान्तर्भूतस्तत्र पतितस्य पतितं
ले कूटसाक्षिणस्तत्साम्यमुक्तं यातिरिक्ते षूपपातकं पापं। नास्ति को पि तेषूपदितः स्वचित्रविधः। यथाहुः पौराणिकाः। नास्ति काचिद्विधा यत्र याधर्मज्ञै
स्तत्वदर्शिभिः। क्रियादुष्टा मनोदुष्टा वाग्दुष्टा चेति त्रयं दृति। अत्र वाग्दुष्ट उपपातकाभिप्रेतः। इतरयोः पातकत्वं। गोहंता हननं दंडकाष्ठादिना ताडनं। ब्र
ह्मवेदस्तमधीतं यः प्रमादादुज्झितवान्। विस्मृतवांस्तं ब्रह्मोज्झः। बुधिस्सर्वमानवं। ब्रह्मोज्झसं वेदनिंदाकूटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धि
३ सुरापानसमानि षडिति। तत्र मंत्रकृत्त्वे योर्गीतं त्वब्रह्मोज्झता योजनादिकृत्। यो ब्रह्मचारी स्त्रियमुपयात् स अवकीर्णी। अस्यापंक्त्येषूपतितस्य पुनर्वच
नं कृतं पृथगवकीर्णिप्रायश्चित्तं पृथगुपपातकप्रायश्चित्तमधिकर्तव्यमित्येवमर्थं। एतच्चापत्यात्यादपूर्वेण गमने द्रष्टव्यं। पतितसावित्रिको यथाकाल
मनुपनीतो व्रात्यः। एतेषूपपातकं पापमिति। अज्ञानाध्यापनात् ऋत्विगाचार्योपपति नियमेसवाप्य वहेयो। अज्ञानादनध्यापनादिति। यदि कर्मातिक्र
मं त्यक्ते लिङ्गमात्रात्तमपद्धतिं वानजानातिश्च। यच्च आलस्यादिनानाध्यापयन्नाचार्यस्तावुभौ हेयौ त्याज्यौ। पतनीयमेवायं च हेयो। दुं इति तेन सहयाना

गौ०सू०वृ० आदातुश्चावि शुध्यर्थं मिष्टिर्वैश्वानरी स्मृतेति अश्वमेधावभृथे वा स्नात्वेति शेषः। पुरकोपस्याश्वमेधस्यावभृथे स्वयं स्नात्वा वा शुध्येत्। प्राण
लाभदूत्यादिसूत्रेषु वाशब्दो विकल्पार्थः। अत्र मानवविशेषः। त्रिः स्नात्वा भूमिदेवानां नरदेवसमागमे। स्वमेनोवभृथस्नात्वा हयमेधे विमुच्यत इति।
७१ भूमिदेवा ब्राह्मणा ऋत्विजः। नरदेवो राजा यजमानः। तेषां समवाये स्वमेनः शिष्ट्वा विख्याप्य अन्ययज्ञेष्वप्यग्निष्टुदंतेष्वेतत् अश्वमेधादन्ययज्ञेष्व
वभृथस्नातो वा शुध्येत्। किमविशेषेण। न। तस्य चेदग्निष्टुदन्तामेकाहो भवति। एवं द्वादशरात्रादेर्ग्रहणं। अपर आह। अग्निष्टुदंतो अग्निष्टुत्समाप्तिको
भवतीति। अत्र पक्षे सर्वमेधादेर्ग्रहणं। अत्र च शुध्येदिति द्वादशवार्षिकमुपसंहृत्य विधानाद्ग्रहणाद्वा सर्वाण्येतानि स्वतंत्राणि वैकल्पिकानि।
प्रयाजकादिविषयाणि वा द्रष्टव्यानि। अन्ये तु द्वादशवार्षिके प्रवृत्तस्य त्याहुः। तथा च शंखो द्वादशवर्षैः शुद्धिमाप्नोतीत्यभिधायाह। अंतराले च ब्रा
ह्मणं मोचयित्वा गवां च द्वादशानां परित्राणान्नैमित्ति। वा शब्दाः परस्परापेक्षया विकल्पार्थाः। सृष्टश्चेद्ब्राह्मणवधे हत्वापि सगर्भिण्याहानि
श्रयस्य। तद्व्याचष्टे। यदि ब्राह्मणवधे सृष्टो भवति केनचिद्वेवाद्वा निर्वासितः सोऽहत्वापि ब्रह्महा भवति। अतस्तस्याप्यनंतरोक्तं प्रायश्चित्तं पु ७१
यत्सुपूतं कुर्वीत आत्रेय्याश्चैवं ऋतुस्नातामात्रेयीमाहुः तत्र ह्यपत्यं भवतीति वसिष्ठः। तस्यामपि ब्राह्मण्यां हतायामेव ब्रह्महा भवतीति तदीयमे
वप्रायश्चित्तमिति। क्षत्रियाद्यात्रेयीवधे तत्तत्पुरुषवधनिमित्तं प्रायश्चित्तं। अन्ये त्वत्रिगोत्रामात्रेयीमाहुः। गर्भे चाविज्ञाते ब्राह्मणस्य। गर्भस्त्रीपुं
नपुंसकत्वेनाविज्ञाते ब्राह्मण्यामाहिते ब्राह्मणवधादिना हते ब्रह्महत्याप्रायश्चित्तं विज्ञाते तु यथालिंगं। क्षत्रियागर्भे पितृदनुगुणं। राजन्यवैश्ययोरपि स

वनगतयोर्वध एतदेव। यथाह मनुः। हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत्। राजन्यवैश्यौ वीजानां चात्रेयीमपि च स्त्रियमिति। अत्र पराशरः। चातुर्विद्योपपन्न
स्त्वं विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत्। सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाहरन्। वर्जयित्वा विकर्मस्थान् छत्रोपानहवर्जितः।
अहं दुष्कृतकर्मा वै महापातककारकः। वेश्मनो द्वारि तिष्ठामि भिक्षार्थी ब्रह्मघातकः। गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु च। तपोवनेषु तीर्थेषु नदीप्र
स्रवणेषु च। एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरं। ब्रह्महा विप्रमुच्येत स्नात्वा तस्मिन्महोदधौ। ततः पूतो गृहं प्राप्य कृत्वा ब्राह्मणभोजनं। गवां चापि
शतं दत्त्वा चातुर्वैद्याय दक्षिणां। एवं विशुद्धिमाप्नोति चातुर्वर्ण्यानुमोदित इति। अत्र सुमंतुः। ब्रह्महा संवत्सरं कृच्छ्रं चरेदधःशायी त्रिषवणी कर्मावेद
को भिक्षाहारो नदीपुलिनसंगमाश्रमगोष्ठपर्वतप्रस्रवणतपोवनविहारी स्यात् स्थानवीरासनी संवत्सरे पूर्णे हिरण्यमणिगोधान्यतिलभूमिसर्पि
षि ब्राह्मणेभ्यो दद्यात् पूतो भवतीति। अत्र वर्णविशेषेणाश्रमविशेषेण चाङ्गिराः। पूर्वं या ब्राह्मणानां तु सा राज्ञो द्विगुणा मता। वैश्यानां त्रिगुणा प्रोक्ता
पर्षद्वद्व्रतं स्मृतं। गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि। शौचवच्छोधनं कुर्युरर्वाग्ब्रह्मनिदर्शनादिति। एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारि
णां। त्रिगुणं स्याद्वनस्थानां यतीनां च चतुर्गुणमिति। अत्र भार्गवः। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्धमर्हंति स्त्रियो व्या
धितएव चेति। हारीतः। प्रायश्चित्ते प्रवृत्तस्तु मध्ये यदि विपद्यते। शुद्धस्तदहरेवासाविह लोके परत्र चेति। उक्तं ब्राह्मणवधे प्रायश्चित्तं। अथ राजन्यव
धे राजन्यवधे षाड्वार्षिकं प्राकृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्यात् राजन्यस्य वधे कृते ब्राह्मणवधे यदुक्तं ब्रह्मचर्यं तत्षाड्वार्षिकं कर्तव्यं।

गौ०स्मृ०टी०

७८

तदपि प्राकृतं स्वाभाविकं स्वाद्यंगादिरहितं ब्रह्महत्याप्रायश्चित्तं द्वे वर्षाणि कुर्यात्। एकाधिकं सहस्रं वृषभ एकसहस्रो यासां ता वृषभैकसहस्रा
गा दद्यात्। अत्रोशनाः। क्षत्रियस्य वधे षड्वार्षिकं ब्रह्महत्याव्रतं तस्यां ते वृषभैकसहस्रगोदानं चेति। इदमभिषिक्तस्य श्रोत्रियस्य वृत्तवतो बुद्धिपू
र्ववधे। तस्यैवाश्रोत्रियस्य वृत्तहीनस्य वधे केवलं गोदानं। उभयहीनस्यानभिषिक्तस्य वधे केवलं षड्वार्षिकं। अनभिषिक्तस्य तूभयवतो
वासिष्ठं। ब्राह्मणो राजन्यं हत्वा षड्वर्षाणि व्रतं चरेदिति। एतेषामेवाबुद्धिपूर्वे [illegible]कल्प्यं। जातिमात्रवधे स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपात
कमित्युक्तत्वात् देवव्रतं कुर्यात् [illegible]रूपपातकिनो द्विजाः। अवकीर्णिवर्जं शुध्यर्थं चांद्रायणमथापि वेति मनुनोक्तं द्रष्टव्यं। किंचिद्गुणवतो वधे अस्यु
त्सारिदिनिरात्युपपातकेषु चैवमिति वक्ष्यमाणं सांवत्सरिकं प्राकृतं व्रतं समाचरेत्। एवमुत्तरत्रापि द्रष्टव्यं। सर्वत्राबुद्धिपूर्वेऽर्धं बुद्धिपूर्वे कृत्स्नमि
ति॥ अथ वैश्ये त्रैवार्षिकं वृषभैकशताश्च गा दद्यात्॥ इदमत्यंतगुणवतो बुद्धिपूर्ववधे। एतेन परं व्याख्यातं॥ शूद्रे संवत्सरं वृषभैकादशाश्च
गा दद्यात्॥ इदमप्यत्यंतगुणवद्विषयं। अत्यंतनिर्गुणशूद्रस्य वधे श्रीशनुः॥ शूद्रं हत्वा मूल्यकृच्छं इति। अथानुलोमविषये व्याघ्रः। सर्वे
षामनुलोमानां तन्मात्रहनने तु यत्। तदेवाभिहितं तेषां द्विजानां स्त्रीलोमधर्मं तथैव च। आत्रेयीहनने शूद्राद्युद्धेतु रूपदिश्यते। गर्भे चैव तथा ज्ञा ७८
तव्याधस्य वचनं यथोति। प्रतिलोमवधे लोकाक्षिः। हनने प्रातिलोमानां शूद्रजानां कथं भवेत्। ज्ञानपूर्वं पराकः स्यादज्ञाने त्वैदवं स्मृतं। इतरे
षां च तु भार्गापितुरुक्तं मनीषिभिरिति॥ अनात्रेयीं चैवं॥ आत्रेयीव्यतिरिक्ताया वधे चैव शूद्रे संवत्सरं वृषभैकादशाश्च गा दद्यादिति। इदं

प्राप्तिरपि गम्यते। शुचिना कर्तव्यमिति च सर्वकर्मसाधारणं। अतः संध्योपासनमवश्यं भवति। संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यत्किंचित्कुरु
ते कर्म न तस्य फलभाग्भवेदिति दक्षस्मरणात्। द्विजातिकर्मभ्यो हानिः पतनमित्यनेन तु प्रायश्चित्तं न वक्तव्यं यानंगभूतानां कर्मणां हानिर्न सर्वेषां। अत्र
यस्य द्विब्रह्महत्ये स चतुर्विंशति वर्षाणि व्रतं चरेत्। यस्य तिस्रः स षट्त्रिंशत् न पुनर्दशाकालकृतं स्यात्प्रायश्चित्तस्य तंत्रता। यस्य च त[illegible]नतस्य हलाके
श्री निष्कृतिः। एतदेव व्रतमोत्तमाद्[illegible]सा चरेत्। तथा च मनुः। विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं चरेत्। तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः
इति। एतदेव व्रतमोत्तमाद्[illegible]सा चरेत। तथा च मनुः। विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं चरेत्। तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति। या
ज्ञवल्क्यः। द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति॥ प्राणलाभे वा तन्निमित्ते ब्राह्मणस्य॥ यदि चोरव्याघ्रादिभिः प्रमाप्यमाणस्य ब्राह्मण
स्य तन्निमित्तः प्राणलाभो भवति तदा शुध्येत्। एकस्य द्वित्राः त्राणाः अपरदत्ताः को न्वत्र विशेषः। अनेनैव न्यायेन सर्वेषामेव हननेन ज्ञातीयस्य त
द्धेतुके प्राणलाभे शुद्धिर्द्रष्टव्या॥ द्व्यापचये [illegible]व्यवरं प्रतिराद्धः॥ ब्राह्मणस्येति वर्तते। ब्राह्मणस्य द्रव्ये चौरादिभिरपह्रियमाणे अपि क्रियमाणे तस्य
प्रत्यानयनाय चोरादिसमीपं गतस्तैः शस्त्रादिभिः क्षतः। वर्जितः स कृत्स्नः पुनः पुनश्चैवं त्रिवारान्तं प्रतिराद्धोऽभियुक्तः सन्प्रत्यानीतोऽपि द्रव्ये शुध्येत्।
प्रत्यानीतेऽपि सकृत्प्रयोगेऽपि शुध्येत्। त्र्यवरं प्रतिराद्ध्वा वा सर्वस्वमवजित्य चेति। मनुः। अनेनैव न्यायेन [illegible]वद्द्रव्यप्रदानेनापि शुद्धिर्ज्ञेया। तथा च मनुः।
सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्। धनं वा जीवनायालं गृहं वा सपरिच्छदमिति। याज्ञवल्क्यस्तु। प्राणाधनं वा यो दद्यात् शुद्धिमवाप्नुयात्।

राकोवा चान्द्रायणमथापि वेति। कश्यपः। गां हत्वा तच्चर्मणा परिवृतो मासं गोष्ठेशयी त्रिषवणस्नायी नित्यं पञ्चगव्याहार इति। शातातपः।
मासं पञ्चगव्याहार इति। शंखप्रचेतसौ। गोघ्नः पञ्चगव्याहारः पञ्चविंशतिरात्रमुपवसेत् सशिखं वपनं कृत्वा गोचर्मणा परिवृतो गाश्चानुगच्छे
द्गोष्ठेशयो गां च दद्यादिति। पैठीनसिः। गोघ्नो मासं यवाशूं प्रसृतं तेन कृष्णं तां भुंजानो गोभ्यः प्रियं कुर्वन् शुध्यतीति। मनुः। उपपातकसंयु
क्तो गोघ्नो भुंजीत यावकं। कृतवापो वसेद्गोष्ठे चर्मणार्द्रेण संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मितं। गोमूत्रेण चरेत्स्नानं द्वौ मासौ
नियतेन्द्रियः। इत्यारभ्य। अनेन विधिना यस्तु गोघ्नो गामनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति। ऋषभैकादशा गाश्च दद्या
त्सुचरितव्रत इति। सुमन्तुः। गोघ्नस्य गोप्रदानं गोष्ठशयनं द्वादशरात्रं पञ्चगव्यप्राशनं गवामनुगमनं चेति। संवर्तः। सक्तुयावकभैक्षाशी
पयो दधि घृतं शकृत्। एतानि क्रमशोऽश्नीयान्मासार्धं सुसमाहितः। ब्राह्मणान्भोजयित्वा तु गां दद्यात्संशुध्य इति। बृहस्पतिः। द्वादश
रात्रं पञ्चगव्याहार इति। एतेषां बुद्धिपूर्वाबुद्धिपूर्वभेदेन ब्राह्मणादिपरिग्रहेण यथार्हं विषयविभाग ऊहितव्यः। षट्त्रिंशन्मते विशेषः। पा
दं उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते। पादोनं व्रतमादिष्टं हत्वा गर्भमचेतनं। अङ्गप्रत्यङ्गसम्पूर्णे गर्भे चेतःसमन्विते। द्विगुणं गोव्रतं कुर्यादेषा
गोघ्नस्य निष्कृतिः। बृहत्प्रचेताः। एकवर्षे हते वत्से कृच्छ्रपादो विधीयते। अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने। त्रिहायने त्रिपादं
स्यात्प्राजापत्यमतःपरमिति। स्मृत्यन्तरं। अतिवृद्धामतिकृशामतिबालां च रोगिणीं। हत्वा पूर्वविधानेन चरेदर्धव्रतं द्विजः। ब्राह्मणान्

७९

भोजयेच्छक्त्या दद्याद्धेम तिलांस्तथेति। संवर्तापस्तम्बौ। एकां चेद्बहवः केचिद्दैवाद्व्यापादिता क्वचित्। पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक्।
व्यापन्नानां बहूनां तु रोधने बन्धनेऽपि वा। भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति। बहूनामपि व्यापादने द्विगुणमेव वचनबलान्न तु प्रतिनि
मित्तं नैमित्तिकावृत्तिः। व्यासः। औषधं लवणं चैव पुण्यार्थमपि भोजनं। अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत्। अतिरिक्ते विपत्तिश्चे
त्कृच्छ्रपादो विधीयत इति। आपस्तम्बः। पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात्। निपातयन्ति ये गास्तु तस्मिन्कुर्युर्व्रतं हि ते। पादमेकं
चरेद्रोधे द्वौ पादौ बन्धने चरेत्। योजने पादहीनं स्याच्चरेत्सर्वं निपातन इति। वसिष्ठः। न नालिकेरेण न शाणवालैर्न चापि मौञ्जेन न च शृंख
लैः। एते तु गावो न निबन्धनीया बध्वा तु तिष्ठेत्परशुं प्रगृह्येति मण्डूकनकुलकाकबिडदहरमूषिकश्वहिंसासु च बिडः कामरूपी कृ
कलासः। दहरः स्वल्पकायो मूषकः। डुण्डुभो दरीत्यके। अन्ये प्रसिद्धाः। एतेषां समुदितानां वधे वैश्यवत्प्रायश्चित्तं। इदं बुद्धिपूर्वाभ्यास
विषयं। अन्यत्रापस्तम्बीयं। वायसबकबलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलसारिकाश्वाहिंसायां। शूद्रवत्प्रायश्चित्तमिति। म
नुरपि। मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च। श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेदिति। प्रत्येकं वधे तु बुद्धिपूर्वे मार्जारगोधानकु
लमण्डूकश्वपान् तित्तिरिणः हत्वा त्र्यहं पिबेत् क्षीरं कृच्छ्रं वा पादिकं चरेदिति यमोक्तं वाक्यं द्रष्टव्यं। अबुद्धिपूर्वं मानवं। पयः पिबेत्त्रिरात्रं वा यो अनस्थिमतामनडुत्कारेण ॥
जनं वाध्वनो व्रजेदिति अस्थन्वतां सहस्रं हत्वा अनस्थिमतां कृकलासादीनां सहस्रं हत्वा वैश्यवत्प्रायश्चित्तं।

गो॰सू॰८० यस्त्वेवं तेन भवंति दंशमशकादयस्तु यावतो नष्टान् हन्तुं शक्नोति तावतो हत्वा वैश्यवत्प्रायश्चित्तं । इदं द्वयमपि पूर्वाभ्यासविषयं । अन्यत्र याज्ञ
वल्क्योक्तं । अस्थन्वतां सहस्रं तु तथा नस्थिमतां मनः । शूद्रहत्याव्रतं षाण्मासिकं प्रकृतं । दद्याद्धेनुं वदेद्यादिति च अपि वास्थन्वतामेकैकस्मि
न्किंचित्किंचिद्दद्यात् अपि चेति विकल्पे । अस्थन्वतां यावंतो हताः सहस्रमूर्ध्वमर्वाग्वा तावतः संख्याय प्रत्येकं किंचित्किंचिद्दद्यात् इदं चा
८० स्थिमत्सु प्रायश्चित्तपूर्वकं चेति । अष्टमुष्टिर्भवेत्किंचित् किंचिदष्टौ तु पुष्कलं । पुष्कलानि तु चत्वारि आढकः परिकीर्तितः । चतुराढको भवेद्द्रोण
इतिमानस्य लक्षणमिति स्मृतिः अनस्थिमतां तु तावत्कः प्राणायामाः तथा च मनुः । किंचिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चै
व हिंसायां प्राणायामेन शुध्यतीति षंढे पलालभारः सीसमाषश्च यं प्रति देवल आह । षंढो यो लिंगहानस्यात्तत्संस्कारार्हश्च नेव स इति । तस्मि
न्हते पुरुषवाधः पलालभारः सीसमाषश्चेत्युभयं मिलितं देयं बुद्धिपूर्वं । इतरत्त्वेकैकं । सीसं लोहविशेषो रजसस्त्राः पुष्मलद्युतिः । माषप्रमाणं पूर्व
मेव व्याख्यातं । अत्र च नक्षापि स्मृतौ जातिविशेषः श्रूयते । षंढः षंढक इत्येतावदेव श्रूयते तत्र यथा जातिसमवाये पि ब्राह्मणादिः प्रयुक्तः सख्या ८०
रान भवति तथा तद्वधनिमित्तं प्रायश्चित्तमपि न भवति । यावदुक्तमेव तु न भवति । अन्यत्र मृगपक्षिविषयं मन्यते । मृगपशुपक्षित्वयं षंढास्तेषु हते
ष्विति वराहे घृतघटः वराहे हते घृतपूर्णो घटो देयः सर्पे लोहदंडः सर्पे हते लोहदंडो देयः । लोहश्चैवं नकाष्ठायित्युच्यते । अपि च कार्ष्णा
यसीं दद्यात् सर्पं हत्वा द्विजोत्तम इति मानवदर्शनात् । सर्पं हत्वा माषं दद्यादिति ब्राह्मस्वैरानसं बुधिपूर्वविषयं । ब्रह्मवध्वां चलनायां नीलः ॥

ब्राह्मण्याश्चारित्याः कुटुंबिन्या बुद्धिपूर्ववधे । याज्ञवल्क्यश्च । अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेदिति षाण्मासान् शूद्रहा चैव कृच्छ्रं दद्याद्धेनुं वा
थ वेत्येतदुदृत्तब्रह्मविट्शूद्रयोषाः प्रमाप्य तु । दृतिं धनुर्वस्तमविं क्रमाद्दद्याद्विशुद्धये इति । यत्तु हारितेनोक्तं षड्वर्षाणि राजन्ये प्राकृतं ब्रह्मचर्यं
वैश्ये त्रीणि सार्धमष्टं शूद्रे क्षत्रियब्राह्मणीषु वैश्यवत् क्षत्रियायां शूद्रवद्वैश्यायां । शूद्रान्हत्वा नव मासानीति । तदं त्यौ तो लक्ष्यावायीदि विष
यं गां त्वे वैश्यवत् गां च हत्वा वैश्यवधे प्रायश्चित्तं । वैश्यवधे त्रैवार्षिकमृषभैकशतं च गा दद्यादिति तत्त्रैरेत । इदं वृत्तस्वाध्यायवतो
र्गतस्य बहुकुटुंबस्य या गौर्बहुक्षीरा तरुणी तस्या बुद्धिपूर्ववधे । तादृश्याएकफलायागाभित्याकर्मांगभूताया वधे याम्यं । गोसहस्रं
तथापि दद्यात्तच्चरितव्रतः । अविद्यमानसर्वस्वं वेदविद्भ्यो निवेदयेदिति । द्वैमासिकं व्रतमत्र प्रकृतं । अत्रैवाबुद्धिपूर्वं कात्यायनीयं । गोदा
नरहिते त्रैवार्षिकं । गोघ्नस्तच्चर्मसंवीतो वसेद्गोष्ठेथवा पुनः । गाश्चानुगच्छेत्सततं मौंजीचीराजिनादिभिः । वर्षे शीतातपक्लेशा वाक्छिपेकमया
र्दिताः । प्रोक्षयत्सर्वपूर्यंनेन पूयते वत्सरैस्त्रिभिरिति । वसिष्ठः । गां तु हन्यात्तस्याश्चर्मणार्द्रेण परिवेष्टितः षाण्मासान् तप्तकृच्छ्रं चरेति षेहु
ष भवहतो च दद्यातामिति । वह इषभोपगता गौः । दद्यातामिति कर्मणि कतृ प्रत्ययः । याज्ञवल्क्यः । पंचगव्यं पिबन्गोघ्नो मासमासीत संयतः गो
ष्ठेशयो गोनुगामी गोप्रदानेन शुध्यति । कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः । दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गा इति । जाबालः । प्रा
जापत्यं चरेन्मासं गोहंतास्तदकामतः । गोहितो गोनुगामी स्याद्गोप्रदानेन शुध्यतीति । विष्णुः । गोघ्नस्य पंचगव्येन मासमेकं पलत्रयं प्रत्यहं स्यात्प

गौ॰सू॰वृ॰ द्वादशमयेत् प्रतिषिद्धमंत्रसंयोगे सहस्रवाकश्चेत् मंत्रयोगेऽप्रतिषिद्धाः पतितादयस्तैः सह मंत्रयोगे अध्ययनाध्यापनयाज्ययाजनलक्षणे संव
त्सरं प्राकृतब्रह्मचर्यं । सचेन्मंत्रयोगः सहस्रवाको भवति । वक्ष्यतीति वा चकः पदं सहस्रपदश्चेत् । अबुद्धिपूर्वमिदं । बुद्धिपूर्वं तु पतितत्वं स्यादिति । उपपा
तके तु वासिष्ठं । पतितचंडालशवसूतकाश्रावणे तु त्रिरात्रं । वाग्यता आसीरन् सहस्रपरं वा तदभ्यस्यन्तः पूता भवन्तीति विज्ञायते । एतेनैव गर्हिताध्या
८१ पकायाजकाद्याख्याता दक्षिणात्यागाच्च पूता भवन्तीति विज्ञायत इति । अन्ये तु सहाध्ययनं सह यजनं चेच्च मंत्रयोगं व्याचक्षते । अग्न्युत्सादिनि
राकृत्युपपातकेषु चैवं अग्निमुत्सादयति हुशीलमस्यापि बुद्धिपूर्वममुत्सादी । निराकृतिः ज्ञातोऽसत्याज्यनध्येता । उपपातकानि अपन्त्या । गौ
प्रादुर्भावो द्वादशरात्रं ब्रह्मचर्यादीनि व्याख्यातानि । एवमग्न्युत्साद्यादिषु संवत्सरं ब्रह्मचर्यमिति । योनाहिताग्निर्वा द्वेष्यादिप्रसुवादिना वाग्नीनप वि
ध्यति पुनस्तानादधानो वापि बहुकालं नाधत्ते तद्विषयमिदं । तत्र बाल्यकाले वासिष्ठं । याग्नीनपविध्या कृच्छ्रं द्वादशरात्रं चरित्वा पुनराददीत । आलस्येन
त्यजतो मानवं । अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः । चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तदिति । मासमपविध्येत्यन्वयः । अग्निहोत्र्यप
विध्याग्नीन्मासादूर्ध्वं तु कामतः कृच्छ्रं चान्द्रायणं चैव कुर्यादित्याद्यापस्तम्बीति । मासादर्वागपि चान्द्रायणमिच्छन्ति । स्मार्ते त्वमोयाभित्यग्नातिना ८१
स्तिक्यात्प्रागनपत्यं चैवरे द्विजः । अन्यत्र पुनराधानं दानमेव तथैव चेति । मानवं तु षाण्मान्नकालं तामसं सेहितानेपर्वं च । होमश्चशाकलैर्नित्य
मपंक्यानां विशोधनमिति स्त्री चाभिचारिणी गुप्ता पिण्डं तु लभेत यास्त्री भर्तारमतिचरति व्यभिचरति पुरुषान्तरगमनं संगच्छते सा चेत्तदेवप्राय

श्चित्तं कुर्यात् संवत्सरं ब्रह्मचर्यं । सा च यावत्समाप्यते प्रायश्चित्तं तावद्गुप्ता सती पिण्डमात्रं लभते । बुद्धिपूर्वसकृद्गमनविषयमिदं । अन्यत्र यत्पुंसः परदारेषु
तच्चैनां चारयेद्व्रतमित्येतत्तु । सजातीयविषयं चेदं । ब्राह्मण्याः क्षत्रियविषयं वासिष्ठं । व्यपतदयुसेवत्सरं घृतपटं धारयेद्दामयकेद्दं सकृद्गाप्रस्तरे वा
भुंजानाथःशायी नोर्ध्वं संवत्सराद प्सु निमग्नायाः सावित्र्यष्टसहस्रेण शिरोभिर्जुहुयादिति । वैश्यविषये लौशनसं । व्यभिचारिणी कृच्छ्राष्टं चरेदि
ति । अत्र तृहप्रचेताः । विप्रा शूद्रेण संपृक्ता न चेत्तस्मात्प्रसूयते । प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चान्द्रायणत्रयं । चान्द्रायणे द्वे कृच्छ्रं च विप्राया वैश्यसंगमे ।
कृच्छ्रं चान्द्रायणं स्यात्तां तस्याः क्षत्रियसंगमे । क्षत्रियाशूद्रसंपर्के कृच्छ्रं चान्द्रायणद्वयं । चान्द्रायणं सकृच्छ्रं च चरेद्वैश्येन संगता । शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चां
द्रायणोत्तरं । आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितं त्विति । प्रजातायाब्राह्मण्याश्च बुद्धिरैतिमतेविशेषः । विप्रागर्भे पराकः स्यात् क्षत्रियस्य तथैव द
वे । तेऽदंवं च पराकेश्चवैश्यस्य कामकारतः । शूद्रागर्भे प्रवेत्यागश्चण्डालो जायते यतः । गर्भस्याबाधे यथानु दोषे चरेच्चान्द्रायणत्रयं इति । कामकारे पुनः परा
कादिकं द्विगुणं कुर्यात् । वासिष्ठस्तु । ब्राह्मणक्षत्रियविशां भार्याः शूद्रप्रसूताः । अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतरा इति । आहितपीम
गर्भायास्तु पश्चाच्छूद्रादिसंगमे । अंतर्वत्नी तु या नारी समेता कामकामिना । प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः । जाते गर्भे व्रतं पश्चात् कुर्या
न्मासं तु यावकं । न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधीति स्मृत्यन्तरोक्तं द्रष्टव्यं । या तु देशांतरिता ल्यात्प्रायश्चित्तं न करोति तदा । प्रातिलोम्यव
धः पुंसः स्त्रीणां नासादिकर्तनमिति । एतद्भवति । हीनवर्णोपभुक्तायां स्यां त्याज्या वध्याथवा भवेदिति । पराशरः । अंकनैः पुल्लिंगेन आमातृपीपुगे वर्ज

गो० सू०६० स्त्रीकृते कूष्माण्डैर्घृतहोमः ॥ गोवर्जितास्वमानुषीषु स्त्रीकृते मैथुने आचरिते कूष्माण्डैर्घृतहोमः कर्तव्यः । गोवर्जमिति वचनं विस्पष्टार्थं । वक्ष्यति गवि
च गुरुतल्पसममिति । ततश्चात्र देवगोगमने भविष्यति । सकृद्गमन इदं । अभ्यासे सौरां खो वा पशुवेश्याभिगमने प्राजापत्यमिति । अत्र कश्चन प्रकृताय
स्तुवत्यायां भैक्षभुक् संयतेन्द्रियः । त्र्यहं तस्मात्सहस्रमभ्यस्य सावित्रीमेति शुद्धतामिति । द्विजान्तिरुक्ता इति श्री मिताक्षरायां द्वाविंशोऽध्यायः २२
क्रमप्राप्तं सुरापानप्रायश्चित्तमाह सुरापस्य ब्राह्मणस्योष्णामासिंचेयुः सुरामास्ये मृतः शुध्येत् त्रिविधा सुरा । यथाह मनुः । गौडी माध्वी च
८२ पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैरिति । द्विजोत्तमा ब्राह्मणाः । क्षत्रियवैश्ययोस्तु पैष्टीव । यथाह स एव सु
रा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति । अन्नानां मलं सुरा पैष्टी । अत्र ब्राह्मणग्रहणं द्विजात्युपलक्षणं ।
अस्यार्थः सुरा प्रतिषिद्धा सुरा तस्याः पाता सुरापः तस्य द्विजातेरास्ये तामेव सुरामुष्णामासिंचेयुः उपदेष्टारस्तयमासेचनोपायः । आसिंचेत्स्वयं वा हि तस्य ८२
रामास्ये येन सुरापेयात् सुराछापानव्यावस्ययेन निष्कृतिरित्युपदिष्टो नीतिस्वयमेव वात्मनः स्यु कर्ता । तथा चापस्तम्बः । सुरापोऽग्निस्पर्शां सुरां पिबेद्दग्धे
आसिंचेयुरिति बहुवचनं उपदेष्टॄणां बहुत्वं सूचयति । मनुरप्याह । तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनस्सु निष्कृतिं । सा तेषां पावनाय स्यात् पवित्रं विदु
षां हि वागिति । मृतः शुध्येदिति वचनात् तथा सुरापायितव्या यथा पातुर्मरणं भवति । आर्द्रवासाः पिबेदिति पैठीनसिः । आयसेन ताम्रेण वा पात्रेण तिम्र
चताः । अत्र याज्ञवल्क्यः । सुराम्बुघृतगोमूत्रपयसामग्निसन्निभं । सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति । बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत् ।

जातिमात्रब्राह्मणी ब्रह्मबन्धुः । खलनाव्यभिचारिणी । तस्यां हतायां नीलो देयः । नीलो वृषः । मनुरुक्तवर्णानुपूर्व्यमाह । नीलकार्मुकवस्ताविः पृथक्
दद्याद्विशुद्धये चतुर्णामपि वर्णानां नारीर्हत्वानवस्थिता इति वैशिके न किंचित् अभिगच्छति या नारी पुरुषैर्बहुभिर्मिथः । व्यभिचारिति सा ज्ञेया
प्रत्यक्षांगाणि कर्तिचेति प्रजापतिः । वैशिकेन वेश्यकर्मणा जीवन्त्यां ब्रह्मबध्वां हतायां किंचिद्देयं । अष्टमुष्टिभवेत्किंचिदित्येतत् तल्पान्नधनलाभ
वधेषु पृथग्वर्षाणि तल्पशब्देन शयनं तेन विनाभार्या लक्ष्यते । अन्नं कृतान्नं । धनं सुवर्णादि । एतेषां लाभस्य वधे विप्रेणोपलभ्यमानेषु दोषाय
न्यासादिना ये हरति स पृथक् प्रतिनिमित्तं अब्देन संवत्सरं प्राकृतं ब्रह्मचर्यं चरेत् । कन्यान्नधनविघ्ने प्राजापत्यमित्योशन समबुद्धिपूर्वविषयं । ब्रा
ह्मणलाभविषयमिदं क्षत्रियादिषु धर्मर्धं द्वे परदारे परदारगमने द्वे वर्षे प्राकृतं ब्रह्मचर्यं । ऋतुकालगमने बुद्धिपूर्वमिदं । अकामितः पुनरेतद्वा
र्षं कृत्या पाद्यं त्रीणि श्रोत्रियस्य सर्वत्र एवंविधे श्रोत्रियस्य ब्राह्मणस्य दारान्गत्वा तत्स्त्रीणि वर्षाणि ब्रह्मचर्यं । अत्र शंखः । वेश्यायामवकी
र्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं चानुतिष्ठेत् । क्षत्रियायां द्वे वर्षे त्रीणि ब्राह्मण्यां वैश्यावत् शूद्रायां ब्राह्मणपरिणीतायामिति । संवर्तः । शूद्रां तु ब्राह्मणो
मासं तथा मासार्धमेव वा । गोमूत्रयावकाहारस्तिष्ठेत् न्यायमोक्षके ब्रूते । कामतो मासमेकं ततोऽर्धमासमिति विकल्पः । अत्र तु काले तु ब्राह्मण्या
दिद्विजातिस्त्रीषु [illegible] मासिक द्वैमासिकचान्द्रायणानि क्षत्रियादीनां च क्षत्रियादिषु ब्राह्मणवत्प्रायश्चित्तं । अन्तेवासिनाः गमनतुल्यतया त्या
ज्यं तद्द्विगुणं चरेदिति । द्रव्यलाभेचोत्सर्गः यदि च परस्त्रीतो यत्किंचिद्द्रव्यं लब्धं तस्योत्सर्गः कार्यः । यथास्थानं वा गमयेत् यत्र स्थाने लब्धं त

मुक्तातोऽन्यतमस्याश्चमम न्याक्षयत्वं च्यहं । मत्याभुक्ताचरेत् कृच्छ्रं रेतोविण्मूत्रमेव च । अज्ञानात्प्राश्यविण्मूत्रं सुरासंस्पृष्टमेव च पुनः संस्कारमर्हंतित्रयो
वर्णाद्विजातयइति च । कएवंश्वस्पष्टमाह । रेतोमूत्रपुरीषाणां प्राशनमतिपूर्वके । नाश्नीयाच्चहममत्यातप्तकृच्छ्रं चरेद्द्विजइति । श्वापदोष्ट्रखराणांच
गम्य श्याघ्रादयो वनचराः श्वापदाः । उष्ट्रखरौ प्रसिद्धौ । तेषां मांसमासच मोदि तस्य प्राशनेतप्तकृच्छ्रः । पुनः संस्कारश्चबुद्धिपूर्वाभ्यासउभयं
मिलितं । सकृद्बुद्धिपूर्वावाबुद्धिपूर्वाभ्यासेवतप्तकृच्छ्रः सकृदमतिपूर्वसंस्कार एवभवति ग्राम्यकुक्कुटसूकरयोश्च ग्राम्येकुक्कुटसूकरयो
श्चांगस्यप्राशनेएतदेवप्रायश्चित्तं । विषयव्यवस्थापूर्ववत् । गंधाघ्राणेसुरापस्य प्राणायामाघृतप्राशनंच यस्तु सुरापस्य गतं सुरागंध
माजिघ्रति न पुनः शरीरगंधं नापि भांडस्थायाः सुरायां धंतस्य प्राणायामास्त्रयो घृतप्राशनं च प्रायश्चित्तं ब्राह्मणस्य मिलितं । क्षत्रियस्यप्राणायामाः
वैश्यस्य घृतप्राशनं इति । सोमपस्यविशेषो मनुनोदाहृतः ब्राह्मणस्तु सुरापस्य गंधमाघ्राय सोमपाः । प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्य
तीति । ब्राह्मणस्य रुजाकृत्यं घ्रातिरघ्रेयमद्ययोः । जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतं इति । जातिभ्रंशकरं कर्मकृत्वान्यतममिच्छया । चरेत्सांत
पनं कृच्छ्रं प्राजापत्यमनिच्छयेति मानवं । भांडस्थायां सुराया गंधाघ्राणे पूर्वेश्वदष्टस्य पूर्वेश्वापदादिभिर्दष्टस्य च प्राणायामाघृतप्राशनंच
प्रायश्चित्तं । मनुरुक्तं । श्वसृगालघेखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च । नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यतीति । ब्राह्मणविषयवसिष्ठो विशेषः
ब्राह्मणस्तु शुनादष्टोनदीं गत्वा समुद्रगां । प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति । जातुकर्ण्यः । ब्राह्मणीक्षत्रियावैश्याशुनाश्वापदेरपि । दृष्टा

सचेलमाप्लुत्य शुध्यतीति निसंशयइति तप्ते लोहशयने गुरुतल्पगः शयीत गुरुरत्र पिता । निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति
चान्नेन सविप्रो गुरुरुच्यतइति मनुः । विप्रग्रहणं वर्णोपलक्षणं । तल्पशब्देन शयनवाचिना भार्या लक्ष्यते । तत्रापि जननी तत्सपत्नी तद्दासी गुरुतल्प
त्यागः । लोहशयनेकृष्णा यस्तन्निमित्ते तप्तेयथा मरणाक्षणं भवति तथा तप्ते शयीत । सूर्मीं ज्वलितां श्लिष्येत् ज्वलंतीं लोहमयीं स्त्रीप्रतिकृतिः सू
र्मी । तां ज्वलंतीमग्निवर्णां तप्तामाश्लिष्येदाप्राणवियोगात् । लिंगं वा सवृषणमुत्कृत्यांजलावाधाय दक्षिणाप्रतीचीप्रजेदजिह्ममाशरीरपा
तात् सबीजं लिंगमुत्पाद्य सुरादिनानिर्कृत्य स्वत्यांजलेस्थापयित्वा नैर्ऋतीं दिशमाशरीरपाताद्व्रजेदजिह्मः । कृपादयपरिहन्येत्वत्र वेष्प्रवर्ति
हायस्तत्रैवतिष्ठेदाप्रलयादितिवसिष्ठः । मृतः शुध्येत् सर्वशेषाये । पूर्वोक्तेषु प्रकारेष्वन्यतमेन मृतएवगुरुतल्पगः शुध्येत् नान्यथेति । वि
तयम थत ज्ञानजननीगमने स्वभार्यादिबुद्ध्या बुद्धिपूर्वतत्सपत्न्यां च सवर्णायां बुद्धिपूर्वगमने । पितृभार्यां तु विज्ञाय सवर्णां योभिगच्छति । ज
ननीं वाथ विज्ञाय ना मृतः सविशुध्यतीति इति षट्त्रिंशन्मते दर्शनाद् । जनन्यां तु कामतस्तेवासिष्ठं । निष्कालकोघृताभ्यक्तो गोमयाग्निना पाद
प्रभृत्यात्मानमवदाहयेदिति । अकामतोभ्यासेप्येवमेव । अकामतस्तु मातुः पत्न्याः सवर्णायास्तु कृच्छ्रयाश्च गमनाभ्यासेशंखोक्तं । अधः शा
यीजटाधारी पर्णमूलफलाशनः । एककालं समश्नन्वै वर्षेतु द्वादशे गते । गुरुतल्पस्तेयी सुरापश्च ब्रह्महाकृते त्यागः । व्रतेनैतेन शुध्यंति महापात
किनस्त्विमइति । सकृत्गमने च भयोरिच्छातः प्रवृत्तोमानवं । खट्वांगी चीरवासा वा श्मश्रुलो विजने वने । प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितइति ।

मो॰सू॰५० तथाप्रोत्साहितस्य स्वेन वा प्रोत्साहितया मोहात् समयात् प्रायश्चित्तद्वयं क्रमेण द्रष्टव्यं। गुरुतल्पगामी संवत्सरं कृच्छ्रमाचरेत् षाण्मासांस्तप्तकृच्छ्रं चेति।
एवमुत्तरेष्वपि प्रायश्चित्तेषु यत्कृतं तदात्मना प्रोत्साहितायां यल्लघु पर्यायं तत्र प्रोत्साहितस्य मध्यमं तदुभयोरिच्छातः प्रवृत्तावितिशिष्टं द्रष्टव्यं। तत्र व्याघ्रः। कृच्छ्रं
चैवातिकृच्छ्रं च तथा कृच्छ्रातिकृच्छ्रकं। चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोरिति। इदं सकृद्गमने अबुद्धिपूर्वं बुद्धिपूर्वं चाभ्यासे एकवर्षमत्यागत्वापु
८४ नर्भार्यां गुरोः क्षत्रसुतां द्विजः। वृषणाद्वर्जितं लिंगमुत्कृत्य सम्यक्शुचिर्भवेदिति। कण्वः। चांद्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च। सकृद्गत्वा गुरोर्भार्यां स
ज्ञाना क्षत्रियां द्विज इति। जातूकर्ण्यः। गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा च कामतः। वृषणौ वा निकृत्य शुध्येज्जीवन्मृतोऽपि वेति। कण्वः। तप्तकृच्छ्रं प
राकं च तथा मासं तपनं गुरोः। भार्यां वैश्यां सकृद्गत्वा बुद्ध्या मासं चरेद्द्विज इति। लोकाक्षिः। गुरोर्वैश्यां पुनर्गत्वा गत्वा वापि पुनः पुनः। लिंगाग्रं छेदयित्वा
तु ततः शुध्येत्स किल्बिषादिति। प्रजापतिः। पंचरात्रं तु नाश्नीयात्समाष्टौ वा तथैव च। वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विज इति। हारीतः। अ
भ्यस्य विप्रो वैश्यां गुरोरज्ञानमोहितः। षडब्दं ब्रह्मचर्यं स चरेद्यावदायुषमिति। जाबालिः। अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च। गुरोः शूद्रां सकृ ८४
द्गत्वा बुद्ध्या विप्रश्चरेत्तत इति। उपमन्युः। पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः। ब्रह्मचर्यमदुष्टात्मा द्वादशाब्दं समाचरेदिति। दीर्घतपाः। प्रा
जापत्यं सांतपनं सप्तरात्रोपवासनं। गुरोः शूद्रां सकृद्गत्वा चरेदज्ञानतो जन इति। तत्रैवाभ्यासे मानवं द्रष्टव्यं। चांद्रायणं वा त्रीन्मासानभ्यसेन्नियतें
द्रियः। हविष्येण यवाग्वा वा गुरुतल्पापनुत्तय इति। अत्र व्याघ्रः। जात्युत्कर्षपरदारार्थं च गुरुतल्पत्वमेव च। साधारणस्त्रियो नास्ति कन्यादूषणमेव चेति॥

पिण्याकं वा कणान्वापि भक्षयेत्त्रिसमा निशीति। तत्र मरणांतिकप्रायश्चित्तं बुद्धिपूर्वाभ्यासविषयं। तत्रैव सकृत्पानविषयं। ब्रह्महत्याव्रतं द्वादशवार्षि
कं। अत्र स्त्रियो विहत्य शरीरं सुरालशुनपलांडुगृंजनमांसादीन्यभक्ष्याणि। वर्जयेद्दाहारमर्यं शरीरमिति। वसिष्ठोऽपि। पतत्यर्धं शरीरस्य सुरां पिबेत्।
पतितार्धशरीरस्य निष्कृतिर्न विधीयत इति। अत्र स्त्रीणामपि प्रतिषिद्धसुरा प्रायश्चित्तं भवति। तत्र स्त्रीणामर्धं प्रायश्चित्तमित्युक्तं पुरस्तात्। त
त्र मरणांतिके धर्मकृत्तेरशक्यत्वात् बुद्धिपूर्वं सकृत्पाने द्वादशवार्षिकस्यार्धं। अभ्यासे तस्यैवाभ्यासः। असत्यापाने पयो घृतमुदकं वा यः प्रतित्र्यहं त
प्तानि सकृत्कृत्स्नं तस्य संस्कारः। यस्त्वमत्याबुद्धिपूर्वं यवाग्वादिबुद्ध्या सुरां पिबति स पयआदीनि चत्वारि द्रव्याणि तप्तान्युक्तानि। द्वितीयानि दे
शपायिवेत्तास्यने। प्रतित्र्यहं प्रथमे त्र्यहे पयः द्वितीये घृतं तृतीये उदकं चतुर्थे वायुः वा यात्कृच्छ्रं तं सांतपनं द्वे च। सकृत्कृत्स्ने सत्येवं भूतस्तप्तकृच्छ्रो
स्य प्रायश्चित्तं। ततः कृच्छ्रानंतरं पुनः संस्कारः पुनरुपनयनमस्य कर्तव्यं। तत्र मनेर्वाविशेषः। वपनं मेखलादंडो भैक्ष्यचर्याव्रतानि च। एतानि तु
निवर्तंते पुनः संस्कारकर्मणीति। इदमीषदभ्यासविषयं। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यतीति मानवं सकृत्पानविषयं। यत्तु। पिण्या
कं वा कणान्वापि भक्षयेत्त्रिसमा निशीति याज्ञवल्क्यवचनं यच्चापस्तंबीयं स्तेयं कृत्वा सुरां पीत्वेत्यादि तदुभयमपि बहुकृत्वोऽभ्यास एव। कणा
न्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी इत्यादीनि मानवादीनि अबुद्धिपूर्वविषयाण्येव। अभ्यासतारतम्या
पेक्षया व्यवस्थाप्यानि। मूत्रपुरीषरेतसां च प्राशने मूत्रादीनां च प्राशने तत्सकृत्कृच्छ्रं स द्विजः पुनः संस्कारः प्रायश्चित्तमिदं बुद्धिपूर्वविषयं।

गो० स्मृ० ष्ववस्थितमिति। अत्र प्रायश्चित्तमवर्तिनां स्त्रीणां दंडमाह श्वभिरादयेद्राजा निहीनवर्णगमने स्त्रियं प्रकाशं निहीनवर्णेन सह या मैथुनमाचरति तां
प्रकाशं सर्वेषामेव पश्यतां बहुस्थाने गमो राजा श्वभिरादयेत् खादयेत्। अत्र मनुः। भर्तारं लंघयेद्या तु ज्ञातिस्त्रीगुणगर्विता। तां श्वभिः खादयेद्राजा सं
स्थाने बहुभिः स्थित इति। वसिष्ठस्तु जातिविशेषेण विशेषमाह। शूद्रश्चेद्ब्राह्मणीमभिगच्छेत् वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत्। ब्राह्मण्याः शिरसि
८५ वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते। वैश्यश्चेद्ब्राह्मणीमभिगच्छेत् लोहितदर्भैर्वेष्टयित्वा
वैश्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते। राजन्यश्चे
द्ब्राह्मणीमभिगच्छेत् शरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसं
व्राजयेत् पूता भवतीति विज्ञायते। एवं वैश्यो राजन्यायां शूद्रश्च राजन्यवैश्ययोरिति। अनुलोमेषु प्रतिलोमं गच्छत्सु व्याघ्र आह। वर्णानामनु ८५
लोमानां परस्परसमागमे। पुंश्चलीं घातयेद्राजा खादयेद्वा नरैः स्त्रियं। सृगालैर्वा द्विपूर्वं चेत्पुरुषो वधमर्हतीति। अयमेवानुलोमानां स्वजातिव्यु
त्क्रमेष्विति पुमांसं घातयेत् अनंतरोक्तविषये गंता पुमान् राज्ञा घातयितव्यः। वधप्रकारश्चानंतरमेव वसिष्ठवचनेन दर्शितः। यथोक्तं च।
लिंगोद्धारः इत्यादि। स्त्रियास्तूक्तं वा दंडप्रणयनं कर्तव्यं। सप्रत्ययाप्रत्ययाभ्यासानभ्यासापेक्षोऽयं विकल्पः गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे य
जेत अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितमिति याज्ञवल्क्यः। स चतुष्पथे गर्दभेन पशुना निर्ऋतिं यजेत। अत्र मानवो विशेषः। अवकीर्णि

तु काणेन गर्दभेन चतुष्पथे। पाकयज्ञविधानेन यजेत निर्ऋतिं निशीति। वसिष्ठस्तु ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्द
भं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत्तस्य जुहुयात् कामाय स्वाहा। नैर्ऋत्यै स्वाहा। रक्षोदैवतेभ्यः स्वाहेति तस्याजिनमूर्ध्ववालं परिधाय लोहित
पात्रः सप्त गृहान् भैक्षं चरेत् कर्माचक्षाणः एवं गर्दभेनेष्ट्वा तस्यैव गर्दभस्याजिनमूर्ध्ववालमुपरि लोम परिधाय लोहितपात्रः पाकेन लोहि
तेन मृन्मयपात्रहस्तो गृही वा कर्म चक्षाणः अवकीर्णिने भिक्षां देहीति ब्रुवाणः सप्त गृहान् भैक्षं चरेत् सप्तगृहेषु यावल्लब्धं तावदेवाशनं अलाभे
उपवासः संवत्सरेण शुध्येत संवत्सरमेतद्व्रतं चरन् शुध्यतीति। इदं च वार्षिकं श्रोत्रियस्य विप्रस्य वैश्यपत्न्यां दुष्टव्यं। आह तु शंखलि
खितौ। गुप्तायां वैश्यायामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणीति। गुप्तायां श्रोत्रियपत्नी वादि
गुणशालिन्यां। अंगिराः। अवकीर्णिनिमित्तं तु ब्रह्महत्याव्रतं चरेत्। चीरवासास्तु षण्मासांस्तथा मुच्येत किल्बिषादिति। तदकामतो गोनमीयेक
विषयं। पुनः शंखलिखितौ। स्वैरिण्यां वृषल्यामवकीर्णः सचेलस्नातः उदकुंभं दद्याद्ब्राह्मणाय वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्। य
वसंभारं च गोभ्यो दद्यात्। शूद्रायामवकीर्णः प्राजापत्यं चरेत्। षंढायामवकीर्णः पलालभारं सीसमाषं च दद्यादिति। इदं चावकीर्णिप्रायश्चित्तं स
र्वेषामेव त्रैवर्णिकब्रह्मचारिणां समानं। तथाह शांडिल्यः। अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु। इष्ट्वा भैक्षाशिनो नित्यं शुध्यंत्यब्दात्समाहिता
इति। रेतःस्कंदने भये रोगे स्वप्ने अग्नीधनभैक्षचरणानि सप्तरात्रमकृत्वाज्यहोमः समिधो वा रेतस्याभ्यां भये रोगे स्वप्ने वा यदि ब्रह्मचारिणो रेतः

गो॰ स॰ ८६॰ स्कंदेतत्तेनेतेः स्याभ्यां मंत्राभ्यां आज्यहोमः कर्तव्यः। समिधो वा होम इत्युपसमस्तमपेक्ष्यते। एतदुभयेरोग इत्यादिब्रह्मचारिव्यतिरिक्तस्यापि। तथा श्रीध
नं सीमदाधाने प्रेक्ष चरणं चसत्वरा त्रमूरुत्वा पूर्ववद्धोमः। रेतस्यक्त्वा पुनर्मामैत्विंद्रियमिति पुनर्मनः पुनरात्मा मा आगादित्येके। आश्वलायनेन तु
पुनर्मामैत्विंद्रियमिति। इमे ये धिष्ण्यासो अग्नय इति। प्रयतो गतश्चाप्स्वे मे सिक्तो भुक्तेमकामेन। आदित्यमर्चयित्वा तु पुनर्मामित्यृचं जपेदिति
८६ प्राजापत्यं सकृत्सेवनविषयं। गौतमीयमभ्यासविषयं। हारीतः। यत्क्षुर्यादुपकुर्वाणः कामतो कामतोपि वा। तद्वा द्विगुणं कुर्याद्ब्रह्मचारी तु नैष्ठिक इति। अ
त्र वसिष्ठः। एतदेव रेतसः प्रयत्नोत्सर्गे दिवास्वप्ने च ब्रतांतरेषु चैवमिति। गर्दभं पशुमालभेत नैर्ऋतं च स्वकं निर्वपेदिति प्रकृतं। वानप्रस्थो यतिश्चैव
८८ एवं तु नेसति कामतः। पराकत्रयसंयुक्तं मत्वकीर्णिव्रतं चरेदिति। शांडिल्यः। पुंसि मैथुनमासेव्य यत्नोत्सर्गं चरेत्ततः। ब्रह्मचारी यथाभ्यासं स्नात्वाथ
हविष्याशने तु। पुंसि मैथुनमासाद्य वानप्रस्थो यतिस्तथा। कृच्छ्रं चांद्रायणं चैव कृत्वा शुध्यति किल्बिषादिति। व्यासः। सूर्यस्यत्रीन्नमस्कारान् स्वप्ने सि
क्तो गृही चरेत्। यतिश्चैव वनस्थश्च त्रिः कुर्यादघमर्षणमिति। काश्यपः। मैथुनं तु समासाद्य पुंसि योषित वा पुनः। गोयाने प्सु दिवा चैव स्वापे च स्नान
प्राचरेदिति। मानवं गृहस्थस्य। ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतं। अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवदिति। अंगिराः। वृद्धवसिष्ठः। यस्त्व ८६
पाणिगृहीतायामास्ये कुर्वीत मैथुनं। तस्य रेतसि तं मासं पतरस्तस्य रेरेतेइति सूर्याभ्युदिते ब्रह्मचारी तिष्ठेदहरभुंजानोऽभ्यस्तमिते च रात्रिं जप
सावित्रीं यस्तु सूर्यमुदयंतस्वपिति स सूर्याभ्युदितो ब्रह्मचारी सर्वमहरहर्भुंजानस्तिष्ठेत्। अभ्यस्तमितश्च रात्रिं सर्वां आसीत। तिष्ठेदहनि रात्रा

॥ सखीसयोनिसगोत्राशिष्यभार्यासु स्नुषायां गवि च गुरुतल्पसमः। सखी मित्रभूता। सयोनिर्भगिनी। सगोत्रा एकगोत्रा। स्नुषा पुत्रभार्या। एतासु
शिष्यभार्यायां गवि च मिथुनीभावे यावानेव गुरुतल्पे दोषस्तावानस्येति। याज्ञवल्क्यः। सखीभार्याकुमारीषु स्वयोनिष्वंत्यजासु च। सगोत्रासु सु
तस्त्रीषु गुरुतल्पसमं स्मृतं। पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा। आचार्यपत्नीं स्वसुतां गच्छंस्तु
गुरुतल्पगः। लिंगं छित्वा वधस्तस्य सकामायाः स्त्रिया अपीति। नारदः। माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा। पितृव्यसखिशिष्यस्त्री भ
गिनी तत्सखी स्नुषा। दुहिताचार्यभार्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या। आसामन्यतमां गत्वा गुरुतल्पग
उच्यते। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयत इति। कात्यायनः। जनन्याश्च भगिन्याश्च स्वसुतायास्तथैव च। स्नुषाया गमनं चैव विज्ञेयमतिपा
तकं। अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनमिति। बृहद्यमः। रेतः सिक्त्वा कुमारीषु स्वयोनिष्वंत्यजासु च। सपिंडास्वन्यदारेषु प्राणत्यागो वि
धीयत इति। स एव। चांडालीं पुल्कसीं म्लेच्छीं स्नुषां च भगिनीं सखीं। मातापित्रोः स्वसारं च निक्षिप्तां शरणागतां। मातुलानीं प्रव्रजितां स्वगोत्रां
नृपयोषितं। शिष्यभार्यां गुरोर्भार्यां गत्वा चांद्रायणं चरेदिति। अवकरत्वन्येके एके मन्यंते सख्यादिगमने अवकरतो दोषः प्रायश्चित्तमप्यव
कीर्णिव्रतं न गुरुतल्पव्रतमिति। यान्येतानि सख्यादिगमने ऽनुक्रांतानि प्रायश्चित्तानि तेषु मरणांतिकानि सप्रत्ययानुबंधात्यंताभ्यासविषयाणि।
यानि पुनरत्यंतलघूनि तानि स्वप्नार्याबुध्याप्रवृत्तस्य मध्ये त्वाचारेतः सेकादर्वाक् उपरतविषयाणि। मध्यमध्यानि कल्प्यानि। न जातु ब्राह्मणहन्यात्सर्वपापे

ब्रह्मचारिणः। आचम्य प्रयतो नित्यं जपेदशुचिदर्शने। सौर्यान्मंत्रान्यथोत्साहं पावमानीश्च शक्तित इति। मानवे नैष्ठिकादीनां। अशुचिदर्श
ने द्विजः प्रणवं जपेदिति। जाबालिगृहस्थवचनं गृहस्थविषयं। अशुचिदर्शने आदित्यदर्शनं ब्राह्मणदर्शनं गवामग्नेर्वेत्यौशनसं नियमकाला
न्यत्र। जाबालिगृहीतेऽद्ब्रह्मणात् दुःस्वप्नविधिनेप्रतिषेधः। अभोज्यभोजने मेध्यप्राशने वा निष्पुरीषीभावः। नित्यमभोज्यं केशकीटापन्न
मित्यादिनाभोज्यान्युक्तानि। तानि चैवं चतुष्प्रकाराणि। जातिदुष्टानि लशुनादीनि। कालदुष्टानि पर्युषितादीनि। परिग्रहदुष्टान्युत्सृष्टादी
नामन्नानि। संसर्गदुष्टानि केशकीटाद्युपहतानि। क्रियादुष्टान्याचमनोत्थानव्यपेतादीनि। तेषामभोज्यानां भोजने च मेध्यं पवित्रं। अ
मेध्यमपरिशुद्धं स्नानपात्रपाकस्थं आप्रदात्रादिना तेषाममेध्यानां प्राशने च निःष्पुरीषीभावः कार्यः यथा निःष्पुरीषमुदरं भवति तथा का
र्यं तत्कथं। त्रिरात्रावरमभोजनं। त्रिरात्रोत्तरं नेकिंचिद्भुंजीत। न किंचित्तु खादेत्। निर्किंचिदित्यवेन एवं निःष्पुरीषीभावो बाध्यते। अवरग्रहणा
त्सप्तरात्रादेरपि भावः। परमेण सप्तरात्रं। तथा चापस्तंबः। अभोज्यं भुक्त्वा नैष्पुरीष्यं तत्सप्तरात्रेणावाप्यत इति। सप्तरात्रं वा स्वयं शीर्णान्युपयुं
जानः फलान्यनतिक्रमन्। शुध्यतीति शेषः। अथवा नोपवसेत् किंतु स्वयं शीर्णानि स्वयं पतितानि फलानि भुंजानः। अनतिक्रामन्नतः स्वादु
फलोपभोगं भेतनदतिक्रमेण स्वादुफलानन्तरग्रहणार्थमगच्छन् सप्तरात्रमेव कुर्वन् शुध्यति। प्राक् पंचनखेभ्यः छर्दनं घृतप्राशनं च। तत्रैवा
भोज्यप्रकरणे पंचनखाश्चाविशल्यकेत्यादिभिरष्टभिः सूत्रैर्यान्यभोज्यानि उक्तानि तेभ्यः प्राक् यान्यभोज्यानि नित्यमभोज्यमित्यादिभि

रसीत्याद्यैः सूत्रैरुक्तानि तेषु भुक्तेषु छर्दयित्वा घृतं प्राश्य शुध्यति। एवं च पूर्वकं प्रायश्चित्तद्वयं भावदुष्टेषु पंचनखादिषु वा भवति स्मृते। अत्र विष्णुः।
मलानामज्ञानां अन्यतमस्य प्राशने चांद्रायणं कुर्यात्। लशुनपलांडुगृंजनतद्गंधविड्वराहग्रामकुक्कुटनरमांसभक्षणे च सर्वेष्वेतेषु द्विजातीनां
प्रायश्चित्तं पुनःसंस्कारः। बृहस्पतिः। अलेह्यानामपेयानामभक्ष्याणां च भक्षणे। रेतोमूत्रपुरीषाणां शुद्धिश्चांद्रायणं स्मृतं। अंगिराः। अले
ह्यानामपेयानामभक्ष्याणां च भक्षणे। रेतोमूत्रपुरीषाणां मृत्तिकाभिर्विशोधनं। पद्मोदुंबरबिल्वानां कुशापर्णपलाशयोः। एतेषामुदकं पी
त्वा त्रिरात्रेणैव विशुध्यति। काश्यपः लशुनपलांडुगृंजनकुक्कुटभक्षणे मद्यभक्तपाने श्रयान्ययाजनेऽभोज्यभोजने अभक्ष्यभक्षणे अगम्या
गमने चैवं प्रायश्चित्तं ब्राह्मणोऽभ्यासनिषेधः षड्रात्रोपोषितश्च। र्णान्ते प्राश्यामुदीच्यादिशि गत्वा यत्र च ग्राम्यपशूनां शब्दो न श्रूयते तस्मिन् दे
शे अक्षीरप्रज्वाल्य ब्रह्मासनमास्तीर्य वत्सत्रीणि नित्यविधिना पुनःसंस्कारमर्हतीति। सुमंतुः। लशुनपलांडुकुंजरगृंजनभक्षणे वीरश्चाद्रसूतिकान्ना
न्यानि मधुमांससूत्रे रेतो मेध्याभक्ष्यभक्षणे सावित्र्याष्टसहस्रेण मूर्ध्नि संपातान्नयेत्। एतान्येव तु तस्याभिषेकक्रियायामप्रति
षिद्धानि भवंति यानि वा न्यान्येवं प्रकाराणि तेष्वपि दोषः। पलांडुं लशुनं चैव कुंजनं कवकं तथा। बलात्यं ज्ञानतो जग्ध्वा तप्तकृच्छ्रं चरेद्द्विजः।
मनुरुक्तः। छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं। पलांडुं गृंजनं चैव मत्या भुक्त्वा पतेद्द्विजः। अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत्। य
तिचांद्रायणं वापि शेषेषूपवसेदहः। संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः। अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः। ज्ञातानपः।

गो०सू०टी०

भ

८८

लशुनपलांडुगृंजनकुसुंभशारकवकामेध्यान्नेष्वैतमेव कृच्छ्रं। विष्णुः। वृंताककवकाशनेसांतपनं। पैठीनसिः। लशुनपलांडुगृंजनभ
क्षणेप्राजापत्यं। देवलः। अभक्ष्यभक्षणे तप्तकृच्छ्रं। संवर्तः। अभोज्यभोजनंकृत्वा ब्रह्मक्षत्रविशांगणः। गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति।
बृहस्पतिः। पीत्वा भुक्त्वा कयाप्यापत्सु त्वाचामं विगर्हितं। ऋग्वेदप्रयुतोविप्रःकर्मणोत्यस्यदधोगतिः। विष्णुः। दधिवर्जितानि सर्वशुक्तानि चात्रप्रा
श्योपवसेदितिप्रकृतं। शंखः। लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा। भुक्त्वाकृच्छ्रीमपक्वं च त्रिरात्रंव्रतीभवेत्। शंखलिखितौ। सर्वासा
मुष्ट्रलीनांक्षीरप्राशने। गावर्जमेतदेव। अन्नपर्युषितभोजने चांद्रायणंचैतिमत्रकृतं। अनिर्दशाहविगोक्षीरप्राशनेतदहरभोजनं सचैलस्नानं च।
शातातपः। उष्ट्रीक्षीरभवीक्षीरमन्नं चम्रातिसूतके। चोरस्त्वान्नं नवश्राद्धं भुक्त्वा चांद्रायणं चरेत्। पैठीनसिः। अविखरोष्ट्रमानुषदुग्धप्राशनेपु
नरुपनयनंप्राजापत्यं च। बौधायनः। अवेःपयःपानेकृच्छ्रोन्यत्रगव्यात्। गविस्त्रिरात्रोपवासः। शंखः। अनिर्दशायागोक्षीरमाजमाहिषमेव च।
गोश्चक्षीरं विवत्सायाः स्यंदिन्याश्च तथा पयः। संधिन्यमेध्यभक्षायाः पीत्वा पक्षव्रतं चरेत्। क्षीराणि यान्यपेयानि तद्विकाराशने बुधः। सप्तरा
त्रव्रतं कुर्याद्यदेतत्परिकीर्तितं। सुमंतुः। एकशफोष्ट्रस्यंदिन्याविस्त्रीक्षीरप्राशनेत्रिरात्रंयावकभिक्षवर्णेन। विष्णुः। गोजाविमाहिषीवर्जं
सर्वपयांसि च तान्यथनिर्दशाहानिस्यंदिनीसंधिनीविवत्साक्षीरं चामेध्यभुजश्च क्षीरंप्राश्योपवसेदितिप्रकृतं। हारीतः। अनुक्तानांसत्वानां
भक्षणेतिकृच्छ्रोग्राम्येचांद्रायणं। यमः। वराहैकशफानां च काककुक्कुटयोस्तथा। क्रव्यादानां च सर्वेषां मभक्ष्याये च कीर्तिताः। मांसमूत्रपु ८८

वासीतेतिदेवदाग्नात्। ×कृच्छ्रे× जपन्सावित्रीमित्युभयत्रसमाने। ब्रह्मचारीग्रहणात् गृहस्थादीनामन्यत् प्रायश्चित्तं। आतमितोः प्राणमायच्छेदित्येक
इत्यापस्तंबीयं गृहस्थस्य। आह वसिष्ठः। वनस्थश्च यतिश्चैव सूर्येणाभ्युदितौ यदि। ब्रह्मकूर्चं त्रिरात्रेणोषित्वा जपेतां द्रुपदां त्वहरिति। अभ्यस्त
मितयोरपी[illegible]दमेव। आह प्रजापतिः। पालाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयं। गृहीत्वा सादयित्वा च ततः कूर्चं समारभेत्। गायत्र्यादाय
गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि। शुक्रमसि ज्योतिरित्याज्यं देवस्य त्वा कुशोदकं। चतुर्दशीमुपो
ष्याथ पौर्णमास्यां समाचरेत्। गोमयाद्विगुणं मूत्रं सर्पिर्दद्याच्चतुर्गुणं। क्षीरमष्टगुणं देयं दधि पंचगुणं तथा। स्थापयित्वाथ दर्भेषु पाला
शैःपत्रकैस्तथा। तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमं। अग्नये चैव सोमाय सावित्र्या चैव मंत्रतः। प्रणवेन तथा हुत्वा स्विष्टकृते च प्र
णवेन तु। एतद्ब्रह्मकृतं कूर्च ——— तथैव च। एवं हुत्वा ततः शेषं पापं ध्यात्वा समाहितः। आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु। एत
द्ब्रह्मकृतं कूर्चं मासि मासि चरेद्द्विजः। सर्वपापविशुद्धात्मा स्वर्गलोकं स गच्छति। यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनां। ब्रह्मकूर्चो दहेत्सर्वं प्र
दीप्ताग्निरिवेंधनं इति। बुद्धिपूर्वे अबुद्धिपूर्वे साधारणमिदं। तथा च मनुः। तं चेदभ्युदियात्सूर्यः शयानं कामकारतः। निम्लोचेद्वाप्यविज्ञानाज्ज
पन्नुपवसेद्दिनं इति। दिनमित्युपलक्षणं। निम्लोचने रात्रिमुपवसेदिति। अभयरोगस्त्विति जाबालिवचनाद्रोगे च प्रायश्चित्तं न भवति।
अशुचिं दृष्ट्वादित्यमीक्षेत प्राणायामं कृत्वा   अशुचिश्वचंडालादिः तं दृष्ट्वा प्राणायामं कृत्वा ×मेकं× सूर्यमीक्षेत। जपादिनियमकालमिदं

॥८२॥

ब्रह्मचर्यं कर्तव्यं । परमहणादेकत्रिरात्रादेरपि लाभः । तत्र ब्राह्मणाक्रोशे त्रिरात्रं क्षत्रिये द्विरात्रं वैश्ये एकरात्रं । शूद्रेहरिति व्यवस्था । अनृते त्वेवं । फलाफ
लाद्यपेक्षया ब्राह्मणादिस्वामिकेषु वृत्तादिषु हिंसायामप्येवं । अत्र प्रजापतिः । अनृते सामपः कुर्यात्त्रिरात्रं परमं तपः । पूर्णाहुतिं वा जुहुयात्समस्तं अम्
इत्यृचेति । अनृताक्रोशष्ठीवने चरं तत्स्पर्शने एव च । पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेदिति । इदं परिहासादिनिमित्तानृतविषयं । हारीतः । प्रत्या
ख्यात्यानृतं ब्रूयान्मिथ्यासत्यमथापि वा । स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणं व्रतमिति । प्रजापतिः । मांसं भुक्त्वा ब्रह्मचारी पुनः संस्कारमर्हति । अभ्यास
ऐंदवं चैव नैष्ठिको द्विगुणं चरेत् । वानस्थस्त्रिगुणं कुर्याद्यतिः कुर्याच्चतुर्गुणं । मांसस्थानेनृतोक्तौ चेशवानिहरणं तथेति । आक्रोशे विशेषः । सत्यवाक्य
वारुणीमानवीभिर्होमः । आक्रोशे सत्यवाक्ये सति वारुणीभिर्मानवीभिश्चाज्यहोमः कर्तव्यः । त्रिरात्रपरममित्ययमेव । यत्किंचेदमिमं मे वरुणतत्त्वा
यामि त्वन्नो हेडइति वारुण्यः । अग्निरक्षस्तु पुरा हि तइत्यारभ्याध्यायपरिसमाप्तेर्मानव्यः । चत्वारएकोनषष्टिर्मनुदृष्टिः । तास्त्वंत्यास्त्वतसोमक्षूदेवव्रतइत्या
द्यास्तैत्तिरीयके सोमारौद्रीयामिष्टौ धाय्यास्तेन विनियुक्ताः । असावीदित्यादिः इत्यस्मिन्ननुवाके मानवीकं चौ धाय्ये कुर्यादिति । सूत्रकारेणाह । मानवीकं चे ॥८२॥
धाय्येनमक्षूदेवव्रतइत्येतासां द्वे इति । तत्रात्याभिरासिस्त्वतस्रीभिर्हेमिद्येके । अन्ये तु ऋग्वेदपवित्राभिः सर्वाभिर्भरिति । विवाहमैथुननर्मार्तसंयो
गेष्वदोषमेकेनृतं । विवाहकाले कन्यावरयोरन्यपिगुणेषु कथितेष्विदं तेदास्यामीति प्रतिश्रुत्याप्रदाने च न दोषः । तत्कामैथुनसंयोगे इदं ते दास्यामी

त्युक्त्वा मैथुने कृते तस्यादानेपि न दोषः । नर्मपरिहासः । तत्संयोगेनृतवचनेन दोषः । तद्यथा । भोक्ष्यामं गृहमागतं श्यालादिकं प्रत्युच्यते । एहि मन्ये ओदनं
भोक्ष्यसे न हि भोक्ष्यसे भुक्तः सोतिथिरित्येवं प्राप्तं । आर्तसंयोगे आर्तस्य दुःखोपशमायानृतवचनेन दोषः । तेनैतेषु निमित्तेष्वनृतवचने प्रायश्चित्त
मिति । ननु खलु गुर्वर्थेषु । गुरुप्रयोजनेषु विवाहादिषु अप्यनृतं न वक्तव्यं । कस्मात् । यतः । सप्त पुरुषानितश्च परतश्च हन्ति मनसापि गुरोरनृतं वद
न्नल्पेष्वप्यर्थेषु । इत इत्यात्मानं निर्दिशति । आत्मानमारभ्य सप्तपुरुषान्पुत्रपौत्रादीन् परतश्च सप्तपुरुषान् पितृपितामहादीन् हन्ति पीड
यति । पापेन योजयतीति । मनसापि गुरोरनृतं चिंतयन्नल्पेष्वपि प्रयोजनेषु किमंग महत्सु वा चो वहन्निति । अंतावसायिनीगमने कृच्छ्राब्दः । अंताव
सायिनीनां गमने मैथुनाचरणे कृच्छ्राब्दः । प्रायश्चित्तं संवत्सरं प्राजापत्यविधिनावस्थानं । बुद्धिपूर्वमिदं । अमत्या द्वादशरात्रः । कृच्छ्रप्रकृते द्वादशरा
त्रग्रहणं परोकोपसंग्रहार्थं । तथा च । अंत्यजानां तु गमने भोजने च प्रमापणे । पराकेण विशुद्धिः स्याद्भगवानंगिराब्रवीति । इदमपि रेतःसेकात्प्रागे
वा परतस्य । ऊर्ध्वं तु यावत्सिक्तं । द्वादशरात्रमब्भक्षो द्वादशरात्रमुपवसेदश्वमेधावभृथं वा गच्छेदेतेन चंडालीव्यवायो व्याख्यातइति । उदक्यागम
उदक्यागमने त्रिरात्रः । उदक्यागमने सति ब्रह्मचर्याज्ञानादिना प्रायश्चित्तेन त्रिरात्रो गमयितव्यः । बुद्धिपूर्वं सकृद्गमन इदं । अभ्यासे मानवं ।
अमानुषीषु गोवर्जं उदक्यागमनयोनिषु रेतःसिक्त्वा जलेनैव कृच्छ्रं सांतपनं चरेदिति । अबुद्धिपूर्वं सकृद्गमने त्रिरात्रं तपोकं । अनुदकमूत्रपुरीषकरणे

अथकाकस्पर्शने सचेलस्नानं महाव्याहृतिभिर्होमश्च। एवं जलागमनेऽप्येवमिति। अभ्यासे वासिष्ठं। रजस्वलागमने शुक्लमृषभं दद्यात् स्थूललिंगमिति॥ ॥छ॥
इति मिताक्षरायां त्रयोविंशोऽध्यायः॥ ॥२३॥ ॥रहस्यं प्रायश्चित्तं वक्ष्यते। रहस्यं प्रायश्चित्तम् अविख्यातदोषस्य। यस्य पापस्य दोषः परैर्न विख्यात
॥९०॥ स्तस्य प्रायश्चित्तं रहस्यं भवति। यथा। परैर्न विज्ञायते तथा कर्तव्यमिति। यावता ये विनाय्य पातकं कर्तुं न शक्यते तद्व्यतिरिक्तैर्ज्ञानं निषिध्यते। तेन
पारदार्यमपि न तत्संवासे चेतेऽज्ञात्वापि वक्ष्यमाणं भवत्येव। चतुर्ऋचं तरत्समंदीत्यप्सु जपेदप्रतिग्राह्यं प्रतिजिघृक्षन् प्रतिगृह्य वा। जातिदुष्टस्य वा कर्म
दुष्टस्य वा पुरुषस्य स्वयमभूतं स्वयं दुष्टं च कृष्णाजिनाद्यप्रतिग्राह्यं गत्यभावात् प्रतिजिघृक्षन् प्रतिग्रहीतुमिच्छंस्तरत्समंदीधावतीति चतुर्ऋचं सूक्तम
प्सु जपेत्। नाभिदघ्ने जले स्थित इत्येके। निमग्न इत्यन्ये। प्रतिगृह्य वा अप्रतिग्राह्यं तत्पश्चाद्वा जपेदेवं। तुल्यवद्विकल्पः। अन्ये प्रतिग्रहात्पूर्वमेवाप्रतिग्रा
ह्यमिति ज्ञाते प्राग्जपः। पश्चाज्ज्ञाते पश्चाज्जप इति। अत्र मनुः। प्रतिग्राह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं। जपंस्तरत्समंदीयं मुच्यते मानवस्त्र्यहात्। इ
ति। प्रजापतिः। जपादिपूरणं कुर्यात्तस्यान्तं दोषाद्विनोत्तम। रहःकृतस्य दोषस्य तत्रैवाभ्यसेत्तथेति। इदमभ्यासविषयं। अभोज्यं बुभुक्षमाणः पृथि ॥९०॥
वीमावपेत्। नित्यमभोज्यं केशकीटावपन्नमित्युक्तं यादृगत्यभावेन दवभाक्तमिच्छति तदा पृथिवीमावपेत्। मृदं प्रतिक्षिपेत्ततो भुंजीत। ऋतुसंवरारमण
उदकोपस्पर्शनाच्छुद्धिमेके। ऋतुमध्ये आरमतोऽउदक्यागमने उदकोपस्पर्शनात् सचेलस्नानाच्छुद्धिमाहुरेके। उदक्यागमने त्रिरात्रमिति प्रकारविषयं।

शिवादिप्राश्य गोमांसमेव च। श्वगोमायुकपीनां च तन्मत्रकृच्छ्रं विशोधनं। उपोष्य द्वादशाहं वा कूष्माण्डैर्जुहुयाद्घृतं। वसिष्ठश्च कुक्कुटग्राम्यसूकरका
कगृध्रमांसवायसपारावतमानुषकाकोलूकानां मांसादने सप्तरात्रमुपवासो निष्पुरीषीभावो घृतप्राशनं पुनः संस्कारश्च कार्यः। बिडालकाकाखु
च्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां। विष्णुः। केशकीटावपन्नं च स्त्रीभिः खादं तथैव च। श्वोदक्याभ्यां च संस्पृष्टं प
क्वं येन न शुध्यति। यमः। माक्षिकं फाणितं शाकं गोरसं लवणं घृतं। एतानि हस्तदत्तानि भुक्त्वा शान्तपनं चरेत्। एकपंक्त्युपविष्टानां विप्राणां यः
प्रयच्छति। यश्चैवाश्नात्ययं सर्वः कुर्याद्ब्रह्मर्षिणं व्रतं। यमः। ब्राह्मणक्षत्रियविशां शूद्राणां सहभोजनं। प्राजापत्यं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च॥
चान्द्रायणमिति प्रोक्तं प्रायश्चित्तं क्रमेण तु। शातातपः। यो गृही वा विभावाग्निं गृहस्थमिति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः॥
मिथ्यापाकस्य भुक्त्वान्नं प्रायश्चित्तं चरेद्द्विजः। प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यतीति। अंगिराः। ब्रह्मक्षत्रविशां भुक्त्वान्नादौ पात्य
हारिणां। सूतके शावआशौचे अस्थिसंचयनात्परं। चंडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैते व्यावसायिनः। अन्त्या
वसायिनामन्नं अश्नीयाद्यस्तु कामतः। स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा। यमः। ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। उभावे
तावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्। आक्रोशानृतहिंसासु त्रिरात्रं च परं तपः। महापातकोपपातकयुक्तादन्यत्राक्रोशेऽयमन्त्रः। सत्यवाददोषेण
तिवादे साक्ष्यादिविषयादन्यत्रानृते। तत्रोक्तत्वात्। प्राणिभ्योऽन्यत्र हिंसायां प्राणिषूक्तत्वात्। एतेषु निमित्तेषु परमं तपः परमणत्रिरात्रमनशनं

तुर्षु ब्रह्महत्यादिषु पापेषु प्रायश्चित्तं कुर्यात्। प्राणायामैस्तान्तो न मृतः यावद्भिः प्राणायामैस्तान्तो भवति तावद्भिः। कुर्यादघमर्षणं। अघमर्षणेनोक्तेन
ऋग्भूतं च सत्यं चेत्यादिकमघमर्षणं। तत्राश्वमेधावभृथेन समं तुल्यं। जपन्निति वर्तमानप्रयोगेणात्र सहस्रमेव त्रिरह्नस्त्रिरात्रं तत्कुर्यात्। अत्र मनुः। यथा
अश्वमेधः क्रतुराट् सर्वपापप्रणाशनः। तथाघमर्षणं सूक्तं सर्वपापप्रणाशनं। सावित्रीं वा सहस्रकृत्व आवर्तयन्पुनीते हैवात्मानं। तद्व्रत एवेत्यनुवर्तते।
प्राणायामैस्तान्तोऽत्रेति च। सावित्रीसहस्रकृत्व आवर्तयन्निति जपमात्रं विधीयते। अन्यत्समानं। एवं कुर्वन्नात्मानं पुनीते। ब्रह्महत्यादिभ्यश्चतुर्भ्यः
अन्यत्र [illegible] इति हेतिप्रसिद्धौ। एवेत्यवधारणे। ततश्चान्येष्वपि पापेषु सावित्र्यभ्यासः शुद्धिहेतुः। तथा च वसिष्ठः। सहस्रपरमां देवीं शतमध्यां दशावरां।
शुद्धिकामः प्रयुञ्जीत सर्वपापेष्वपि स्थित इति। व्याघ्रोऽप्याह। न सावित्रीसमं जप्यं न व्याहृतिसमं हुतं। नान्नतोयसमं दानं न चाहिंसासमं तप इति। प्राय
श्चित्तांतरमाह। अन्तर्जले वाघमर्षणं त्रिरावर्तयन्सर्वपापेभ्यो विमुच्यते सर्वपापेभ्यः। ऐन्दुव्रत एवोदकस्थस्तन्निमग्नशिराः स्नात्वाघमर्षणं त्रिरभ्य
स्य सर्वस्मात्पापात् ज्ञानकृतादज्ञानकृताच्च मुच्यते। द्विरुक्तिश्च व्याख्याता॥ ७॥ ॥ त ॥ इति मिताक्षरायां चतुर्विंशोऽध्यायः॥ २४॥ ॥ उक्तानि महा
पातकेषु रहस्यप्रायश्चित्तानि। अथोपपातकेषु वक्तव्यानि प्रथममवकीर्णिनः। प्रायश्चित्तं वक्तुं तस्य निन्दातिशयं प्रदर्शनाय श्रुतिमुदाहरति तदाहुः।
कतिधावकीर्णी प्रविशतीति। तदिति वा [illegible] प्युपन्यासे। कतिधावकीर्णी कतिभिः प्रकारैः किं किं प्रविशतीति ब्रह्मवादिन आहुः। अत्रोत्तरं। मरुतः प्राणे
नेन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेणेति। प्राणेन पञ्चदशिना मरुतो वायून्प्रविशति। इन्द्रं बलेन प्रविशति। बृहस्पतिं स्वाध्यायसंपत्तं ब्रह्मवर्च

सं तेन बृहस्पतिं। इतरेण सर्वेण चक्षुरादिनेन्द्रियवर्गेणाग्निमेव प्रविशति। एवमसावायुर्निर्हत्वाहो ब्रह्मवर्चसहीनश्चक्षुरादिहीनश्चावकीर्णी भवति।
अतश्चरितव्यं प्रायश्चित्तं। तदिदानीमाह। सोऽमावास्यायां निश्यग्निमुपसमाधाय प्रायश्चित्ताज्याहुती जुहोति। सोऽवकीर्णी अमावास्यायां नि
श्यर्धरात्रे गृह्योक्तेन मार्गेणाग्निं प्रतिष्ठाप्योपसमाधायाज्यभागान्ते प्रायश्चित्तरूपा आज्याहुती जुहोति। तत्र मन्त्रौ। कामावकीर्णोऽस्म्यवकीर्णोऽस्मि
कामकामाय स्वाहा। कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहेति। समिधमाधायानुपर्युक्ष्य यज्ञवास्तु कृत्वोपोत्थाय समासिञ्चेति त्वेतया
त्रिरुपतिष्ठेत। होमान्ते एकां समिधं तूष्णीमाधायादितेऽन्वमंस्था इत्यादिभिरग्निमनुपर्युक्षति। ततो यज्ञवास्तु करोति। अत्र छन्दोगानां गृह्ये स्विष्टकृ
तोऽनन्तरं पर्युक्षणात्समिधमाधाय दर्भानाज्ये हविषि वा त्रिरवधाय मध्यमूलान्यक्तं रिहाणा वियन्तु वय इत्यभ्युक्ष्याग्नावनुप्रहरेद्यः पशूनामधि
पतिः रुद्रस्तन्तिचरो वृषा। पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहेति। तद्यज्ञवास्तु सर्वत्र कुर्यादिति। तदेतद्यज्ञवास्तु कृत्वोपोत्थायायमिति
मीपस्ति त्वा सं मा सिञ्चन्त्वित्येतयर्चा त्रिरग्निमुपतिष्ठेत। त्रिरुपस्थानस्यार्थवादः। त्रय इमे लोका एषां लोकानामभिजित्या अभिक्रान्त्या इति त्रयो
लोका भूर्भुवः स्वरिति। तेषामभिजितिर्योग्यतापादनं। अभिक्रान्तिस्तत्रैवाधिपत्येनाधिष्ठायावस्थानं। तदर्थमेवं कर्तव्यमिति संबन्धः। एतदेवै
केषां कर्माधिकृत्य योऽपूत इव स्यात्। स इदं संमुहुर्यादित्यनुमन्त्रयेत वरो दक्षिणेति प्रायश्चित्तमविशेषात्। योऽपूत इव स्यादन्योऽपि यस्त्वात्मानमपूतमि
व मन्यते न केवलमवकीर्णी सोऽप्येतदेवेति कर्माधिकृत्य इदं संमुहुर्यादित्यनुमन्त्रयेत होमानुपस्थानं चैव कुर्यात्। वरो दक्षिणा गौर्वै वरः सा स्वयं

कर्तृकत्वाद्ब्राह्मणे देयाऽकृतिश्चवत्गौः। विशेषादे विशेषेण सर्वेषामुपपातकिनामिदं प्रायश्चित्तमित्येकेषां मतं। अनार्जवपैशुनप्रतिषिद्धाचारान्न
न्नाद्यप्राशनेषु शूद्रायां चरेतः सिक्त्वाऽयोनौ च दोषवति च कर्मण्यभिसंधिपूर्वेऽब्लिंगाभिरुपस्पृश्य वारुणीभिरन्यैर्वा पवित्रैः। अनार्जवं शा
ठ्यं पैशुन्यं परदोषसूचनं। प्रतिषिद्धाचारो निषिद्धानुष्ठानं। अनाद्यमभक्ष्यं तस्य प्राशनं एतेषु शूद्रायां रेतः सिक्त्वा अयोनौ वास्यादिषु च्छेषुवा
रेतः सिक्त्वा दोषवति कर्मणि परपीडात्मके स्तेयात्मके वाभिसंधिपूर्वे बुद्धिपूर्वे। आपस्त्वाष्टाद्यबुद्धिपूर्वे विहृते अब्लिंगाभिरापो हि ष्ठा मयोभुव
इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिर्वारुणीभिर्यत्किंचेदमिमं वरुण तत्त्वायामि अव ते हेड इत्येताभिरन्यैर्वा पवित्रैः पवमानः
सुवर्जन इत्यादिभिरुपस्पृशेत् पूर्ववस्त्रालापश्चादं तिलिनामृध्रिमंत्रैर तेष्वपः क्षिपेत्। यद्यप्यनाद्यप्राशनमपि प्रतिषिद्धाचारस्तथापि पृथगु
पादानेषु बहुभिर्मार्जनमन्नाद्यप्राशनेन यथासंभवं द्रष्टव्यं। प्रतिषिद्धवाङ्मनसाचारे व्याहृतयः पंच। प्रतिषिद्धविषययोर्वाङ्मनसयोरपचारः कु
त्सिताप्रवृत्तिस्तत्र व्याहृतयः पंच जप्याः। भूराद्याः सत्यांताः। प्रथमेऽध्याये उक्ताः। वाङ्मनसोरिंद्रियाणामभ्यंतरत्वात्। अचतुरः समासांतविधिप्रसं
गात्। प्रतिषिद्धग्रहणस्य चतुरन्वयात्। सर्वास्वपो वा आचामेदहश्च मादित्यश्च पुनात्विति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायं। सर्वासु पापकृ ॥९२॥
यासु अनार्जवादिष्वाभ्यां मंत्राभ्यामपोऽभिमंत्र्याचामेदहश्चेति प्रातः। पिबेद्रात्रिश्चेति सायं पिबेत्। अष्टौ वा समिधमादध्याद्देवकृतस्येति। कुलेवस
र्वस्मादेनसो मुच्यते। अथवा देवकृतस्येत्यादिभिर्मंत्रैरष्टौ समिधमादध्याज्जुहुयात्। उक्तेवं सर्वस्मादेनसो न केवलमनार्जवादिभ्यः किंस्या

एकेग्रहणं परत्रापि संबध्यते। एकस्त्रीषु एके मन्यंते स्त्रीषूदकोपस्पर्शनमन्यत्र त्रिरात्रं मन्यंते। अपर आह। अस्त्रीषु वडवायां स्वपि गोवर्जं मैथुनमास
रितं उदकोपस्पर्शनाच्छुद्धिं मन्यंत इत्येके। अथ ब्राह्मणविधेः रहस्यं। पयोव्रतो वा दशरात्रं घृतेन द्वितीयमद्भिस्तृतीयं दिवादिष्वेकभक्तिको जलक्लिन्नवासा
लोमा। [illegible]नानि नखानि त्वचं मांसं शोणितं स्नाय्वस्थि मज्जानमिति होमा आत्मनो मुखे मृत्योरास्ये जुहोमीत्यंततः सर्वेषां प्रायश्चित्तानां भ्रूणहत्यामाः।
भ्रूणहत्या ब्रह्महत्या तस्याः प्रायश्चित्तमिदमुच्यते। आदित एकं दशरात्रं पयोव्रतः क्षीराहारः स्यात्। द्वितीयं दशरात्रं घृतेन वर्तयेत्। तृतीयमद्भिः वेतरद्
धविष्यभोजनो वा। शक्तितो विकल्पः। एतेषु दिवसेष्वेकभक्तिकः पयः प्रभृति कमपि पूर्वेक्तं सकृदेवोपयुंजीत। कदाचिदित्यादिषु प्रातःकाले पुनः सायं न
मध्याह्ने। जलक्लिन्नवासा एषु दिवसेष्वार्द्रवासाश्च स्यात्। तथा होमाश्चाष्टौ प्रत्यहमाज्येन कर्तव्याः। तत्र मंत्राः। लोमानि नखानि त्वचं मांसं शोणितं स्ना
य्ववस्थि मज्जानमिति तेषां सर्वेषामात्मनो मुखे मृत्योरास्ये जुहोमि स्वाहा इत्येते प्रयोक्तव्याः। जुहोमीति चोदनात् स्वाहाकारप्रदानादिति वचनात्। तद्यथा।
लोमान्यात्मनो मुखे मृत्योरास्ये जुहोमि स्वाहा नखान्यात्मनो मुखे मृत्योरास्ये जुहोमि स्वाहेत्येवं प्रकारा होमाः। अथान्यत्। अथ भ्रूणहत्याया एव वा
न्यत्प्रायश्चित्तमुच्यते। उक्तो नियमः। पयोव्रतो वेत्यादिर्वक्ष्यमाणोऽपि वेदितव्यः। अग्नेः संपारयेति महाव्याहृतिभिः जुहुयात् कूष्मांडैर्वाज्यं। अ
ग्नेः संपारयेतास्तु महाव्याहृतिभिः भूरादिभिः कूष्मांडैर्यद्देवा देवहेडनमित्यादिभिश्च व्युत्क्रमेण सकृदाज्यं जुहुयात्। तद्व्रत एव वा ब्रह्महत्यासुरापा
नस्तेयगुरुतल्पेषु प्राणायामैः स्नातोऽघमर्षणं जपेत्। सममश्वमेधावभृथेन। इदं च प्रायश्चित्तं तद्व्रत एव वा तेनैव पयोव्रतेत्यादिना व्रतेनोपेतश्च

वसिष्ठेनप्रकारांतरमपिदर्शितं।अहःप्रातरहर्नक्तमहरेकमयाचितं।अहश्चोपवसेदेवमेवंचतुरहोपरो।अनुग्रहार्थंविप्राणांमनुर्धर्मभृतांवरः।बाल
वृद्धातुराणांचशैशुकोक्तमुवाचहेति।भरद्वाजः।प्राजापत्यंचरन्विप्रोयथाशक्त्यादिनेदिने।विप्रानुपंचवरान्सम्यग्भोजयेत्सम्यगर्चितान्।
अस्मिन्दिनेअशक्तिस्तत्रैवदिनांतरेषुपूर्ववत्।तत्राथशक्तोब्राह्मणभोजनमुपवासदिनेष्वशक्तोब्राह्मणभोजनंदत्वाहविष्यान्नंसम्यक्भुंजीत।
अथकृच्छ्रस्यगुणविधिः।तिष्ठेदहनिरात्रावासीतक्षिप्रकामः।यःकामयेतक्षिप्रंश्रेयामितिसतिष्ठेन्नेवाह्नयेतभोजनाद्यविरोधेन।रात्रावासीत
चापाप्यासीनस्यैव।वासिष्ठमुक्तं।क्षिप्रकामस्यप्रकारांतरमाह।अथचेत्त्वरतेकर्तुंदिवसंमारुताशनः।रात्रौसत्यांजलेतिष्ठेत्तुप्राजापत्येनतत्समं।
साविव्यष्टसहस्रंतुजप्यंकृत्वोभितरवौ।मुच्यतेपातकैःसर्वैर्यदिनभ्रूणहाभवेदिति।सत्यंवदेत्।सत्यंयथादृष्टंविवाहादिविषयेपिसत्यमेवव
देत्।अनार्यैर्नसंभाषेत।द्विजातिव्यतिरिक्तैःलिंगस्याविवक्षितत्वात्स्त्रीभिरपिनसंभाषेत।रौरवयौधाजयेनित्यंप्रयुंजीत।रौरवयौधाजयेसा
मनीपुनानःसोमधारयेत्यस्यामृचिगीतेनित्यंप्रत्यहंप्रयुंजीतगायेत्।अपरआह।नित्यंपुनःपुनःप्रयुंजीतेति।अनुसवनमुदकोपस्पर्शनं
आपोहिष्ठेतितिसृभिःपवित्रवतीभिर्मार्जयीत हिरण्यवर्णाःशुचयःपावकाइत्यष्टाभिःउदकोपस्पर्शनंस्नानं।तदनुसवनंत्रिषुसवनेषु ॥९३॥
कर्तव्यंतदनंतरंचमार्जनमापोहिष्ठेत्यादिभिःपवमानःसुवर्जनइत्यनुवाकेयाऋचस्ताःपवित्रवत्योलिंगसमवायात्।ताभिस्त्वेतत्तैत्तिरीयकेपंचम

कांडेषष्ठेप्रश्नेहिरण्यवर्णाःशुचयःपावकाइत्याद्याऋचःपठ्यंतेताःस्त्रा भवंति।तत्राष्टाभिः।यदिदुरा।रवानरेदधिरस्त्रावेवपठयंते।ततस्ताएवग्राह्याः।अ
थोदकतर्पणं।अथमार्जनानंतरमुदकेनतर्पणंकर्तव्यं।तत्रमंत्राः।नमोहमायमोहमायमंहमायधून्वते।तापसायपुनर्वसवेनमः।नमोमौज्यायौर्व्यायव
सुविंदायसर्वविंदायनमः।नमःपारायसुपारायमहापारायपारयिष्णवेनमः।नमोरुद्रायपशुपतयेमहतेदेवायत्र्यंबकायैकचरायाधिपतयेहरयेशर्वायेशा
नायोग्रायवज्रिणेघृणिनेकपर्दिनेनमः।नमःसूर्यायादित्यायनमः।नमोनीलग्रीवायशितिकंठायनमः।नमःकृष्णायपिंगलायनमः।नमोज्येष्ठाय
श्रेष्ठायवृद्धायेंद्रायहरिकेशायोर्ध्वरेतसेनमः।नमःसत्यायपावकायपावकवर्णायकामायकामरूपिणेनमः।नमोदीप्तायदीप्तरूपिणेनमः।नमस्तीक्ष्णा
यतीक्ष्णरूपिणेनमः।नमःसौम्यायसुपुरुषायमहापुरुषायमध्यमपुरुषायोत्तमपुरुषायब्रह्मचारिणेनमः।नमश्चंद्रललाटायकृत्तिवाससेनमः।निय
मकामंत्राः।एताएवाज्याहुतयइतिबहुवचननिर्देशात्।किंतर्हित्रयोदशैतेमंत्रानमस्कारादयोनमस्कारांताश्च।सर्वत्रप्रथमंचतुर्थ्यंतानिषट्देव
स्यनामानि।द्वितीयंचत्वारि।तथातृतीयंचतुर्थंत्रयोदश।महतेदेवायेतिमहादेवपदमेवव्यक्तमुक्तं।पंचमादिषुत्रिषुद्वेद्वे।अष्टमेषट्।नवमंपंच।दशमे
द्वे।तथैकादशद्वादशेषट्।त्रयोदशेद्वेइतिषट्पंचाशद्देवस्यनामानि।एतैर्मंत्रैस्तर्पणमनुसवनं।एतदेषामादित्योपस्थानं।आदित्यउपस्थीयतेयेन
तदादित्योपस्थानं।एतेनरुद्ररूपेणादित्यमुपतिष्ठेदित्युक्तंभवति।एतदप्यनुसवनं।प्रत्यहंसकृदित्यन्येपृथग्योगकरणात्।अन्यथाथोदकत
र्पणमादित्योपस्थानंचेत्येकमेवयोगमकरिष्यत्।एताएवाज्याहुतयः।मंत्रमपिपरामृशन्नाह।एतेनहुत्वाहुतिसामानाधिकरण्यात्स्त्रीलिंगता।एते

एवत्रयोदशभिर्मंत्रैराज्यमपि होतव्यमित्युक्तं भवति। तत्र जुहोति चोदनाः स्वाहाकारप्रदाना इति। स्वाहाकारांतैर्होमः प्रत्यहं मंत्रैः कर्तव्यः। द्वादशरात्र
स्यांते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयात्॥ एवमुक्तेन प्रकारेण द्वादशरात्रं नीत्वा तदंते त्रयोदशेऽहनि गृह्योक्तेन मार्गेण चरुं श्रपयित्वै
ताभ्यो वक्ष्यमाणाभ्यो देवताभ्यो जुहुयात्॥ ता आह॥ अग्नये स्वाहा सोमाय स्वाहा अग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे
प्रजापतयेऽग्नये स्विष्टकृत इति॥ स्विष्टकृता सह नवाहुतयः॥ द्विः स्वाहाकारपाठोऽनुषंगप्रकारप्रदर्शनार्थः। सर्व एव स्वाहाकारांताः। ततो ब्राह्म
णतर्पणं। ततो होमानंतरं ब्राह्मणास्तर्पयितव्याः। भोजनादिभिः शुचीन्मंत्रवतः सर्वकृत्येषु भोजयेदित्यापस्तंबः॥ एतेनैवातिकृच्छ्रो व्याख्यातः।
स्पष्टं। यस्त्वस्य विशेषस्तमाह॥ यावत्सकृदाददीत तावदश्नीयात्॥ एकेन पाणिना यावत्सकृदादातुं शक्नुयात्। हविष्यं दिवा नक्तमयाचि
तमुपवास इति विशेषाः स्थिता एव। अत्र मनुः। एकैकं ग्रासमश्नीयाद्दिनानि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विज इति। अब्भक्षस्तृ
तीयः स कृच्छ्रातिकृच्छ्रः॥ पूर्वोक्तेष्वेव भोजनकालेषु केवलमुदकमेवापिबेत् स एष तृतीयः कृच्छ्रातिकृच्छ्रो नाम वेदितव्यः। अत्रोपवासदिनेष्वाचम
नव्यतिरेकेणोदकपानमपि न भवति। त एते कृच्छ्रा उक्ताः। तेषु प्रथमं चरित्वा शुचिः पूतः कर्मण्यो भवति। प्रथमं प्राजापत्यं चरित्वा शुचिः॥ सध्या ॥९४॥
हीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्वित्यादिना विहिताकरणनिमित्तदोषेण हीनः पूतः प्रतिषिद्धाचरणजन्येनाधर्मेण रहितः। कर्मण्यः क
र्मसु योग्यश्च भवति। कर्मण्य इति वचनादप्रज्ञातदोषस्यापि कृच्छ्रानुष्ठानाद्देवादिषु कर्मसु योग्यतेति ज्ञाप्यते। द्वितीयं चरित्वा यत्किंचिदन्यत्

मपाननादेनसो मुच्यते। अस्य होमस्य मुख्यत्वप्रदर्शनार्थ एवकारः। जुह्वेवान्यस्त्वेति॥ ततश्च सति संभवे इदमेव ज्यायः। देवकृतस्यैनसोऽवयजनमसि
स्वाहेत्यादयोऽष्टौ मंत्राः॥ ॥इति मिताक्षरायां पंचविंशोऽध्यायः॥२५॥ ॥कृच्छ्रातिकृच्छ्रौ चांद्रायणमित्युक्तं तत्र क्रमेण कृच्छ्रादिस्वरूपमाह॥ अथातः कृ
च्छ्रान्व्याख्यास्यामः॥ अथशब्दोऽधिकारार्थः। अतःशब्दो हेतौ। यतः एतेऽव्याख्याता न ज्ञायंते कर्तुं अतः कृच्छ्रान्व्याख्यास्याम इति। हविष्यान्प्रातराशान्
भुक्त्वा तिस्रो रात्रीर्नाश्नीयात्। यज्ञियैर्वरकादिव्यतिरिक्तैर्निष्पादितान्घृतादिसंयुक्तान्क्षारलवणवर्जितान्प्रातराशान् अश्नीयात् इत्याद्या ग्रासाः दिवा
भोज्यान्ग्रासान्भुक्त्वा अथापरं त्र्यहमिति वक्ष्यमाणत्वादत्रापि त्र्यहमिति गम्यते। तिस्रो रात्रीर्नाश्नीयादिति तस्मिंस्त्र्यहे रात्रौ भोजनप्रतिषेधः। कृत्यनुसा
रेण कृतः पुनरयं कर्तव्यः। कथं। सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितमिति परिसंख्यानाद्दिवा भोजनं प्राप्तं तत्र प्रातराशान्भुक्त्वेत्यप्यपरिसंख्याना
त्तिस्रो रात्रीर्नाश्नीयादिति निवृत्तिर्यतो ततश्च दिवाभोजननिवृत्तिः। अथापरं त्र्यहं नक्तं भुंजीत। एवं दिवा हविष्यभोजनेन त्र्यहं नीत्वानंतरं त्र्यहं नक्तमेव भुंजीत हवि
ष्यानित्येव। अथापरं त्र्यहं न कंचन याचेत। अथ नक्तभोजनत्र्यहानंतरमपरं त्र्यहं न कंचन बंधुमपि न याचेत। याञ्चाप्रतिषेधोऽयमदृष्टार्थः। अयाचित
लब्धस्याप्रतिषेधः। एवमुक्ते हविष्यनियमं न प्राप्नोति कालविशेषोऽश्रवणाद्[redacted] भोजनं प्राप्नोति। न याचेतेत्यत्रापि हविष्यानित्येवानुवर्तते। अ
याचितलब्धेऽपि सकृद्दिवसे भुंक्त। अथापरमिति वचनस्य पूर्वेण साहचर्यार्थत्वात्। तेन दिवा न नक्तं यथोक्तं। अन्ये तु त्र्यहमयाचितव्रत इत्यापस्तंबीयदर्शनात्
अयाचितलब्धेन त्र्यहे रात्रौ न स्वद्रव्येणापि अयाचितलब्धेनेति वर्णयंति। अनुष्ठानमप्येवमेव। अथापरं त्र्यहमुपवसेत्। स्पष्टं। एवमयं द्वादशाहसाध्यः कृच्छ्रः

मुपस्थानं च समुच्चयेन। कृच्छ्र विध्यभिहितं गायत्र्या द्वितीयमुदकतर्पणादयः प्राप्तास्तेषां च समुच्चय इत्येके। उपदेष्टैरनिर्दिष्टानां बाध इत्यन्ये। यद्देवा देवहेडन
मिति चतसृभिर्जुहुयात्। यद्देवा देवहेडनमित्यनुवाके आदितश्चतसृभिः ऋग्भिरनादेशादाज्यं जुहुयात्। पूर्वाभिस्तिसृभिश्चेति समाज्याहुतयः।
देवकृतस्येति चांते समिद्भिः। आज्यहोमांते देवकृतस्येत्यादिभिः पूर्वोक्तैरष्टाभिर्मंत्रैः कर्तव्यः। उपदेशक्रमादेव सिद्धेंत ग्रहणं प्राप्तानुवादः। अन्ये तु
पुनश्चांद्रायणं तदिति। व्याचक्षते। तेषां च राष्ट्रेनुसंगच्छते। ॐ भूर्भुवः स्वर्महः स्तपः सत्यं यशः श्रीरूर्ग्विडोजस्तेजो धर्मः पुरुषो धर्म शिर इत्येते
ग्रासानुमंत्रणं प्रतिमंत्रं मनसा। प्रणवादयः पंचदशमंत्रास्तेषामेकैकेन मंत्रेणैकैकस्य ग्रा मस्य मनसानुमंत्रणं कर्तव्यं। अनुमंत्रणक्रमेण भो
जनं। यदा तु न्यूना ग्रासास्तदा यावद्ग्रासं आदितो मंत्रा ग्राह्याः शेषं तत्ता लुप्यंते। भोजनमंत्राः ततश्च प्राणाहुतिमंत्राणामनुवृत्तिः। यदा च त्वारो ग्रासा
स्तदा द्वाभ्यां पूर्वं यदा त्रयो द्वाभ्यां द्वाभ्यां पूर्वौ यदा द्वौ द्वाभ्यां पूर्वमुत्तर त्रिभिः सर्वैरेकं त्वविषश्चानुमंत्रणमिति पूर्वोक्तमिह तु ग्रासानुमंत्रणमिति प्रा
णाहुतिमंत्राश्चेत्स्थिताः। तत्र प्रयोगः सर्वं भोज्यं पात्रे निधायाप्यायस्वेत्यादिभिरनुमंत्र्य ग्रासान् कृत्वा प्रणवादिभिः क्रमेणानुमंत्र्य प्राणाहुतीः कृत्वा
प्राश्नीयादिति। नमः स्वाहेति वा सर्वान्। अथवा सर्वानेव ग्रासान् नमः स्वाहेत्यनुमंत्रयेत्। नमः स्वाहेत्यनयोर्विकल्पः। समुच्चितो मंत्र इत्यन्ये। ग्रासप्रमा ॥९५॥
णमास्याविकारेण। यावत्प्रमाणो ग्रासो ग्रस्यमाने आस्यमविकृतं भवति। तावत्स्य प्रमाणं। चरुभैक्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलो
दकानि हवींष्युत्तरोत्तरं प्रशस्तानि। हविष्यरूपकल्पितानि नवस्त्रावितो विशदः सिद्धश्चौदनश्चरुः। भैक्षं ब्रह्मचारिणा शिष्यादिना स्वयं मानीतं। प्रहस्तस्य

भिक्षाचरणनिषेधात्। चूर्णीकृताः धानाः सक्तवः। कणाः फलीकरणानि। यावकः पूर्वमुक्तः। अन्यानि प्रसिद्धानि। द्वादशैतानि हवींषि। तेषु च पूर्व
स्मात्पूर्वस्मादुत्तरमुत्तरं प्रशस्तं। तत्र द्रव्याणां पत्रपुटादिना ग्रासकल्पना। एषु चैव सिद्धरूपाणि लघूनि लघूनि। पौर्णमास्यां पंचदश ग्रासान् भुक्त्वैका
पचयेनापरपक्षमश्नीयात्। एवं चतुर्दश्यामुपोष्यापरेद्युः पंचदश्यां पंचदश ग्रासान् भुक्त्वा ततः परमेकापचयेन। द्विर्वचनेन सत्यर्थः स्पष्टो भवति प्र
त्यहमेकैकापचयेनैकैकहान्या सर्वमेवापरपक्षमश्नीयात्। तिथिग्रासक्रमप्राप्तेन नवमीभोजनेऽपि दशान्ताः पंचरात्रेणाज्यो नवमी अपरेद्युश्च दश
मी नास्ति तदा पूर्वेद्युर्गतायामेव नवम्यां नव ग्रासान् भुक्त्वा अपरेद्युरेकादशी प्राप्ता नेकादश ग्रासास्ते। भुंजीत दशमी प्राप्तानां दशग्रासानां लोपः। एवं ति
थिद्वयावेकादशी ग्रासे प्राप्ते यदा षड्विंशति नाडिका दशमी ततस्य एकादशी अपरेद्युरात्रावपि किं पत्येकादशी तदा पूर्वेद्युरेकादश्यां प्रविष्टा
या एकादश ग्रासान् भुक्त्वापरेद्युरपि तान्येवैकादश भुंजीत ततस्यापरेद्युर्द्वादशीति प्रयोगः। यथा कथंचित्पिंडानां तिस्रोशीतीः समाहितः मासेनाश्नन्हवि
ष्यस्य चंद्रस्यैति सलोकतामिति। मानवे चांद्रायणं तत्र विधीयते। न पुनरुपचयापचयरूपे तत्के चांद्रायणे पिंडसंख्यानियमः। तथा च याज्ञवल्क्यः
न स्पष्टमुक्तं। यथा कथंचित्पिंडानां चत्वारिंशाच्छतद्वयं। मासेनैकेन भुंजीत चांद्रायणमथापरं। समामिति। अमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षे एव
मेकापचयेन ग्रस्यमानेषु चतुर्दश्यामेको ग्रासो भवति। अमावास्यायामुपवासः। अमावास्यायामुपोष्य पूर्वपक्षप्रतिपद्येकं ग्रासमसितकाएकैकाचयेन

गौ०सू०२० एकैकया सदध्यात्कृत्स्नमेव पूर्वपक्षमश्नीयात्। पौर्णमास्यां पंचदश ग्रासा भवंति। तदेतत्तनुमध्यत्वात्पिपीलिकामध्यं चांद्रायणं। विपरीतमेकेषां। एकेषामाचा
र्याणां मतेनेदमेव विधानं विपरीतं भवति। अमावास्यामुपोष्यैकोत्तरवृद्ध्या पूर्वपक्षमश्नीयात् कृष्णप्रतिपदमारभ्यैकापचयेनापरपक्षमश्नीयात्। चतुर्दश्यामे
॥९६॥ को ग्रासो भवति। अमावास्यामुपवासः। तदेतत्स्थूलमध्यत्वाद्यवमध्यं चांद्रायणं॥ एष चांद्रायणो मासः॥ एवं मासस्साध्यं चांद्रायणं तद्योगादेव मा
सश्चांद्रायणः। यद्यप्युक्ते प्रकारे पिपीलिकामध्ये द्वात्रिंशद्दिनानि यवमध्ये चैकत्रिंशत् तथापि न वाच्यैकेनाक्षरेणेति न्यायेनैष मास इत्युक्तं। एनमाप्त्वा विप
यो विपाप्मा सर्वमेनो हंति। एनमेवंविधं चांद्रायणं मासमाप्त्वा मासस्साध्यमेतद्व्रतं कृत्वा विपापो भवति॥ विहिताकरणजन्यपापहीनः॥ विपाप्मा निषिद्धा
चरणभवपापहीनः सर्वमेनो हंति। यज्जन्मांतरार्जितं सूक्ष्ममेनस्तदपि सर्वं हंति। द्वितीयमाप्त्वा दश पूर्वान्दश परानात्मानं चैकविंशं पंक्तिं पु
नाति। द्वावेतावित्युक्तव्ये द्वितीयमिति वचनं नैरंतर्यार्थं द्वितीयमासं निरंतरमाप्त्वेति। कथं पुनर्नैरंतर्यस्य संभवः। यावता पिपीलिकामध्ये प्रवृत्तो
पौर्णमासीमुपवसेदित्युक्तः पौर्णमास्यां पंचदश ग्रासान्भुक्तेति च॥ तथामावास्यामुपोष्यैकोत्तरवृद्ध्या पूर्वपक्षमश्नीयादिति। तत्र द्वितीयपौर्णमास्यंतः
प्रयोगः तदनंतरं द्वितीयस्यारंभे चतुर्दश्यामुपवासः पंचदश्यां पंचदश ग्रासानिति च नोपपद्यते। तस्मादेवमत्र वक्तव्यं॥ नात्र द्वयोश्चांद्रायणयोर्विधानं किं
तु द्विमासद्वयसाध्यमेकं चांद्रायणं तस्यैव फलविधिः। तस्यादौ चतुर्दश्यामुपवासः तृतीयपौर्णमास्यंतश्च प्रयोगः। मध्ये यथोक्तं। द्वितीया च पौर्णमासी ॥९६॥
तत्र प्रथमस्यांत्या द्वितीयस्याद्याः। एवं यवमध्ये द्वितीयामावास्या॥ एवं संवत्सरं त्वाप्त्वेति व्याख्यातं। संवत्सरं त्वाप्त्वा चंद्रमसः सलोकतामाप्नोति॥ २॥

महापातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते। द्वितीयमतिकृच्छ्रं चरित्वा महापातकव्यतिरिक्तैः पापैर्मुच्यते। तृतीयं चरित्वा सर्वस्मादेनसो मुच्यते। तृती
यं कृच्छ्रातिकृच्छ्रं चरित्वा सर्वस्मान्महापातकादेनसोऽभिसंधिकृतान्मुच्यते। एवं व्यस्तानां फलमुक्त्वा समस्तानाह। अथैतांस्त्रीन्कृच्छ्रांश्चरित्वा सर्वे
षु वेदेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति। यः एतान्स्त्रीन्कृच्छ्राननन्यव्यवधानेनानुतिष्ठति तस्य सर्वान्वेदानधीत्य स्नानस्य यत्फलं तत्तुल्यं फलं भवति।
सर्वेषां देवानां लोका जितास्तेन। अथ विदुषः प्रशंसा। यश्चैवं वेद। यश्चैतान्कृच्छ्रान्स्वरूपेणेतिकर्तव्यतया फलेन च जानाति सोऽपि सर्वेषु वेदेषु स्नातो
भवति एवं नाम ज्ञानं प्रशस्तमित्यर्थः॥ ॥इति मिताक्षरायां षड्विंशोऽध्यायः॥ ॥२६॥ ॥अथातश्चांद्रायणं। पूर्ववद्[illegible]स्थेयं। चंद्रप्राप्तिनिमित्त
भूतं कर्म चांद्रायणं। तथा चानेन वक्ष्यति। चंद्रमसः सलोकतामाप्नोतीति। तस्योक्तो विधिः कृच्छ्रे। तस्येहाह। नित्यादिको यो विधिः कृच्छ्र उक्तः स चांद्रायण
स्यापि द्रष्टव्यः॥ यस्तु विशेषः स उच्यते। वपनं व्रते चेत्। व्रतमिति प्रायश्चित्तमाह। एतेन तु ज्ञातयज्ञोपाध्यायव्रते राविषक्ते तेनसइत्यादौ दर्शनात्। यदि प्रायश्चि
त्तार्थं चांद्रायणं क्रियते तदा वपननिमित्तिकं तव्य। अविशेषेण पुरुषाणामेव। तदेव स्त्रियाः केशा[illegible] वपनं न वर्जमिति बौधायनस्मरणं। चांद्रायणे वप
नं विधानाद्वक्ष्यत्कृच्छ्रे प्रायश्चित्तार्थे विना न भवति। व्रतं चेदिति वचनाद्दृष्टार्थे कर्मण्यव्रतार्थे च चांद्रायणेन वपनं। श्वोभूतां पौर्णमासीमुपवसेत्। श्वः पौर्णमासी
भवितेत्यवगम्य पूर्वे द्युश्चतुर्दश्यामुपवसेत्। उपवासो भोजनलोपः। आप्यायस्व संते पयांसि नवो नव इति चैताभिस्तर्पणमाज्यहोमो हविषश्चानुमंत्र
णमुपस्थानं चंद्रमसः। आप्यायस्वेत्याभिर्मंत्रैस्तर्पणादीनि कर्माणि कर्तव्यानि। विषम्याद्यर्थाः सर्व्यं न भवति। तत्र तर्पणहोमो प्रतिमंत्रं भवति। अनुमंत्र

पुत्रवद्धजेरन् । विभागेतु धर्मवृद्धिः तुत्राह पृथग्धर्म्यावर्तयति । नैतदेवं ज्येष्ठ एव बिभृयादितियदुक्तं । विभागस्तु वक्ष्याम्यान् । यतस्तत्र धर्मवृद्धिः । यथा
॥९७॥ हबृहस्पतिः एकपाकेन वसतां पितृदेवद्विजार्चनं । एकं भवेद्विभक्तानां तदेव स्याद्गृहेगृहे ॥ अनापितुरूर्ध्वं जीवति वा तस्मिन्विभागप्रकारमाह । विं
शतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तोरथ्यो गोवृषः । सर्वस्मात्पितृधनाद्विंशतितमो भागः मिथुनं गवादिषु स्त्रीपुंसयोर्युग्मं उभय
तोदंताः अश्वाश्वतरगर्दभास्तेषामन्यतमोश्वोयुक्तोरथ्यः गोवृषः पुंगवः । अयमुद्धारो ज्येष्ठस्य ॥ काणखोरकूटवटापंडुमध्यमस्यानेकाश्चेत् ॥ का
णएकनेत्रः विकलांगइतियावत् । खोरो खोड इति खडः खोड इति पाठे विकलपादः । कूटः शृंगहीनः । वंडो टोपिकलवालधिः । गवाश्वादिषु एवंरूपः मध्यम
धा स्योद्धारः । सचकाणादिर्यद्धनेको भवति । इतरथा तत्र त्वेकदिति । अविर्धान्यायसी गृहमनोयुक्तं चतुष्पादां चैकैकं यवीयसः । अविरूपौ अविः जातौ
वेकवचनं । यावंतो वयः एकस्य तत्रचतुष्पादां चैकैकमित्येव सिद्धत्वात् । अपरआह । यद्यपि पितुरेकएवाविस्तथास्य यवीयसः । चतुष्पदां चैकमिति नु
बहुविषयमिति । धान्यं व्रीह्यादिधान्यमयश्चेति धान्यायसी । एतदुभयं यावत्किंचिद्गृहे । गृहं यत्रास्यते । अनः शाकटं युक्तं वाहाभ्यां । चतुष्प ॥९७॥
दां च गवादीनामेकमिष्टं गृह्णीयात् । अयं कनीयस उद्धारः । अयं च सर्वकनीयसः । इतरस्यांउद्धारो वामध्यमस्य । सम ध्येत रत्सर्वं इतरस्मृद्धतशि
ष्टं सर्वं सर्वेसमं धागृह्णीयुः समसमित्यर्थः । द्विधा बहुधेत्यादौ दृष्टो धाप्रत्ययः प्रयुक्तः । प्रकारांतरमाह । द्वंशी वा पूर्वजः स्यादेकैकमितरेषां ॥

एकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभते । अल्पांतरेषु बहुषु क्षेत्रादिषु एकैकं धनरूपं ज्येष्ठानुपूर्व्या गृह्णीयुः । काम्यं यस्य यदिष्टं सतद्गृह्णीयादिति ॥
सर्वेषां श्रेष्ठं ज्येष्ठः । तदहितो विशिष्टमनंतरः । तदहितेविशिष्टमनंतर इति । अयमुद्धारः सर्वेषां । अत्रैव पशुषु विशेषः । दशातः पशूनां । दशावयवा अस्य दशा
तः । पशूनां गवादीनां मध्ये दशातं पूर्वो लभते । नत्वेकमिति । अस्यापवादः । नैकशफद्विपदानां । एकशफानामश्वादीनां द्विपदानां दास्यादीनां च
दशातं दशात न गृह्णीयुः । किंतु पूर्वोक्तमेकैकमेव ति । द्विपदानामिति प्राग्वेपादशब्देन समानार्थः पदशब्दः । एवमेकमातृकाणांसाधारा विभा
ग उक्तः । अथानेकमातृकाणामाह । ऋषभोधिको ज्येष्ठस्य । उत्तरस्मृत्वे ज्येष्ठिनेयस्येति वचनादयं ज्येष्ठः कानिष्ठिनेयः यदि कनीयस्याः पुत्रो
भवतितदा तस्य ऋषभ उद्धारः समं अन्यत् । ऋषभषोडशाज्येष्ठिनेयस्य । ज्येष्ठस्येति वर्तते । ज्येष्ठायाः पुत्रश्च भवति यो ज्येष्ठश्च भवति । तस्य
पंचदशगावः । ऋषभश्चैकउद्धारः समं अन्यत् । अथ ऋषभाधिको ज्येष्ठस्येत्यस्यापवादः । समधा वा ज्येष्ठिनेयेन यवीयसां । ज्येष्ठस्येति वर्त
ते । तत्र च अज्येष्ठिनेयेत्यनेन सामानाधिकरण्यात् तृतीयांतं संपद्यते । अज्येष्ठिनेयेन कनिष्ठायां जातेन ज्येष्ठेन सह यवीयसां ज्येष्ठिनेयानां
समो वा विभागः । एकस्य जन्मतो ज्येष्ठ्यमन्येषां मातृत इति । प्रतिमातृ वा स्वस्ववर्गे भागविशेषः । विंशतिभागो ज्येष्ठस्येत्यादिर्य उक्तो भागविशेषः
स प्रतिमातृ वा स्वस्ववर्गे भागविशेषः कर्तव्यः एतदुक्तं भवति । यावंतो मातरः पुत्रवत्यः तावंता विभक्ते धने एकस्या यावंतः पुत्रास्तेषां भागानेकी

गौ॰सू॰वृ॰

॥१९८॥

त्यतत्र तत्र वर्गे यो ज्येष्ठः तस्य विंशतिभागो ज्येष्ठस्येत्यादिर्भागविशेषइति। एवं पुत्रवतो विभागउक्तः। अथापुत्रस्याह॥ पितोत्सृजेत्पुत्रिकामनप
त्योऽग्निं प्रजापतिं चेष्ट्वास्मदर्थमपत्यमिति संवाद्य॥ पिता नाम नाउत्सृजेत्तद्दद्यात्॥ अभिसंज्ञानिर्देशोयं। यथायूपं छिनत्तीति। पुत्रिकां करिष्यं
तीं दुहितरमनपत्यामपुत्रोऽग्निं प्रजापतिं चेष्ट्वा अग्नये स्वाहा प्रजापतये स्वाहा प्रजापतये स्वाहेत्याज्यभागानंतरमौपासने आज्येन हुत्वास्म
दर्थमपत्यमिति संवाद्य यस्मै ददाति तेन संवादं कारयित्वा॥ तत्र प्रकारो वसिष्ठेन दर्शितः। अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां॥ योस्यां ज
निष्यते पुत्रः स मे पुत्रो भवेदिति। येवंदत्ता सा पुत्रिका तस्यां जातो मातामहस्यैव पुत्रो नोत्पादयितुः। अतएव मनुः। मातुः प्रथमतः पिंडं निर्वपेत्पु
त्रिकासुतः। द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुरिति। एवं सर्वे गौणाः पुत्रिका येषां पितुः पुत्रप्रतिनिधिः। द्व्येप्रतिकृतौ संज्ञायां कन्नि
ति। सैव च रिक्थग्राहिणी। तथा च मनुः। पुत्रिकायां कृतायां तु यदि पुत्रोनुजायते। समस्तत्र विभागस्यात् ज्येष्ठता नास्ति हि स्त्रियाइति। गोत्रम
पि तस्याः पितुरेव गोत्रं। भर्तुस्तु केवलं धर्मेषु सहचारिणीति फलादपुत्रार्थैव विवाहानंतरं कर्तव्यं। स्वकुलसंतानार्थं अन्यथा दोषः। अभिसंधि ॥१९८॥
मात्रात्पुत्रिकेत्येकेषां। एकस्मन्यं ते प्रदानसमये पितुर्योऽभिसंधिरयं मे पुत्रिकास्त्विति तावन्मात्रादेवाहिता पुत्रिका भवति न होमसंवादस्ताद्य
पेक्षेति। ततश्च। तत्संशयान्नोपयच्छेदभ्रातृकां। तत्संशयादभिसंधिसंशयात्पुत्रिकासंशयाद्धि॥ मनुरप्याह॥ यस्यास्तु न भवेद्भ्राता न विज्ञायेत

यस्त्वसंवत्सरमप्यवधानेन चांद्रायणव्रतं करोति स चंद्रमसः सालोक्यतामाप्नोति॥ द्विरुक्तिर्व्याख्याता॥ अत्र मनुः। अष्टावष्टौ समश्नीयात्पिंडान्म
ध्यंदिने स्थिते। नियतात्मा हविष्यस्य यतिचांद्रायणं चरेत्। चतुरः प्रातरश्नीयात् द्विजः पिंडान्समाहितः। चतुरोस्तमिते सूर्ये शिशुचांद्रायणं चरन्।
इति। यथाकथंचित्पिंडानामितिच॥ ॥इति मिताक्षरायां सप्तविंशोध्यायः॥२७॥ ॥अथ दायविभागः॥ ऊर्ध्वं पितुः पुत्रा रिक्थं भजेरन्॥
ऊर्ध्वं पितुः पितरि मृते तदीयं रिक्थं स्वं गृहक्षेत्रदासगवाश्वसुवर्णादिकं पुत्राः भजेरन्। पुत्रास्तत्र भागिनः। पुत्राणां तत्स्वामित्वमित्युक्तं भव
ति॥ ऊर्ध्वं पितुरितिवचनात् जीवति तस्मिन्न तत्र पुत्राणां स्वाम्यं। तथा च मनुः। ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह। भजेरन् पैतृकं रिक्थमन
ीशास्ते हि जीवतोरिति। पितृशब्दस्य संबंधिशब्दत्वादेव सिद्धे पुत्रग्रहणं नियमार्थं। तेन पितुरूर्ध्वं विभजंतां। भ्राता भ्रातॄणां समं हरेदित्यादि
वचनजातमाचार्यस्याभिमतं न भवति। पुत्रा एव सर्वं धनादिकं गृहीत्वा [illegible] यथावद्रक्षेयुरिति मन्यते। श्रूयते च। तस्मात्स्त्रियो निरिंद्रिया
अदायादीरिति। मनुरप्याह। पिता रक्षति कौमारे भर्ता रक्षति यौवने॥ पुत्रास्तु स्थविरे भावे न स्त्री स्वातंत्र्यमर्हतीति। निवृत्ते रजसि मातुर्जीवति चे
च्छति। अथवा जीवत्यपि पितरि पुत्रा रिक्थं भजेरन्निति। इच्छति सति तदनुज्ञेयमित्यर्थः। तस्य कालः। निवृत्ते रजसि मातुरुपरतरजस्कायां निवृत्तप्र
सवायामित्युक्तं भवति। सर्वं वा पूर्वतस्येतरान् बिभृयात्पितृवत्। ज्येष्ठ एव सर्वं धनं स्वीकृत्य गृहीत्वा इतरान् कनिष्ठकान् बिभृयात्। तेपि तस्मिन्

हरणमुक्तं। तत्र सर्वमेव धनं सपिंडाभावे गृहीत्वा स्त्रियो यावज्जीवं रक्षेयुरिति मुख्यः कल्पः। तदसंभवे अशनवसनयोः पर्याप्तं धनक्षेत्रादिकमवशि
ष्य नव्यपोह्य शेषं गृह्णीयुः तथा च बृहस्पतिनापत्नीदायं प्रतिविधानमुक्तं। वसनस्याशनस्यैव तथैव रजतस्य च। त्रयं व्यपोह्य तद्विष्टं दाया
दानां प्रकल्पयेत्। न्नूमावसारिकं द्रव्यं सहायास्त्वानत्कपुरा। तथैवाशनवासांसि पित्र्याणय्यं धने मृतेति। बीजं वा लिप्सेत। अथवा स्त्रीलापं
डादिभ्यो बीजं लिप्सेत। अपत्यमुत्पादयेदित्युक्तं भवति। अस्मिन्पक्षे न सापिंड्याद्धोडा धनं न गृह्णीयुः एषतो धन्यस्यार्थाय रक्षेयुः। अस्मिन्
पक्षविशेषः। देवरवत्यामन्यजातमभागं। देवरे विद्यमाने यदन्यतो बीजं लिप्सेत तस्यां जातमपत्यं अभागं भागरहितं न तस्य ग्रहणमस्ति नत्त
प असति तु देवरे अन्यतो जातमपत्यं सभागमेव। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च। पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं। अधि
वेदनिकाद्यं च स्त्रीधनं परिकीर्तितमिति याज्ञवल्क्यः। तत्र स्त्रीधनं तस्यां मृतायां दुहितॄणामप्रत्तानां भवति। यदि सर्वा अपि प्रत्ता अप्रतिष्ठि
तानां भवति प्रत्ताः सुप्रतिष्ठिताः काश्चित् काश्चिदप्रतिष्ठिताः प्रत्ता अप्रत्ता समवाये प्रत्ता गृह्णाति। प्रतिष्ठिता। प्रतिष्ठितासमवाये प्रति ॥१११॥
ष्ठिताना गृह्णाति। यदा प्रसूतानि धनं तदा सर्वासां भवति। एषामातुरूर्ध्वं जीवन्त्याः पितृकुलध्वंस्य स्त्रीधनस्य मतिः। तथा च मनुः। मातुस्तु
यौतकं यस्याः कुमारीभाग एव सा। वसिष्ठश्च। मातुः पारिणाय्यं स्त्रीयो विभजेरन्निति। यत्तु शंखलिखिताभ्यामुक्तं समं सर्वे सोदर्या मातृकं द्रव्य

मर्हन्ति कुमार्यश्चेति। तदूढा नृकुललब्धेः प्रत्तासु दुहितृषु। तत्र प्रत्ताविषये प्रभृततमेमानवं। जनन्यां संस्थितायां तु समं सर्वे सहोदराः भजेरन्। मा
तृकं रिक्थं भगिन्यश्च सनाभयः। यास्तासां स्युर्दुहितरः तासामपि यथार्हतः। मातामह्या धनात् किंचित्प्रदेयं प्रीतिपूर्वकमिति। तत्रैवाल्पधने बार्ह
स्पत्यं। स्त्रीधनं तदपत्यानां दुहितृणां तदंशिनी। अप्रत्ता चेत्समूढा तु लभेत समातृकमिति। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः। भगिनिप्रदा
ननिमित्तं पित्राय गृह्णाति तं द्रव्यमासुरार्षविवाहयोस्तस्मिन् मृते तस्या भगिन्या एव सोदर्या भ्रातरस्तेषां भवति। तच्च मातुरूर्ध्वं जीवन्त्यां तु
मातरि तस्या एव। ननु मृतस्य पितुरेतत्स्यमिति। तत्र ये भागिनो भिन्नोदरा भ्रातरो मातृसपत्नी चेति ते सर्वे दानेन गृह्णीयुरिति। तत्र विवाहस
मये भर्त्रादिकुलेन भागिन्याः दत्तं हेमाभरणक्षेत्रादिकं तत्तस्मादेव। मृतायां च तस्यामप्रजस्त्रियां ज्ञवल्क्येनोक्तं। बंधुदत्तं तथा शुल्कं अन्वा
धेयकमेव च। अप्रजायामतीतायां बांधवास्तदवाप्नुयुः। येन दत्तं स तत् दवाप्नुयादिति। सत्यां तु प्रजायां सैव गृह्णीयादिति। पूर्वं चैके। प्राग
प्येमातुर्मरणाद् भगिनीशुल्कं सोदर्याणां भवती त्येके मन्यंते तस्यां वृत्तापेक्षो विकल्पः। असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य। संसृष्टिनो विभ
क्तभ्रातरः विभक्तेभ्यो विभागः असंसृष्टिनो विभागो संसृष्टि विशेषणः। प्रेतानामित्येतदुपसर्जनीभूतानामप्यसंसृष्टिनां विशेषणं। अन
पत्यस्य चेति वर्तते। असंसृष्टिनां विभक्तानामथ नपत्यानां भ्रातॄणां प्रेतानां नो विभागः विभक्तेभ्यो धनादिः सज्येष्ठस्य भ्रातुर्भवति नेतरेषां भ्रातॄ

गो०सू०टी०

॥१००॥ र्णां नापि पत्न्याः। न च पितृभ्योरित्याचार्यस्य पक्षः। तथा च शंखलिखितपैठीनसयः। अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे मा
तापितरौ हरेतां। पत्नी वा ज्येष्ठा सगोत्रशिष्य सब्रह्मचारिणश्चेति। मनुस्तु। पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चेति। देवलश्च। ततो
दायमपुत्रस्य विभजेरन् सहोदराः। सकुल्या दुहिता वापि ध्रियमाणोऽपितापि चेति। संसृष्टिनि प्रेते संसृष्टी रिक्थभाक्। धनादि
भिः संसृष्टं धनं यः स संसृष्टी साधारणधनः अविभक्ते विभज्य संसृष्टश्च। विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संचयेत्। पितृव्येण
थवापीत्यास तत्संसृष्ट उच्यत इति बार्हस्पत्यदर्शनात्। अनपत्यस्येति वर्तते। संसृष्टिन्यनपत्ये प्रेते तस्य रिक्थं संसृष्टी भजेत्।
तत्रापि सोदर्येण सोदर्यस्य च संसृष्टे सोदर्यो भजेत्। सोदरस्य तु सोदर इति याज्ञवल्कीयदर्शनात्। तदेवं विभागे। भ्रातर्यनपत्ये मृते
तद्धनं ज्येष्ठस्य असति ज्येष्ठे ज्येष्ठ इतरे वा भ्रातृणां। अविभक्ते तु मृते तत्र दत्ताः सर्वेषां भ्रातृणामिति। विभक्तजः पित्र्यमेव। यस्तु विभागा
दूर्ध्वं जातः पुत्रः तस्यामन्यस्यां वा भार्यायां स पितृमेव गृह्णीयात्। विभागादूर्ध्वं पित्रा यदर्जितं विभागकाले वा गृहीतं तदेव भजेद्द्रव्यं प्रभू ॥१००॥
तं वा। अत्र बृहस्पतिः। पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः। यदा तु पितुर्न किंचिदस्ति न
दापेष्वं। पितृविभक्ता विभागो न तरोत्पन्नस्य भागं दद्युरिति। याज्ञवल्क्योप्याह। विभक्तेषु सुतो जातः सवर्णायां विभागभाक्। दृश्याद्वा

वा पिता। नोपयच्छेत तां प्राज्ञः अपुत्रिकाधर्मशंकयेति। पिंडगोत्रर्षिसंबंधा रिक्थं भजेरन् स्त्री चानपत्यस्य॥ यस्य पुत्रिकारूपमपत्यं नास्ति सो
नपत्यः तस्य रिक्थं पिंडादिसंबंधा भजेरन्। स्त्री च पिंडसंबंधाः सपिंडाः। गोत्रसंबंधाः सगोत्राः। हारीतस्य हारीत इतिवत्। ऋषिसंबंधाः समान
प्रवराः॥ हरितकुत्सपिंगशांखदर्भहैमगवाः परस्परं। एवमन्यत्रापि। तत्र सपिंडाद्याः प्रत्यासत्तिक्रमेण गृह्णीयुः। तथा चापस्तंबः। पुत्राभा
वे यः प्रत्यासन्नः सपिंड इति। तद्यथा। पिता भ्राता वा सोदर्यः तत्सुता अभिन्नोदराः भ्रातरस्तत्सुताः पितृव्यं इत्यादि। सपिंडाभावे सगोत्राः तदभा
वे समानप्रवराः। स्त्री तु सवर्णैः सगोत्रादिभिः समुच्चीयते। यदा सपिंडादयो गृह्णंति तदा तैः सह पत्न्यपृथकमंत्राहरेत्। यथा पितुरूर्ध्वं वि
भजतां माताप्यंशं समं हरेदिति। अत एव स्त्री पृथङ्निर्दिष्टा सपिंडादयः समासेन। पत्नी दायस्त्वाचार्यस्य पक्षे न भवति। मनुरपि। निरिं
द्रिया अदायादाः स्त्रियो नित्यमिति — निरिति। अत्र सपिंडाद्यभावे बृहस्पतिः। अन्यत्र ब्राह्मणात् किंतु राजा धर्मपरायणः। तत्स्त्रीणां जी
वनं दद्यादेष दायविधिः स्मृतः। अन्नार्थं तंडुलप्रस्थमपराह्णे तु सैंधनं। वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः। एतादेव साध्वीयैनो वा
दितं विधवास्त्र नमिति। तदेवं मनुबृहस्पतिभ्यां पत्नीदायस्यात्यंताभावः उक्तः। याज्ञवल्क्येन तु पत्नीदायः सम्यगुक्तः। पत्नी दुहितरश्चे
त्यादि। अत्र व्यासः। द्विसहस्रपणो दायः पत्न्यै देयो न त्वन्यतु। यत्र भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात् इति। आचार्येण तु सपिंडादिसमांत्राय

हरणमुक्तं। तत्र सर्वमेव धनं सपिंडाद्याः गृहीत्वा ग्रासाच्छादनाय यावज्जीवं रक्षेयुरिति मुख्यः कल्पः। तदसम्भवे ग्रासाच्छादनवसनयोः पर्याप्तं धनं क्षेत्रादि कर्मेशा
त्वेन व्यपोह्य शेषं गृह्णीयुः। तथा च बृहस्पतिना पत्नीदायं प्रतिविशेषातमुक्तं। वसनस्याशनस्यैव तथैव रजतस्य च। त्रयं व्यपोह्य तच्छिष्टं दाया
दानां प्रकल्पयेत्। भूमावसारिकं द्रव्यं सहायास्थानतः पुरा। तथैवाशनवासांसि विभागाणि धने मृते ति। बीजं वा लिप्सेत। अथवा स्त्रीमापं
गुरुभ्यो बीजं लिप्सेत। अपत्यमुत्पादयेदित्येकं भवति। अस्मिन्पक्षे न सपिंडाद्या धनं न गृह्णीयुः रक्षितो धन्यस्यार्थाय रक्षेयुः। अस्मिन्
पक्षे विशेषः। देवरवत्यामन्यजातमभागं। देवरे विद्यमाने यद्यन्यतो बीजं लिप्सेत तस्यां जातमपत्यं अभागं भागरहितं न तस्य ग्रहणमस्ति नत्त
य असति तु देवरे अन्यतो जातमपत्यं सभागमेव। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च। पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं। आधि
वेदनिकाद्यं च स्त्रीधनं परिकीर्तितमिति याज्ञवल्क्यः। तत्र स्त्रीधनं तस्यां मृतायां दुहितॄणामप्रत्तानां भवति। यदि सर्वा अपि प्रत्ता अप्रतिष्ठि
तानां भवति प्रत्ताः सुप्रतिष्ठिताः काश्चित्तु काश्चिदप्रतिष्ठिताः प्रत्ता अप्रत्ता समवाये ऽप्रत्ता गृह्णाति। प्रतिष्ठिता ऽप्रतिष्ठितासमवाये प्रति ॥१११॥
ष्ठिता न गृह्णाति। यदा प्रसूतानि धनं तदा सर्वासां भवति। एषामातुरूर्ध्वं जीवन्त्याः पितृकुलधनस्य स्त्रीधनस्य मतिः। तथा च मनुः। मातुस्तु
यौतकं यस्याः कुमारीभाग एव सा। वशिष्ठश्च। मातुः पारिणाय्यं स्त्रियो विभजेरन्निति। यत्तु शंखलिखिताभ्यामुक्तं समं सर्वे सोदर्या मातृकं द्रव्य

महाः स्त्रीकुमार्यश्चेति। तद् दुर्लभकुले लब्धे ऽप्रत्तासु दुहितृषु। तत्र प्रत्ताविषये प्रवृत्तमेव मानवं। जनन्यां संस्थितायां तु समं सर्वे सहोदराः भजेरन्। मा
तृकं रिक्थं भागिन्यश्च सनाभयः। यास्तासां स्युर्दुहितरः तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकमिति। तत्रैवाल्पधने बार्ह
स्पत्यं। स्त्रीधनं तदपत्यानां दुहितॄणां तदंशिनी। अप्रत्ता चेत्समूढा तु लभते सन्मातृकमिति। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः। भगिनिप्रदा
नानिमित्तं पित्रा यच्छुल्कं गृहीतं द्रव्यमासुरार्षविवाहयोस्तस्मिन्मृते तस्या भागिन्या एव सोदर्या भ्रातरस्तेषां भवति। तच्च मातुरूर्ध्वं जीवन्त्यां तु
मातरि तस्या एव। ननु मृतस्य पितुरेतत्स्वमिति। तच्च भगिनीभिन्नोदरा भ्रातरो मातृसपत्नी चेति ते सर्वे स्त्रीधनं गृह्णीयुरिति। तत्र विवाहस
मये भर्त्रादिकुलेन कन्यायै दत्तं यदाभरणक्षेत्रादिकं तत्तस्मादेव। मृतायां च तस्यामप्रजायां स्त्रियां याज्ञवल्क्येनोक्तं। बंधुदत्तं तथा शुल्कमन्वा
धेयकमेव च। अप्रजायामतीतायां बांधवास्तदवाप्नुयुः। येन दत्तं स तद्दवाप्नुयादिति। सत्यां तु प्रजायां सैव गृह्णीयादिति। पूर्वं चैके। प्राग
पि मातुर्मरणाद्भगिनीशुल्कं सोदर्याणां भवति। त्वेके मन्यन्ते तस्यां दत्तापेक्षो विकल्पः। असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य। संसृष्टिनो विभ
क्ते भ्रातरः विभक्तेभ्यो विभागः असंसृष्टिनो विभागो संसृष्टि विशेषणः। प्रेतानामित्येतदुपसर्जनीभूतानामप्यसंसृष्टिनां विशेषणं। अन
पत्यस्य चेति वर्तते। असंसृष्टिनां विभक्तानामथ नपत्यानां भ्रातॄणां प्रेतानां यो विभागः विभक्तव्यो धनादिः स ज्येष्ठस्य भ्रातुर्भवति नेतरेषां भ्रातॄ

त्तस्यस्याघस्य तत्स्वत्वः। मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वा। यंपुत्रंप्रतिगृह्णीयादपविद्धस्तु सस्मृत इति। षडेते रिक्थभाजः पुत्राः का
नीनसहोढयोनर्भवः पुत्रिकापुत्रस्वयंदत्तक्रीताः गोत्रभाजः। पितृवेश्मनि कन्यातु यंपुत्रंजनयेद्रहः। तंकानीनं वदेन्नाम्ना वोढकन्यासमु
द्भवमिति। अत्रवसिष्ठः। अप्रत्ता दुहितायस्य पुत्रं विंदेततुल्यतः। पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति। याज्ञवल्क्यः। कानीनः कन्यका
जातो मातामहसुतो मत इति। तत्राप्रमन्नायामेव मृतायां मातामहस्य पुत्रः पौत्रो वा। ऊढायां वोढुः। अत्र मनुः। याणिर्भिणी संस्क्रियते ज्ञाताऽ
ज्ञातापि वासती। वोढुः सगर्भो भवति सहोढ इति चोच्यते। यापत्या वापरित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत्पुनर्भूत्वा सपौनर्भव उच्य
ते। पुत्रिकापुत्रः पूर्वमेवोक्तः। मनुः। मातापितृविहीनो यस्त्यक्तो वास्यादकारणात्। आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु संस्मृतः। क्रीतो याद्य
त्वपत्यार्थं मातापितोर्यमंतिकात्। सक्रीतकसुतस्तस्य सदृशासदृशोपि चेति। एतेषु गोत्रभाक्त्वं गोत्रमेव केवलं भजंते न रिक्थं। पूर्वे तु रिक्थ
भाजो गोत्रभाजश्च। औरसेन सहाभिधानात्। सर्वे चैते सजातीयाः। सजातीयस्य यं प्रोक्तस्तनयेषु मया विधिरिति याज्ञवल्क्यवचनात्। च
तुर्थांशे न औरसाद्यभावे। अथ यानेते कानीनादयो रिक्थभाजः। किंतु चतुर्थांशिनः। पितृधनस्य चतुर्थमंशं भजेरन्। न च पूर्वोक्तानां ष १०१
ण्णामौरसादीनामभावे तु त एव भजेरन्। चतुर्थांशव्यतिरिक्तं च सपिंडा गृह्णीयुः। यदत्र पुत्रिकापुत्रस्यौरसाद्यभावेपि चतुर्थांशभाक

त्वमुक्तं तदपकृष्टपुत्रिकापुत्रविषयं। यो हीनवर्णाया भार्याया दुहितरं पुत्रिकां करोति तत्राप्यभिसंधिमात्रेण तत्पुत्रविषयमित्यर्थः। अत्र मनुः।
पुत्रिकायां कृतायां तु यदि पुत्रोनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रिया इति। षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्। और
सो विभजन्दायं पित्र्यं पंचममेव वा। औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ। दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः इति। अत्र दत्तपुत्रग्र
हणानंतरं वसिष्ठः। तस्मिंश्चेत्प्रतिगृहीते औरसपुत्र उत्पद्यते चतुर्थभागभागी स्यादिति। अत्र कात्यायनः। उत्पन्ने औरसे पुत्रे तृतीयांशहरा
स्सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभागिनः इति। अत्र बृहस्पतिः। एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः। तत्तुल्यः पुत्रिकापुत्रो भर्त
व्याः स्मृताः। क्षेत्रजाद्याः सुतास्त्वन्ये पंचषट्सप्तभागिन इति। हारीतः। विभजेत्प्रमाणे एकांशं कानीनाय दद्यात्। विंशांशं पौनर्भवाय ए
कोनविंशांशं द्व्यामुष्यायणायाष्टादशांशं क्षेत्रजाय सप्तदशांशं पुत्रिकापुत्रायेतरानौरसायेति। याज्ञवल्क्यो द्वादशपुत्राननुक्रम्याह। पिंडदोंशहरश्चैषां
पूर्वाभावे परः पर इति। मनुरपि। श्रेयसः श्रेयसोभावे पापीयान्रिक्थमर्हतीति। नारदोपि। क्रमादेते प्रवर्तंते मृते पितरि तद्धने। ज्यायसो ज्यायसोभा
वे जघन्यस्तदवाप्नुयादिति। वसिष्ठोपि। यस्य तु पूर्वेषां षण्णां न कश्चिद्दायादः स्यादेते तस्य दायं हरेयुरिति। औरसः पुत्रिकापुत्रः क्षेत्रजः कानी
नो गूढोत्पन्नोपविद्धः। सहोढः पौनर्भवो दत्तः स्वयमुपागतः कृतकः क्रीत इति क्रमेण पुत्रानभिधाय देवलः। एते द्वादश पुत्रास्तु संतत्यर्थमुदा

हृताः आत्मजाः परजाः श्चैव उच्यते। कृत्रिकास्तथा। तेषां षट् बंधुदायादाः पूर्वे न्ये पितुरेव षट्। विशेषश्चापि पुत्राणामानुपूर्व्याद्विशिष्यते। सर्वथैवौरसस्यै
त पुत्रा दायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्येष्ठ्यं न गच्छति। तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः। हीनास्तमुपजीवेयुर्ग्रासाच्छादनसंभृताः इति।
॥१०२॥ बंधुदायादा इति बंधूनां सपिंडानामयं तदायं हरंति पुनर्केवलं पितुरेवेति। एव एकस्मिन्नन्यतरे पि बंधुदायादः शब्दस्यार्थः। तदयं औरसः पुत्रिकावी
जक्षेत्रिणी पुत्रिकासुतः। पौनर्भवश्च कानीनः सहोढो गूढसंभवः। तत्क्रीतस्वयंदत्ताः कृत्रिमश्चापविद्धकः। यत्र क्वचोत्पादितश्च पुत्राख्या दश
पंचच। अनेनैव क्रमेणैषां पूर्वाभावे परः परः। पिंडदो शहरश्चेति युक्त्या गुणवशात् स्थितिरिति। उक्तः सवर्णापुत्राणां विभागः। अथ क्रमविवाहेषु सव
र्णापुत्रेषु विशेषमाह। ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठो गुणसंपन्नस्तुल्यभाक्। ब्राह्मणस्य राजन्यायां जातः पुत्रो विद्यादिगुणसंपन्नो ज्येष्ठश्च भवति
तदा ब्राह्मणीपुत्रेणायवीयसा तुल्यभाक्। एकस्य वयसा ज्येष्ठ्यमपरस्य जात्येति ज्येष्ठांशहीनमन्यत्। विंशतिभागो ज्येष्ठस्येत्यादिर्यतः उद्धारः।
पूर्वमुक्तः स्तद्यतिरिक्तमन्यद्विभजेतेति प्रकरणाद्गम्यते। गुणहीनं ज्येष्ठं च राजन्यापुत्रमानवं। सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु। धर्म्यं ॥१०२॥
विभागं कुर्वीत विधानेन न च धर्मवित्। चतुरोंशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः। वैश्यापुत्रो हरेद्द्व्यंशमंशमेकं शूद्रांहरदिति। राजन्यावैश्यापु
त्रसमवाये यथा स ब्राह्मणीपुत्रेण। ब्राह्मणीपुत्रस्तेनास्य वक्तदा राजन्यापुत्रो ब्राह्मणीपुत्रेण समवाये यथा तुल्यभाक्। क्षत्रियात्वेतत्। चेद्वद

तद्विभागः स्याद्दायव्ययविशोधितात्। अत्र मनुनारदौ। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति। स्वय
मर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्। विद्यामधीत इति वैद्यः स्वयमर्जितं विद्यारहितेभ्यो भ्रातृभ्यः कामं न दद्यात्। अदानेपि न मन्ययबायुः।
दानेन तस्युरयइति। अवैद्याः समं विभजेरन्। यदा तु सर्वे भ्रातरो मूर्खाः कृष्यादिना पार्जयेयुः। तदा समं विभजेरन्। वैद्येनापि कृष्यादिनायदर्जि
तं न विद्यया लब्धं यदि पितृद्रव्याविरोधितं तत्र साम्यमेव। तत्र सूत्रद्वयमपि चैतद्भ्रातृविषयमेव। पितरि तु जीवति विदुषा विदुषा वा विभक्तेना
र्जितं पितुरेव। भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छंति यस्य ते तस्य तद्धनमिति मनुः। आचार्येण पुत्रा रिक्थं भजेरन्नित्यु
क्तं। तत्रौरसा एव पुत्रा इति संप्रत्ययो माभूदित्याह। पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः। औरसो धर्मपत्नीजः। अत्र
रथ याज्ञवल्क्यः। अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिंडदाता च धर्मत इति। अयमेवोत्पादयितुर्न बीजिनश्च भर्तुस्तद्विषय
न वसिष्ठः। ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा सहि संतानाय पूर्वेषां। न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन्
बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वादूरबांधवं संनिकृष्टमेव प्रतिगृह्णीयादिति संवृत्तः। कृत्रिमविषये मनुः। सदृ
शं तु प्रकुर्याद्यं गुणदोषविवर्जितं। पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः। उत्पद्यते गृहे यस्य न च ज्ञायेत कस्यचित्। स गृहे गूढ उत्पन्न

श्चंद्राद्धस्यार्थे। क्षत्रियाब्रह्मोत्पन्नयोः पुत्रयोः समवाये वैश्यापुत्रो ज्येष्ठगुणसंपन्नः क्षत्रियपुत्रेणाप्यर्धीयसा तुल्यभाक्। एवं वैश्यादुत्पन्नस्य शू
द्रपुत्रस्याप्येके मन्यंते द्रष्टव्यमिति। नेत्यन्ये अनुक्तत्वात्। शूद्रापुत्रोप्यनपत्यस्य शुश्रूषुश्चेल्लभेत वृत्तिमूलमंतेवासिविधिना। ब्राह्मणस्य
निवर्तते। अनपत्यस्याविद्यमानद्विजातिपुत्रस्य ब्राह्मणस्य शूद्रापुत्रोपि वृत्तिमूलं लभेत यावता कृष्यादिकर्मसमर्थो भवति तावल्लभेत
समयं तेवासिविधिना शुश्रूषुर्भवति यथा शिष्य आचार्यं शुश्रूषते तथा शुश्रूषश्चेदिति। एवं क्षत्रियवैश्ययोरपि शूद्रापुत्रो वृत्तिमूलं लभे
त। सवर्णापुत्रोप्यन्यायवृत्तो न लभेतैकेषां। यस्त्वन्यायवृत्तः अधर्मेण द्रव्याणि प्रतिपादयति वेश्यादिभ्यः प्रयच्छति सवर्णापुत्रोपि। अ
पि शाद्वा ज्येष्ठोपि दायं न लभेतेत्येकेषां मतं। तथा चापस्तंबः। यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोपि तमभागं कुर्वीतेति। श्रोत्रिया
ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्। अपत्यग्रहणं पिंडगोत्रर्षिसंबंधादेरुपलक्षणं। अनपत्यस्याविद्यमानधनप्त्राज्ञातेर्ब्राह्मणस्य श्रो
त्रियारिक्थं भजेरन्। राजेतरेषां। इतरेषां क्षत्रियादीनां रिक्थमनपत्यानां राजा भजेत। जडक्लीबौ भर्तव्यौ। जडो नष्टचित्तः। क्लीबस्तृती
याप्रकृतिः। एतावशनाछादनादानेन न भर्तव्यौ। मनुरुक्तः। अनंशौ क्लीबपतितौ जात्यंधबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिं

गौ०सू०टी० द्विपाद इति। अपत्यं जडस्य भागार्हं। यदि तु अजडस्यापत्यं भवति तदा तद्भागार्हं भवति तेनास्मै स भागो देयो यस्तत्पितुः। अत्र मनुः। यद्यर्थिता तु दारैः
स्यात् क्लीबादीनां कथंचन। तेषामुत्पन्नतन्तूनामपत्यं दायमर्हतीति। शूद्रापुत्रवत् प्रतिलोमासु। प्रातिलोम्येन जातानां स्वतद्दीनामपि गुणोत्कृ
॥१०३॥ ष्टानां शूद्रापुत्रवत् वृत्तिमूलं दातव्यमिति। उदकयोगक्षेमकृतान्ने ष्वविभागः। उदकं कूपादि। योगक्षेमाविष्टापूर्ते। तथा च लौगाक्षिः। योगः।
पूर्वं क्षेममिष्टमित्याकुल्लूकदर्शिनः। अविभाज्यं तु तेषां केचायनं चान्नमपचेति। कृतान्ने उत्सवादिषु कल्पितप्रभूतोपि एतेषु विभागो न कर्तव्यः।
यथा। वस्त्रिन् तु वसोदर्यानुरूपेण भोगः। स्त्रीषु च संयुक्तासु। याश्च स्त्रियो दास्यो मात्रादिषु केनचित् संयुक्ता नप भोगाय परिगृहीतास्तास्तस्यै
व यद्यन्याः। संत्यन्यत्रान्येषां भागः। यदि न संति तदा द्रव्येण साम्यमापादनीयं। यदा पुनरेकैव दासी असंयुक्ता च तदा पर्यायेण कर्म कारयेतु। अ
नाम्नाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्यं। ज्ञातमथाज्ञातं तन्निह्नुपरीतमज्ञातं योर्थो यथावद् दृष्ट ज्ञातः संदिग्धो वा तत्रानाम्नाते दशाव ॥१०३॥
रैर्दशाभ्यो न्यूनैः शिष्टैः धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः इति मनुनोक्तैः। ऊहवद्भिरूहापो
हकुशलैः अलुब्धैः लोभादिषु निस्पृहैः। एवंभूतैर्ब्राह्मणैर्यत्प्रशस्तं स्तुतमिदमत्र युक्तमिति तत्कार्यं कर्तुं युक्तं। के पुनस्ते दशावरास्तानाह। च

गौ०सू०वृ० गृह्णातिच।तस्मादस्यवचनमनुष्ठेयमितिसांप्रतं।येकेवलंधर्ममनु[illegible]ष्ठंतितेभ्योज्ञात्वानुतिष्ठन्विशिष्टइत्याह।धर्मिणावि धर्मशा०वृ०
शेषेणस्वर्गंलोकंधर्मविदाप्नोतिज्ञानाभिनिवेशाभ्यां।धर्मिणोधर्मवंतोधार्मिकाःतेषांमध्येयोधर्मवित्धर्मशास्त्रंपा॰तोर्थतो
धीत्यधर्मतत्वतोवेत्तिसज्ञानाभिनिवेशाभ्यांज्ञानंसमर्थावगतिः।।अभिनिवेशस्तात्पर्येणानुष्ठानंज्ञानेनाभिनिवेशेनंके
।।१०५।। वलानुष्ठानात्तस्या विशेषेणस्वर्गंलोकमाप्नोति।। ।।इतिधर्माधर्मः।। ।।सोयमादितोवेदोधर्ममूलमित्यारभ्यैवमंतोधर्म
उक्तः।।द्विरुक्तिःशास्त्रपरिसमाप्त्यर्था।गौतमोक्तेधर्मशास्त्रेहरदत्तकृताविह।।अष्टाविंशोयमध्यायोवृत्तोदायःसमा
पितः।। ।।२८।। ।।इतिहरदत्तमिश्रकृतायांगौतमीयधर्मशास्त्रविवृत्तौमिताक्षरायामष्टाविंशोध्यायः।।छ।। ।।छ।।छ।।

श्रीः
।।१०४।।

अध्यायानुक्रमः

१	६	७	२५	१५	६०	२२	८२
		८	२७	१६	६३	२३	९०
२	११	९	३३	१७	६७	२४	९१
३	१४	१०	३८	१८	६६	२५	९३
४	१७	११	४२	१९	७२	२६	९५
५	२१	१२	४७	२०	७३	२७	९७
६	२३	१३	५०	२१	७६	२८	१०४
		१४	५६				

धर्मप्रमाणसपरिकरोपनयननिरूपणंनामप्रथमोध्यायः।।१।।उपनीतधर्मनिरूपणंद्वितीयः।।२।।नैष्ठिकब्रह्मचारिभिक्षुवान
प्रस्थाश्रमधर्मकथनंतृतीयः।।३।।गृहस्थाश्रमेधर्मरूपविवाहभेदकथनंचतुर्थः।।४।।पंचमहायज्ञकथनंपंचमः।।५।।पूज्यनिर्णय
व्यवस्थाकथनंषष्ठः।।६।।उपजीविकावृत्तिकथनंसप्तमः।।७।।आपत्कल्पपरावृत्तिचत्वारिंशत्संस्काराष्टात्मगुणकथनमष्टमः।।८।।
स्नातकधर्मकथनंनवमः।।९।।वर्णधर्मकथनंदशमः।।१०।।राजधर्मकथनं११।।अपराधिदंडनिरूपणं१२।।साक्षिनिर्णयोदशः १३
आशौचनिरूपणं१४।।श्राद्धनिरूपणं१५।।अध्ययनधर्मनिरूपणं१६।।भक्ष्याभक्ष्यनिरूपणं१७।।स्त्रीधर्मनिरूपणं१८।।प्राय
साधन श्चित्तनिरूपणं१९।।पतितत्यागविधिः२०।।पातकिनिरूपणं२१।।प्रातिस्विकप्रायश्चित्तनिरूपकमध्यायद्वयं।।२२।।२३।।
महापातकरहस्यप्रायश्चित्तकथनं।।२४।।उपपातकरहस्यप्रायश्चित्तनिरूपणं।।२५।।कृच्छ्रनिरूपणं।।२६।।चांद्राय
णनिरूपणंसप्तविंशः।।२७।।दायविभागकथनंनामाष्टाविंशोध्यायः२८।।पूर्णश्चग्रंथः।।
।।

त्वारश्चतुर्णांपारगा वेदानांप्रागुत्तमात्त्रय आश्रमिणः पृथग्धर्मविदस्त्रय एतान्दशावरान्परिषदित्याचक्षते। चतुर्णांवेदानांपार
गाः संपूर्णानामध्येतारोर्थज्ञाश्च। एवंभूताश्चत्वारः न चातुर्वैद्य एकः। आश्रमिणस्तृतीयेध्याय उक्ता ब्रह्मचारी गृहस्थो भिक्षुर्वैखानस
इति। तेषूत्तमाद्वैखानसात्पूर्वे त्रय आश्रमिणः पृथग्धर्मशास्त्रविदस्त्रयः। पृथक्ग्रहणमेकमेव धर्मशास्त्रं विदुषां त्रयाणां ग्रहणं मा
भूदिति। तानेतान्दशावरान्परिषदित्याचक्षते धर्मज्ञाः। असंभवे त्वेतेषां श्रोत्रियो वेदविच्छिष्टो विप्रतिपत्तौ यदाह। एतेषां व्यस्त
स्तानां समस्तानां च बहूनामसंभवे श्रोत्रियः सांगस्य वेदस्याध्येता वेदवित्तदर्थज्ञः शिष्टः स्वधर्मनिरतः। तथा च मनुः। एकोपि
वेदविद्धर्मं यं व्यवस्येत्समाहितः। स धर्मः परमो ज्ञेयो नाज्ञानामुदितोयुतैरिति। कस्मात्पुनरेकस्यापि श्रोत्रियस्य वेदविदः। शि
ष्टस्य वचनं कर्तव्यमित्यत आह। एतोयमप्रभवो भूतानां हिंसानुग्रहयोगेषु। प्रभवत्यस्मादिति प्रभवः कारणं तन्न विद्यते यस्य
सोप्रभवः यस्मादयं भूतानां हिंसानुग्रहयोगेषु। दंडप्रायश्चित्तादिष्वप्रमाणकारणः केवलं शास्त्रनेत्रः तस्मादेकस्यापि वचन
मनुष्ठेयमिति। अपर आह। प्रभवनं प्रभवः प्रभुत्वं तद्यस्य नास्ति सोप्रभवः। न ह्यसौ शास्त्रनिरपेक्षः स्वतंत्रः किंचिदनुगृह्णातीति नि